श्रीवेदव्यासमहामुनिप्रणीतं

गरुडमहापुराणम्

(ब्रह्मकाण्डः)

संपादकः-पं. पद्मनाभाचार्यः चिटगुप्पा

प्रकाशनम्

विश्वमध्वमहाप्रतिष्ठानम्

बसवनगुडि, बेङ्गळूरु-४.

श्रीवेदव्यासमहामुनिप्रणीतं

गरुडमहापुराणम्

(ब्रह्मकाण्डः)

संपादकः-पं. पद्मनाभाचार्यः चिटगुप्पा एम्.ए

प्रकाशनम्

विश्वमध्वमहापरिषत्

उत्तरादिमठः, बसवनगुडि, बेङ्गळूरु-४.

श्रीवेदव्यासमहामुनिप्रणीतम्

गरुडमहापुराणम्(ब्रह्मकाण्डः)

अध्यायसारांश-कन्नड संक्षिप्तसारोद्धाराभ्यां संवलितम् ।

संशोधनं-सम्पादनं च श्री पद्मनाभाचार्यः चिटगुप्पा एम्.ए

Published by :
Shri Vishwa Madhwa MahaParishath
Madhwa Siddhantha Pratishtanam,
(Founded by Sri 1008 Sri Satyatmateertha Swamiji)
Uttaradi Math, Bangalore-4.
Phone : 6678726
e-mail :

First Edition :

Copies : 1000

Price :

Printers : **Vinyasa Graphics**
Bangalore.

ಮುನ್ನುಡಿ

ಮಹೋನ್ನತವಾದ, ಅತ್ಯಗಾಧವಾದ ಅಧ್ಯಾತ್ಮವಿಶ್ವದಲ್ಲಿ ಪುರಾಣಗಳ ಪಾತ್ರ ಹಿರಿದಾದುದು. ಪುರಾಣಸಾಹಿತ್ಯವು ಅನಂತವಾದ ವೇದ, ಉಪನಿಷತ್ತುಗಳ ತತ್ತ್ವಗಳನ್ನು, ಧರ್ಮಗಳನ್ನ, ಪಂಚರಾತ್ರಾದಿ ಸಂಹಿತೆಯಲ್ಲಿರುವ ಧ್ಯಾನ, ಉಪಾಸನೆ, ಆಚಾರ, ವ್ಯವಹಾರಗಳನ್ನು, ಸ್ಮೃತಿಗ್ರಂಥಗಳಲ್ಲಿರುವ ಧರ್ಮ, ಅಧರ್ಮಗಳ ಸೂಕ್ಷ್ಮತೆಗಳನ್ನು ವಿವೇಚಿಸಿ ಸೂಕ್ತಮಾರ್ಗವನ್ನು ತೋರಿ ದಾರಿದೀಪವಾಗಿದೆ. ವಿಸ್ತೃತವಾದ ಬ್ರಹ್ಮಾಂಡದ ಸೃಷ್ಟಿ, ಸ್ಥಿತಿ, ಗತಿಗಳನ್ನು, ದೇವತೆಗಳ ಸ್ವರೂಪವನ್ನು, ಲೋಕಗಳನ್ನು, ಚಕ್ರವರ್ತಿ, ರಾಜ, ಮಹಾರಾಜರುಗಳ ಇತಿಹಾಸವನ್ನು ಯುಗಧರ್ಮವನ್ನು ಹಾಗೂ ಅನೇಕ ಮೌಲಿಕ ಪ್ರಮೇಯಗಳನ್ನು ನಿರೂಪಿಸುವಲ್ಲಿ ಪುರಾಣವು ವಿಸ್ತಾರವಾದ ವಿಶ್ವಕೋಶವೆನಿಸಿದೆ. ಇದರ ಅಧ್ಯಯನದಿಂದ ಮನೋವೈಶಾಲ್ಯ, ವೈಚಾರಿಕಪ್ರಜ್ಞೆ, ಅಧ್ಯಾತ್ಮದ ಅರಿವು, ಆತ್ಮಿಕ ವಿಕಾಸ, ಪ್ರಾಪಂಚಿಕ ಪರಿಧಿಗಳ ಅನುಭೂತಿಯು ಉಂಟಾಗುವುದು. ಆದುದರಿಂದ

> यदि विद्याच्चतुर्वेदान् साङ्गोपनिषदान् द्विजः ।
> न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः ॥

ಎಂದು ಪ್ರಾಚೀನರ ಉಕ್ತಿ.

ಈ ದಿಶೆಯಲ್ಲಿ ಗಂಭೀರವಾದ, ಕಠಿಣವಾದ ವೇದೋಪನಿಷದಾದಿಗಳ ಅರ್ಥವನ್ನು ಜನಸಾಮಾನ್ಯರಿಗೂ ತಿಳಿಸುವದಕ್ಕೆ ಪುರಾಣಗಳನ್ನು ರಚಿಸಿ ಅಜಖಿಗ್ರಹಿಸಿರುವ ಬಾದರಾಯಣ ದೇವರ ಪರಮೋಪಕಾರ ವಿಶ್ವಮಾನ್ಯವಾಗಿದೆ.

ಭಗವಾನ್ ವೇದವ್ಯಾಸರು ರಚಿಸಿದ ೧೮ ಮಹಾಪುರಾಣಗಳಲ್ಲಿ. ವಿಷ್ಣು, ಕೂರ್ಮ, ಮತ್ಸ್ಯ, ವಾಯು, ಭಾಗವತ, ಗರುಡ ಎಂಬುದಾಗಿ ೬ ಸಾತ್ವಿಕ ಮಹಾಪುರಾಣಗಳು. ಅದರಲ್ಲಿಯೂ ಭಾಗವತ, ಗರುಡ ಪುರಾಣಗಳು ಶ್ರೇಷ್ಠವೆನಿಸಿವೆ. ಇವುಗಳಲ್ಲಿ ವಿಷ್ಣುವಿನ ಪಾರಮ್ಯವನ್ನು ವೇದವ್ಯಾಸರು ವಿಶೇಷವಾಗಿ ಕೊಂಡಾಡಿರುವರು.

ಗರುಡಪುರಾಣವನ್ನು ತಾರ್ಕ್ಷ್ಯಪುರಾಣ ಅಥವಾ ವೈನತೇಯಪುರಾಣ ಎಂದೂ ಕೆಲವೊಂದು ಕಡೆ ಕರೆದಿರುವರು. ಈ ಪುರಾಣದಲ್ಲಿ ಮೂರು ಅಂಶಗಳು.

೧. ಕರ್ಮಕಾಂಡ ಅಥವಾ ಆಚಾರಕಾಂಡ

೨. ಧರ್ಮಕಾಂಡ ಅಥವಾ ಪ್ರೇತಕಾಂಡ

೩. ಬ್ರಹ್ಮಕಾಂಡ

ಎಂದು. ಗರುಡಪುರಾಣದ ಶ್ಲೋಕಗಳ ಸಂಖ್ಯೆಯ ವಿಷಯದಲ್ಲಿ ಅನೇಕ ಅಭಿಪ್ರಾಯಗಳಿವೆ. ಮತ್ಸ್ಯಪುರಾಣದ ಪ್ರಕಾರ ೧೮,೦೦೦ ಶ್ಲೋಕಗಳೆಂದು, ಭಾಗವತ ಮತ್ತು ನಾರದ ಪುರಾಣಗಳ ಪ್ರಕಾರ ೧೯,೦೦೦ ಶ್ಲೋಕಗಳೆಂದು, ಅಗ್ನಿ ಪುರಾಣದ ಪ್ರಕಾರ ೮೦೦೦ ಶ್ಲೋಕಗಳೆಂದು ತಿಳಿದುಬರುತ್ತದೆ.

೧೮೯೦ನೆಯ ಇಸವಿಯಲ್ಲಿ ಕಲ್ಕತ್ತಾದಲ್ಲಿರುವ ''ಜೀವಾನಂದ'' ಎನ್ನುವವರು ೮೦೦೦ ಶ್ಲೋಕಗಳನ್ನೊಳಗೊಂಡ ಗರುಡಪುರಾಣವನ್ನು ಮುದ್ರಿಸಿದರು.

ಅದಾದ ನಂತರ ''ವಂಗವಾಸಿ'' ಪ್ರಕಾಶನದಿಂದ ಮತ್ತು ವೆಂಕಟೇಶ್ವರ ಪ್ರೆಸ್ ಮುಂಬಯಿಯಿಂದ ಈ ಪುರಾಣವು ಪ್ರಕಾಶಿತವಾಯಿತು. ಇವುಗಳಲ್ಲಿ ಕರ್ಮಕಾಂಡ-೨೪೦ ಅಧ್ಯಾಯಗಳು, ಧರ್ಮಕಾಂಡ-೪೨ ಅಧ್ಯಾಯಗಳು, ಬ್ರಹ್ಮಕಾಂಡ-೨೯ ಅಧ್ಯಾಯಗಳಿವೆ.

೧೯೬೪ ರಲ್ಲಿ ವಾರಾಣಸಿಯಿಂದ ಪ್ರೊ.ರಾಮಶಂಕರ ಭಟ್ಟಾಚಾರ್ಯರು ಈ ಪುರಾಣವನ್ನು ಪ್ರಕಾಶನಗೊಳಿಸಿದರು. ಇದು ''ಜೀವಾನಂದ'' ಪ್ರಕಾಶನವನ್ನೇ ಆಧಾರಿಸಿ ಮುದ್ರಿಸಲಾಗಿದೆ.

೧೯೦೫ರಲ್ಲಿ ಬೆಳಗಾಂವಿಯ ರಾಮತತ್ತ್ವಪ್ರಕಾಶನದಿಂದ ಗರುಡಪುರಾಣ ಬ್ರಹ್ಮಕಾಂಡವು ಮಾತ್ರ ಮುದ್ರಿತವಾಗಿದೆ. ಇದರಲ್ಲಿ ಬ್ರಹ್ಮಕಾಂಡವು ೪೦ ಅಧ್ಯಾಯಗಳನ್ನು ಒಳಗೊಂಡಿದೆ.

೧೯೮೪ರಲ್ಲಿ ನಾಗ್ ಪಬ್ಲಿಶರ್ಸ್ ದೆಹಲಿಯಿಂದ ಪುನಃ ವೆಂಕಟೇಶ್ವರ ಮುದ್ರಣಾಲಯ ಮುಂಬಯಿಯಿಂದ ಮುದ್ರಿತವಾದ ಪುರಾಣಗಳ ಪುನರ್ಮುದ್ರಣ ಮಾಡಿರುವರು.

ಉಪಲಬ್ಧವಾದ ಗರುಡಪುರಾಣದ ಬ್ರಹ್ಮಕಾಂಡದಲ್ಲಿ ೧೦ ಅಧ್ಯಾಯಗಳ ವ್ಯತ್ಯಾಸವು ಕಂಡುಬರುತ್ತಿದೆ.

ಗರುಡಪುರಾಣದ ಬ್ರಹ್ಮಕಾಂಡದಲ್ಲಿ ಅನೇಕ ಅಪೂರ್ವ ವಿಚಾರಗಳು ಕಾಣಸಿಗುತ್ತವೆ. ಉದಾಹರಣೆಗೆ :

೧. ಅತಿಸುದೀರ್ಘವಾದ ದೇವತಾರತಮ್ಯ ಹಾಗೂ ಅವರ ಅವತಾರಗಳು.

೨. ಶರೀರದ ೩೨ ಸುಲಕ್ಷಣಗಳು ಹಾಗೂ ಅವಲಕ್ಷಣಗಳು, ಆಯಾ ದೇವ, ದಾನವ, ಮಾನವರಲ್ಲಿ ಅವುಗಳ ಇರುವಿಕೆ.

೩. ಪ್ರತ್ಯೇಕವಾದ ದೈತ್ಯರ ತಾರತಮ್ಯ

೪. ಆಹಾರ ಪದಾರ್ಥಗಳ ಸಾರಾಸಾರವಿಭಾಗ, ಗ್ರಾಹ್ಯಾಗ್ರಾಹ್ಯ ವಿವರಣೆ.

೫. ವೆಂಕಟಾಚಲ, ಸ್ವಾಮಿಪುಷ್ಕರಿಣಿ, ಕುಮಾರಿಧಾರಾತೀರ್ಥ ಮತ್ತು ಸುತ್ತಮುತ್ತಲಿನ ತೀರ್ಥಗಳು, ವೆಂಕಟಗಿರಿಯ ಸೋಪಾನಾರೋಹಣದ ಮಹತ್ತ್ವ.

೬.ಜನಾರ್ದನ, ಸೀತಾರಾಮ,ಅನಂತ, ತ್ರಿವಿಕ್ರಮ ಮುಂತಾದ ಅನೇಕ ಸಾಲಿಗ್ರಾಮ ಹಾಗೂ ಪ್ರತಿಮೆಗಳ ಲಕ್ಷಣಗಳು.

೭. ದ್ರೌಪದೀನಿರ್ಣಯ, ಅವಳ ಅವತಾರಗಳ ವಿವರ, ಇತ್ಯಾದಿ ಅನೇಕ ತಾತ್ತ್ವಿಕ, ಸೈದ್ಧಾಂತಿಕ ವಿಷಯಗಳನ್ನು ನಾವು ಕಾಣಬಹುದು.

ಸುಮಾರು ಎರಡು ವರ್ಷಗಳಿಂದ ಅನೇಕ ಪುಸ್ತಕಗಳನ್ನು ನೋಡಿ, ವಿದ್ವಾಂಸರ ಜೊತೆ ಚರ್ಚಿಸಿ, ಸಂಶೋಧಿಸಿ, ಪರಿಷ್ಕರಿಸಿ ಸಾಧ್ಯವಾದಷ್ಟು ಶುದ್ಧ ಪ್ರತಿಯನ್ನು ತಯಾರು ಮಾಡಲಾಗಿದೆ. ಪ್ರತಿಯೊಬ್ಬ ಮಾಧ್ವನು ತಪ್ಪದೆ ಇದರ ಅಧ್ಯಯನವನ್ನು ಮಾಡಿ ದ್ವೈತವಾಙ್ಮಯವು ಬಾದರಾಯಣರ ವಾಣಿಯಲ್ಲಿ ಸ್ಪಷ್ಟವಾಗಿ ಬಂದಿರುವದನ್ನು ತಿಳಿದು ಹೆಮ್ಮೆ ಪಡಬಹುದಾಗಿದೆ.

ಈ ಗ್ರಂಥದ ಸಂಶೋಧನೆಗೆ ಮೂಲ ಪ್ರೇರಣೆ ನನ್ನ ಸ್ವರೂಪೋದ್ಧಾರಕ ಗುರುಗಳಾದ, ಮುಂಬಯಿಯಿ ಸತ್ಯಧ್ಯಾನ ವಿದ್ಯಾಪೀಠದ ಕುಲಪತಿಗಳಾದ ಪೂಜ್ಯ ಶ್ರೀ ವಿದ್ಯಾಸಿಂಹಾಚಾರ್ಯ ಮಹಾಹುಲಿಯವರು. ಪ್ರತಿ ಹೆಜ್ಜೆಯಲ್ಲಿಯೂ ಅನೇಕರೀತಿಯಿಂದ ಮಾರ್ಗದರ್ಶನವನ್ನು ನೀಡಿರುವರು.

ಜಗದ್ಗುರುಗಳಾದ ಶ್ರೀ ಶ್ರೀ ೧೦೦೮ ಶ್ರೀ ಸತ್ಯಾತ್ಮತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರನ್ನು ಭೇಟಿಯಾಗಿ ಈ ಕಾರ್ಯವನ್ನು ಮಾಡುವದಕ್ಕಾಗಿ ಅನುಗ್ರಹಿಸಬೇಕೆಂದು ಪ್ರಾರ್ಥಿಸಿದಾಗ ಪೂರ್ಣಾನುಗ್ರಹದಿಂದ ಮಂತ್ರಾಕ್ಷತೆಯನ್ನು ಕೊಟ್ಟು, ಶ್ರೀಮಠದಿಂದ ಪ್ರಾಚೀನ ಪುಸ್ತಕಗಳನ್ನು ಒದಗಿಸಿದರು. ಈ ಗ್ರಂಥವು ಉತ್ತರಾದಿಮಠದ ಸಂಸ್ಥೆಯಾದ ''ವಿಶ್ವ ಮಧ್ವ ಮಹಾಪರಿಷತ್''ನಿಂದ ಪ್ರಕಾಶಿತವಾಗಲಿ ಎಂದು ಹೃತ್ಪೂರ್ವಕವಾಗಿ ಆಶೀರ್ವದಿಸಿದರು. ಪ್ರತಿ ಹಂತದಲ್ಲಿಯೂ ಈ ಗ್ರಂಥವನ್ನು ನೋಡಿ ಅನೇಕ, ಅಮೂಲ್ಯ ಆದೇಶವನ್ನು ನೀಡಿರುವರು.

ಈ ಪರಿಶ್ರಮದ ಹಿಂದೆ ಬೆಂಗಾವಲಾಗಿ ನಿಂತು ಅನುಗ್ರಹಿಸಿದ ಶಕ್ತಿಗಳು ನಾಲ್ಕು. ಜಗದ್ಗುರುಗಳಾದ ಶ್ರೀ ಸತ್ಯಪ್ರಮೋದ ತೀರ್ಥರು, ಶ್ರೀ ಸತ್ಯಾತ್ಮತೀರ್ಥರು, ಮತ್ತು ನನ್ನ ಗುರುಗಳಾದ ಶ್ರೀ ಮಾಹುಲಿ ಪರಮಾಚಾರ್ಯರು ಹಾಗೂ ಪೂಜ್ಯ ವಿದ್ಯಾಸಿಂಹಾಚಾರ್ಯರು. ಆದುದರಿಂದ ಈ ಗ್ರಂಥದ ಸಮಗ್ರ ಶ್ರೇಯಸ್ಸು ಅವರಿಗೆ ಸೇರಲಿ ಎಂದು ಭಗವಂತನಲ್ಲಿ ಪ್ರಾರ್ಥಿಸುವೆ.

ಈ ಗ್ರಂಥ ಪ್ರಕಾಶನ ಹಾಗೂ ಮುದ್ರಣಕ್ಕೆ ನಮ್ಮ ಆತ್ಮೀಯರಾದ ಶ್ರೀ ಗೋವಿಂದ ಸೂಳಿಭಾವಿಯವರು ತಮ್ಮ ತಂದೆಯವರಾದ ದಿವಂಗತ ಶ್ರೀ ರಮಾಕಾಂತ ಜಿ. ಸೂಳಿಭಾವಿಯವರ ಸ್ಮಾರಕವಾಗಿ ಸೇವಾರೂಪವಾಗಿ ಧನಸಹಾಯವನ್ನು ಮಾಡಿರುವರು. ಅವರಿಗೆ ಹಾಗೂ ಅವರ ಕುಟುಂಬದವರಿಗೆ ಭಗವಂತನು ದೀರ್ಘವಾದ ಆಯುರಾರೋಗ್ಯಗಳನ್ನು ಕರುಣಿಸಲಿ ಎಂದು ಪ್ರಾರ್ಥಿಸುವೆ.

ಪಂ. ಪದ್ಮನಾಭಾಚಾರ್ಯ ಚಿಟಗುಪ್ಪ

॥ श्रीदिग्विजयरामो विजयते ॥

आशीर्वचनम्

भगवता बादरायणेन रचितमिदं गरुडपुराणम् । भगवन्महिमादिरूपप्रमेयगर्भितमिति सुप्रसिद्धम् । परं तु अस्य शुद्धं पुस्तकं नोपलब्धमासीत् । तस्य शोधनं विधाय अस्मत्प्रियशिष्याः पं.पद्मनाभाचार्याः मुद्रणमकार्षुः । संशोधने रुचिमन्तः एते सदा संशोधननिरताः । एतादृशकार्याणि इतोऽप्यतिशयेन एतैः भवेयुः इत्यस्मदुपास्यमूलरामदिग्विजयरामाभिन्नवेदव्यासं प्रार्थयामहे ।

इत्यनेकनारायणस्मरणानि

२१-९-२०००
विक्रमनामसंवत्सरः

श्रीसत्यात्मतीर्थश्रीचरणाः

|| ಶ್ರೀದಿಗ್ವಿಜಯರಾಮೋ ವಿಜಯತೇ ||

"ಗರುಡ ಪುರಾಣ–ಬ್ರಹ್ಮಕಾಂಡ" ಈ ಗ್ರಂಥದ ಮುದ್ರಣಕ್ಕೆ ಧನಸಹಾಯವನ್ನು ಶ್ರೀಗೋವಿಂದ ಸೂಳಿಭಾವಿಯವರು ತಮ್ಮ ತೀರ್ಥರೂಪರಾದ ಶ್ರೀರಮಾಕಾಂತ ಸೂಳಿಭಾವಿಯವರ ಸ್ಮಾರಕವಾಗಿ ಮಾಡಿರುವರು. ಅವರಿಗೆ ಅಸ್ಮದುಪಾಸ್ಯ ಶ್ರೀಮೂಲದಿಗ್ವಿಜಯರಾಮಾಭಿನ್ನ ಶ್ರೀವೇದವ್ಯಾಸದೇವರು ಆಯುರಾರೋಗ್ಯ–ಐಶ್ವರ್ಯಾಭಿವೃದ್ಧಿಯನ್ನು, ವಿಶೇಷವಾಗಿ ಜ್ಞಾನ, ಭಕ್ತಿ, ವೈರಾಗ್ಯಾದಿಗಳನ್ನು ಕೊಟ್ಟು ಅನುಗ್ರಹಿಸಲಿ ಎಂದು ಪ್ರಾರ್ಥಿಸುತ್ತೇವೆ.

ಶ್ರೀಸತ್ಯಾತ್ಮತೀರ್ಥಶ್ರೀಪಾದಂಗಳವರು

ಉತ್ತರಾದಿ ಮಠ

ಪರಿವಿಡಿ

	ಪುಟ
ಗರುಡಪುರಾಣದ ಸಂಕ್ಷಿಪ್ತಸಾರೋದ್ಧಾರ(ಕನ್ನಡ)	1–11
ಅಧ್ಯಾಯಸಾರಾಂಶ(ಸಂಸ್ಕೃತದಲ್ಲಿ)	12–28
ಮೂಲಗ್ರಂಥ	೧–೨೮೯

ಗರುಡಪುರಾಣ ಬ್ರಹ್ಮಕಾಂಡದ ಸಂಕ್ಷಿಪ್ತ ಸಾರೋದ್ಧಾರ

ಭಗವಾನ್ ಬಾದರಾಯಣರು ರಚಿಸಿದ ಪುರಾಣಪ್ರಪಂಚವು ಅತಿವಿಶಾಲವಾದುದು. ತೀರ್ಥಕ್ಷೇತ್ರಗಳ ವೈಶಿಷ್ಟ್ಯವನ್ನು ಭೂಗೋಲ-ಖಗೋಲಗಳ ವೈಶಾಲ್ಯವನ್ನು ವ್ರತನಿಯಮಗಳ ಅವಶ್ಯಕತೆಯನ್ನು, ಇತಿಹಾಸದ ಸತ್ಯತೆಯನ್ನು, ವರ್ಣಾಶ್ರಮಾದಿ ಧರ್ಮಗಳ ಪ್ರಾಚೀನತೆಯನ್ನು, ಉಪನಿಷತ್ತು ಹಾಗೂ ವೇದಾದಿಗಳ ತತ್ವವಿಚಾರವನ್ನು, ದೇವದಾನವಾದಿಗಳ ಕರ್ಮ ಹಾಗೂ ಸ್ವರೂಪವನ್ನು, ರಾಜಮಹಾರಾಜರುಗಳ ತ್ಯಾಗ ಹಾಗೂ ಋಷಿದೇವಾದಿಗಳ ತಪಸ್ವಿತೆಯನ್ನು, ಯುಗಧರ್ಮಗಳ ಪರಿಚಯವನ್ನು, ಸಮಗ್ರವಿಶ್ವದ ಸೃಷ್ಟಿ, ಸ್ಥಿತಿ, ಸಂಹಾರಾದಿಗಳ ವಿವರಣೆಯನ್ನು ಸ್ವರ್ಗ, ನರಕ, ಮುಕ್ತಿ ಇತ್ಯಾದಿ ಸಾವಿರಾರು ತತ್ವಗಳ ನಿಶ್ಚಯವನ್ನು ಮಾಡುವ ಅಪೂರ್ವವಾದ ನಿಧಿ. ಇದರ ಅಧ್ಯಯನದಿಂದ ಮನೋವೈಶಾಲ್ಯ, ಭಗವಂತನ ಮಹಾಮಹಿಮೆ, ಪ್ರಪಂಚದ ಅರಿವು, ಕರ್ತವ್ಯದ ಜಾಗೃತಿ, ಶ್ರದ್ಧೆ ಸಾತ್ವಿಕಪ್ರಜ್ಞೆ ಪ್ರತಿಯೊಬ್ಬ ಮಾನವನಲ್ಲಿ ಒಡಮೂಡುತ್ತವೆ.

ವೇದವ್ಯಾಸರು ರಚಿಸಿದ ೧೮ ಮಹಾಪುರಾಣಗಳಲ್ಲಿ ಗರುಡಪುರಾಣವು ಒಂದು. ಸಾತ್ವಿಕಪುರಾಣಗಳ ಸಾಲಿನಲ್ಲಿ ಇದನ್ನು ಸೇರಿಸಲಾಗಿದೆ. ಇದರಲ್ಲಿ ೧.ಕರ್ಮಕಾಂಡ, ೨. ಪ್ರೇತಕಾಂಡ, ೩, ಬ್ರಹ್ಮಕಾಂಡವೆಂದು ಮೂರು ಭಾಗಗಳಿವೆ. ವಿಷ್ಣುಸರ್ವೋತ್ತಮತ್ವ, ದೇವತಾತಾರತಮ್ಯ, ಜಗತ್ತಿನ ಸತ್ಯತ್ವ, ನಿತ್ಯ ಮತ್ತು ನಿವೃತ್ತ ಕರ್ಮಗಳ ಆಚರಣೆಯ ವೈಶಿಷ್ಟ್ಯ, ಭಗವಂತನ ಹಾಗೂ ಇತರ ದೇವತೆಗಳ ಅವತಾರ, ಆವೇಶಾದಿಗಳು, ವಿಧಿನಿಷೇಧಾದಿಗಳ ವಿವೇಕ, ದೈತ್ಯರ ಸ್ವರೂಪ, ತಾರತಮ್ಯ ಅವರ ವ್ಯಾಪಾರ, ಜಗತ್ತಿನ ಸೃಷ್ಟಿ, ಜೀವರ ಸ್ವರೂಪ, ಗ್ರಾಹ್ಯ-ಅಗ್ರಾಹ್ಯ ಸಾರಾಸಾರ ವಸ್ತುಗಳ ವಿವೇಕ, ತೀರ್ಥಕ್ಷೇತ್ರಗಳ ವೈಶಿಷ್ಟ್ಯ ಮುಂತಾದ ಅನೇಕ ಅತ್ಯಾವಶ್ಯಕವಾದ ವಿಚಾರಗಳು ಬ್ರಹ್ಮಕಾಂಡದಿಂದ ನಮಗೆ ತಿಳಿದು ಬರುತ್ತವೆ.

ಯಾವುದೇ ಕಾರ್ಯವನ್ನು ಪ್ರಾರಂಭಿಸುವ ಮೊದಲು ನಾರಾಯಣನನ್ನು ನಮಿಸಬೇಕು. ತರುವಾಯ ಲಕ್ಷ್ಮೀ, ವಾಯು ಮುಂತಾದ ದೇವತೆಗಳ ನಮನ, ನಮಸ್ಕಾರದ ಔಚಿತ್ಯ. ಪುರಾಣಗಳ ಸಂಖ್ಯೆ ಅವುಗಳಲ್ಲಿ ಸಾತ್ವಿಕಾದಿ ವಿಭಾಗ, ಸಾತ್ವಿಕಪುರಾಣಗಳಲ್ಲಿಯೂ ಭಾಗವತ, ವಿಷ್ಣುಪುರಾಣ, ಗರುಡ ಪುರಾಣಗಳ ಶ್ರವಣದ ಆವಶ್ಯಕತೆ.

ವೇದಾದಿ ಸಕಲ ಶಬ್ದಸಮೂಹವು ವಿಷ್ಣುವಿನ ಸ್ತುತಿರೂಪ. ಯಾವ ಶಬ್ದಗಳೂ ಪರಮ ಮುಖ್ಯವೃತ್ತಿಯಿಂದ ಇತರರನ್ನು ವರ್ಣಿಸಲಾರವು. ನಿರವಧಿಕ ಗುಣಪೂರ್ಣನಾದ ವಿಷ್ಣುವೇ ಪೌರುಷೇಯ ಮತ್ತು ಅಪೌರುಷೇಯ ನಾಮಗಳಿಂದ ವಾಚ್ಯನು. वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः । तावन्ति हरिनामानि ಭಗವಂತನ ಮೂಲ ಹಾಗೂ ಅವತಾರ ರೂಪಗಳು ಪ್ರತಿಯೊಂದು ಪರಿಪೂರ್ಣವಾಗಿವೆ. ಅವುಗಳಲ್ಲಿ ನ್ಯೂನತೆಯು ಕೂಡದು. ಅನಂತ ಜೀವರಾಶಿಗಳಿಗೆ ಪರಮಾತ್ಮನೇ ಬಿಂಬನು. ಸ್ತ್ರೀ ಮತ್ತು ಪುರುಷರೂಪಗಳನ್ನು ಹೊಂದಿದವನು. ಮನುಷ್ಯನಲ್ಲಿರುವ ವಿಕಾರವು ಅವನಲ್ಲಿಲ್ಲ. ಭಗವಂತನಿಗೆ ನಪುಂಸಕರೂಪವಿಲ್ಲ. ನಿರ್ದೋಷನಾದ ವಿಷ್ಣುವಿಗೆ ದೋಷದಿಂದ ಕೂಡಿದ ಈ ರೂಪ ಹೇಗಿರಲು ಸಾಧ್ಯ ? ಜೀವರು ಭಗವಂತನಿಂದ ಭಿನ್ನರು ಹಾಗೂ ಅವನ ಪ್ರತಿಬಿಂಬರು. ವಾಯುಬ್ರಹ್ಮರು ನೇರವಾಗಿ ಪ್ರತಿಬಿಂಬರು. ಅವರಿಗೆ ಗರುಡಾದಿಗಳು ಪ್ರತಿಬಿಂಬರು. ಅವರಿಗೆ ಇಂದ್ರಕಾಮಾದಿಗಳು ಹೀಗೆ ತೃಣಾಂತ ಜೀವರುಗಳವರೆಗೆ ಬಿಂಬಪ್ರತಿಬಿಂಬ-ಭಾವವನ್ನು ತಿಳಿಯಬೇಕು. ಸಂಸಾರದಿಂದ ಬಿಡುಗಡೆಯನ್ನು ಪಡೆಯಬೇಕಾದವನು ಶ್ರೀಹರಿಯು ತನಗೆ ಸ್ವಾಮಿ, ಸರ್ವರಿಗೂ ಒಡೆಯ, ಗುಣಪೂರ್ಣ, ದೋಷದೂರ ಇತ್ಯಾದಿಗುಣಗಳುಳ್ಳವನೆಂದು ಉಪಾಸನೆಗೈಯಬೇಕು.

ಸೃಷ್ಟಿಗಿಂತ ಮೊದಲು ವೇದಾಭಿಮಾನಿ ಶ್ರೀದೇವಿಯು ವಿಷ್ಣುವನ್ನು ಅನಂತವೇದಗಳಿಂದ ಕೊಂಡಾಡುವಳು. ಶ್ರೀಮನ್ನಾರಾಯಣನು ಪ್ರಸನ್ನನಾಗಿ ಸೃಷ್ಟಿಯನ್ನು ಮಾಡಲು ಇಚ್ಛಿಸಿ ಕಾರ್ಯೋನ್ಮುಖನಾಗುವನು. ಸತ್ವ, ರಜಸ್ಸು ಮತ್ತು ತಮಸ್ಸು ಈ ಗುಣಗಳನ್ನು ಸೃಜಿಸಿ ಅವುಗಳ ಮಿಶ್ರಣವನ್ನು ಮಾಡುವನು. ಆ ರಾಶಿಯಿಂದ ಬ್ರಹ್ಮದೇವನಿಂದ ಅಭಿಮನ್ಯಮಾನವಾದ ಮಹತ್ತತ್ವವನ್ನು ಅದರಿಂದ ವೈಕಾರಿಕ, ತೈಜಸ, ತಾಮಸವೆಂದು ಮೂರು ಪ್ರಭೇದಗಳನ್ನೊಳಗೊಂಡ ರುದ್ರದೇವರ ಅಭಿಮಾನಕ್ಕೊಳಗಾದ ಅಹಂಕಾರ ತತ್ತ್ವವನ್ನು ಸೃಜಿಸಿದನು. ಅಹಂಕಾರ ತತ್ತ್ವದಿಂದ ದೇವತೆಗಳ ಶರೀರ, ಇಂದ್ರಿಯಗಳು, ತನ್ಮಾತ್ರ, ಪಂಚಭೂತಗಳು ಜನಿಸಿದವು. ಆಯಾ ತತ್ವಗಳಿಗೆ ಅಭಿಮಾನಿದೇವತೆಗಳು ಭಗವಂತನಿಂದ ಹುಟ್ಟಿದರು.

ಅನಾದಿಕಾಲದಿಂದ ಸರ್ವಜ್ಞನಾದ ನಾರಾಯಣನಿಗೆ ಅಜ್ಞಾನಲೇಶವೂ ಇಲ್ಲ. ಜೀವನು ಅನಾದಿಕಾಲದಿಂದ ದೋಷ, ಅಜ್ಞಾನಾದಿಗಳಿಂದ ಕೂಡಿದವನು, ಪರಬ್ರಹ್ಮನು ಅಣುವಿಗಿಂತಲೂ ಅಣು. ಮಹತ್ತಾದ ಆಕಾಶಕ್ಕಿಂತಲೂ ಮಹೀಯನು. ಜೀವ, ಜಡ, ಪರಮಾತ್ಮರಲ್ಲಿರುವ ಪಂಚಭೇದಗಳು ನಿತ್ಯವಾಗಿವೆ. ಭೇದಪಂಚಕವು

ಸಮಗ್ರವಿಶ್ವದಲ್ಲಿ ಪ್ರಕೃಷ್ಟವಾಗಿ ತೋರುವದರಿಂದಲೇ ಇದನ್ನು ಪ್ರಪಂಚವೆಂದು ಕರೆಯಲಾಗಿದೆ.

ವಾಯುದೇವರು ವಿಷ್ಣುವನ್ನು ಸ್ತುತಿಸುತ್ತ '' ಓ ದೇವನೇ', ಸಜ್ಜನರ ಕಷ್ಟವನ್ನು ಕಳೆಯುವದು ನಿನ್ನ ಅವತಾರದ ಉದ್ದೇಶ. ನಿನ್ನನ್ನು ಎಷ್ಟು ವರ್ಣಿಸಿದರೂ ನಿನ್ನ ಮಹಿಮೆ ಮುಗಿಯದು. ಅಚ್ಛಿನ್ನಭಕ್ತನಾದ ಎನಗೆ ಸರ್ವಕಾಲದಲ್ಲಿ ನಿನ್ನನ್ನು ಭಜಿಸುವ ಶಕ್ತಿಯನ್ನು ನೀಡು ಎಂದು ಕೇಳಿದನು. ಸರಸ್ವತಿಯು ಭಗವಂತನನ್ನು ಆರಾಧಿಸುತ್ತ, ''ಭಗವಂತನೇ ಹರಿವಾಯುಗಳು ಸರ್ವಕಾಲದಲ್ಲಿ ಸಮವಾದ ಬುದ್ಧಿಯುಳ್ಳವರು, ಅವರ ವಿಚಾರಗಳಲ್ಲಿ ವಿರೋಧವೇ ಇಲ್ಲ. ವಾಯುದೇವರು ಸಂಸಾರದಲ್ಲಿದ್ದರೂ ಇತರ ಸಂಸಾರಿಗಳಂತೆ ದುಃಖಿಗಳಲ್ಲ. ಸರ್ವದಾ ಹರಿಪ್ರವಣರು'' ಎಂದು ಸ್ತುತಿಸಿದಳು.

ಅನಂತರದಲ್ಲಿ ಶೇಷ, ಗರುಡ, ರುದ್ರ, ವಾರುಣಿ, ಸೌಪರ್ಣಿ, ಪಾರ್ವತಿ, ಇಂದ್ರ, ಕಾಮ, ಆಹಂಕಾರಿಕ ಪ್ರಾಣ, ಶಚಿ, ರತಿ, ದಕ್ಷ, ಬೃಹಸ್ಪತಿ, ಅನಿರುದ್ಧ, ಸ್ವಾಯಂಭುವ ಮನು, ಪ್ರವಹವಾಯು, ಯಮ, ಶತರೂಪಾ, ಚಂದ್ರ, ಸೂರ್ಯ, ವರುಣ, ನಾರದ, ಭೃಗು, ಅಗ್ನಿ, ಪ್ರಸೂತಿ, ವಶಿಷ್ಠ, ಮರೀಚಿ, ಅತ್ರಿ, ಅಂಗಿರ, ಪುಲಸ್ತ್ಯ ಪುಲಹ, ಕ್ರತು, ವೈವಸ್ವತ ಮನು, ವಿಶ್ವಾಮಿತ್ರ ಮುಂತಾದ ಸಕಲ ದೇವತೆಗಳು ಭಗವಂತನನ್ನು ಸ್ತುತಿಸಿದರು.

ಬ್ರಹ್ಮಾಂಡವು ಐವತ್ತು ಕೋಟಿ ವಿಸ್ತಾರವಾದುದು. ಅದರ ಮೇಲೆ ಐವತ್ತು ಕೋಟಿ ಸುವರ್ಣಾವಯವ. ಅದರ ಮೇಲೆ ಜಲಾದಿ ಸಪ್ತ ಆವರಣಗಳು ಕ್ರಮವಾಗಿ ಎರಡೆರಡು ಪಟ್ಟು ಅಧಿಕವಾಗಿವೆ. ಅಂತಿಮಾವರಣ ಹಾಗೂ ಅವ್ಯಾಕೃತಾಕಾಶಗಳ ಮಧ್ಯದಲ್ಲಿ ವಿರಜಾನದಿಯಿದೆ. ಪುಣ್ಯತಮವಾದ ಐದು ಯೋಜನವಿಸ್ತೀರ್ಣವಾದ ಈ ನದಿಯಲ್ಲಿ ಮುಕ್ತಿಯನ್ನು ಪಡೆಯುವ ಜೀವರುಗಳು ಚತುರ್ಮುಖನೊಡನೆ ಸ್ನಾನಗೈದು ಮುಕ್ತರಾಗುವರು. ವಿರಜೆಯು ಭಗವಂತನ ಬೆವರಿನ ರೂಪಳು. ವಾಯುಬ್ರಹ್ಮರಿಗೆ ೩೨ ಲಕ್ಷಣಗಳಿವೆ. ರುದ್ರಪದವಿಗೆ ಬರುವವರಿಗೆ ೨೮ ಲಕ್ಷಣಗಳು. ಇಂದ್ರಾದಿ ದೇವತೆಗಳಿಗೆ ೨೪ ರಿಂದ ೧೬ ಲಕ್ಷಣಗಳು ಇರುವುವು. ಋಷಿಗಳಿಗೆ ೮ರವರೆಗೆ ಲಕ್ಷಣಗಳಿರುವುವು. ಚಕ್ರವರ್ತಿಗಳಿಗೆ ಅದಕ್ಕಿಂತ ಕಡಿಮೆಯಿರುತ್ತದೆ.

ಚತುರ್ಮುಖ ಬ್ರಹ್ಮನಿಗೆ ಒಂದು ನೂರು ಕಲ್ಪಗಳ ಮೊದಲು ಅಪರೋಕ್ಷಜ್ಞಾನ ಸಂಭವಿಸುವುದು. ೯೯ನೆಯ ಕಲ್ಪದಲ್ಲಿ ವಾಯುಪದವಿ, ೧೦೦ನೆಯ ಕಲ್ಪದಲ್ಲಿ ಬ್ರಹ್ಮಪದವಿ ಸಿಗುವದು. ರುದ್ರದೇವರಿಗೆ ೪೦ ಕಲ್ಪಗಳು, ಇಂದ್ರನಿಗೆ ೨೦ ಕಲ್ಪಗಳು, ಸೂರ್ಯಾದಿಗಳಿಗೆ ೧೦ ಕಲ್ಪಗಳು. ಸಾಧನ ಸಮಾಪ್ತಿ ನಂತರ ಎಲ್ಲರು ಚತುರ್ಮುಖ ಬ್ರಹ್ಮನ ಜತೆ ಮುಕ್ತಿಯನ್ನು ಪಡೆಯುವರು.

ಜೀವರನ್ನು ಆಚ್ಛಾದನಗೊಳಿಸುವ ಪ್ರಕೃತಿಯು ಎರಡು ವಿಧವಾಗಿವೆ. ೧.ಜೀವಾಚ್ಛಾದಿಕಾ ೨.ಪರಮಾಚ್ಛಾದಿಕಾ ಎಂದು. ಜೀವಾಚ್ಛಾದಿಕೆಯೆಂಬ ಪ್ರಕೃತಿಯನ್ನು ಕಳೆದು ಪರಮಾಚ್ಛಾದಿಕೆಯೆಂಬ ಪ್ರಕೃತಿಯನ್ನು ದೂರ ಸರಿಸು ಎಂದು ಲಕ್ಷ್ಮಿಯು ಭಗವಂತನನ್ನು ಪ್ರಾರ್ಥಿಸುವಳು. ಭಗವಂತನು ಧರಿಸಿದ ಆಯುಧಗಳು ಎರಡು ವಿಧವಾಗಿವೆ. ಒಂದು ಭಗವತ್ಸ್ವರೂಪ, ಇನ್ನೊಂದು ಭಗವಂತನಿಂದ ಬೇರೆ. ಅವುಗಳಿಗೆ ದೇವತೆಗಳು ಅಭಿಮಾನಿಗಳಾಗಿರುವರು. ವಾಯುಬ್ರಹ್ಮರಿಗೆ ಅಜ್ಞಾನ, ಸುಷುಪ್ತಿಗಳು ಇಲ್ಲ. ಭಗವದಿಚ್ಛೆಯಿಂದ ಅವುಗಳನ್ನು ಜೀವರಿಗೆ ಕೊಡುವರು. ಶ್ರೀಹರಿಯನ್ನು ಬಿಟ್ಟು ಇತರ ಬ್ರಹ್ಮಾಂಡದ ವಿಷಯದಲ್ಲಿ ಆಲೋಚನ ಮಾಡಿದ ಮಾತ್ರಕ್ಕೆ ಸಕಲವನ್ನು ತಿಳಿಯುವರು. ಲಕ್ಷ್ಮೀನಾರಾಯಣರ ವಿಷಯದಲ್ಲಿ ಮಾತ್ರ ಪೂರ್ಣವಾಗಿ ತಿಳಿಯಲಾರರು. ಬ್ರಹ್ಮದೇವರು ಸೃಷ್ಟಿಯ ಆದಿಯಲ್ಲಿ "ತಪ" ಎಂಬ ಎರಡಕ್ಷರವನ್ನು ಆಕಾಶವಾಣಿಯಿಂದ ತಿಳಿದು ಭಗವಂತನನ್ನು ಆರಾಧಿಸಿ ವಿಷ್ಣುವಿನ ದರ್ಶನವನ್ನು ಪಡೆದು ಸೃಷ್ಟಿಯನ್ನು ಆರಂಭಿಸಿದರು. ವಾಯುದೇವರಿಗೆ ಶರೀರವಿದ್ದರೂ ಅಭಿಮಾನವಿಲ್ಲದಿರುವದರಿಂದ "ಅಶರೀರಿ" ಎಂದು ಕರೆಯುವರು. ಭಗವಂತನ ವಿಷಯದಲ್ಲಿ ಎಂದಿಗೂ ಅಜ್ಞಾನ, ವಿಪರೀತಜ್ಞಾನಗಳಿಲ್ಲ. ಆದ್ದರಿಂದ ಋಜುಗಳೆಂದು ಅವರನ್ನು ಕರೆದಿರುವರು. ಇತರ ದೇವತೆಗಳಿಗಿರುವಂತೆ ಅಸುರಾವೇಶ, ಅಸುರಬಾಧೆಗಳಿಲ್ಲ. ಭಾರತಿದೇವಿಯೂ ವಾಯುದೇವರಂತೆ ಅಸುರಾವೇಶರಹಿತಳು. ಭಗವಂತನ ವಿಷಯದಲ್ಲಿ ಶುದ್ಧಳು.

ಒಂದು ಬ್ರಹ್ಮಕಲ್ಪದಲ್ಲಿ ಒಬ್ಬನು ಕಲಿ. ಋಜುಪದವಿಗೆ ಬರುವ ದೇವತೆಗಳಂತೆ ಕಲಿಪದವಿಗೆ ಬರುವ ದೈತ್ಯರ ಗುಂಪು ಇದೆ. ಬ್ರಹ್ಮದೇವರ ಒಂದು ಕಲ್ಪದಲ್ಲಿ ಅನೇಕದೈತ್ಯರು ತಮ್ಮ ಸಾಧನ ಪೂರ್ಣಗೊಳಿಸಿ ತಮಸ್ಸನ್ನು ಪ್ರವೇಶಿಸುತ್ತಾರೆ. ವಾಯುದೇವರ ಗದಾಪ್ರಹಾರದಿಂದ ಇವರಿಗೆ ಲಿಂಗಭಂಗವಾಗುತ್ತದೆ. ಕಲಿ, ಅಲಕ್ಷ್ಮಿ, ವಿಪ್ರಚಿತ್ತಿ, ಕಾಲನೇಮಿ, ಮಧುಕೈಟಭರು, ನರಕ, ಹಿರಣ್ಯಕಶಿಪು, ಹಿರಣ್ಯಾಕ್ಷ, ಮಣಿಮಾನ್, ಬಕ, ತಾರಕ, ಶಂಬರ, ಹಿಡಿಂಬ, ಬಾಣ, ನಮುಚಿ, ಧೇನುಕ, ಪೂತನಾ, ಅರಿಷ್ಟ, ಲವಣ, ಪೌಂಡ್ರಕ ಮೊದಲಾದ ದೈತ್ಯರು ತಾರತಮ್ಯಾನುಗುಣವಾಗಿ ಹರಿ, ವಾಯು, ದೇವತಾದ್ರೋಹದಿಂದ ತಮ್ಮ ಸಾಧನೆಯನ್ನು ಪೂರ್ಣಮಾಡಿಕೊಳ್ಳುವರು.

ಭಗವಂತನು ತನ್ನ ಶರೀರಾವಯವಗಳಿಂದ ಅನೇಕ ದೇವತೆಗಳನ್ನು, ಬ್ರಾಹ್ಮಣಾದಿವರ್ಣಗಳನ್ನು, ಯಜ್ಞಸಾಮಗ್ರಿ ಮುಂತಾದವುಗಳನ್ನು ಹುಟ್ಟಿಸಿದನು. ಭಗವಂತನ ಹಸ್ತಪಾದಾದಿ ಶರೀರಾವಯವಗಳು, ಕೇಶಲೋಮಾದಿಗಳು ಎಲ್ಲವೂ ಪರಿಪೂರ್ಣ ಹಾಗೂ ಅನಂತವಾಗಿವೆ. ಭಗವಂತನು ಸಂಸಾರದಲ್ಲಿದ್ದರೂ

ಸ್ವಭೋಗ್ಯವಾದ ಸ್ವಾಖ್ಯರಸಾದಿಗಳನ್ನು ಅನುಭವಿಸುವನು. ಜೀವಭೋಗ್ಯವಾದುದನ್ನು ಭಗವಂತನು ಭೋಗಿಸುವುದಿಲ್ಲ.

ಭಗವಂತನಿಗೆ ನಿವೇದಿತವಾಗದ ಹಾಗೂ ನಿಷಿದ್ಧವಾದ ಪದಾರ್ಥಗಳು ಅಸಾರವೆನಿಸುವುವು. ಕೆಲವು ಪದಾರ್ಥಗಳು ಕೆಲಕಾಲದ ನಂತರ ಅಸಾರವೆನಿಸುವುವು. ಬಾಳೆಯ ಹಣ್ಣು ನಾಲ್ಕುದಿನಗಳವರೆಗೆ ಸಾರ, ಅನಂತರ ಅಸಾರ, ಹಲಸು ೧ ತಿಂಗಳವರೆಗೆ ಸಾರ, ಖರ್ಜೂರ ಆರು ತಿಂಗಳವರೆಗೆ ಸಾರ, ತೆಂಗಿನಕಾಯಿ ಒಂದು ದಿನದವರೆಗೆ ಸಾರ, ತಾಂಬೂಲ ಒಂದು ಘಂಟೆಯವರೆಗೆ ಸಾರ, ಅನ್ನ, ಸಾರು ಇತ್ಯಾದಿಗಳು ಒಂದು ಯಾಮದವರೆಗೆ ಸಾರವೆನಿಸುವವು. ತೈಲ ಮತ್ತು ಪಕ್ವಪದಾರ್ಥಗಳು ನಾಲ್ಕು ಯಾಮಗಳವರೆಗೆ ಸಾರ. ಇನ್ನೂ ಕೆಲವು ಫಲಗಳು ೩ ಅಥವಾ ೬ ತಿಂಗಳವರೆಗೆ ಸಾರವೆನಿಸುವವು.

ತುಲಸಿಯು ಸರ್ವಕಾಲದಲ್ಲಿ ಸಾರವು. ಏಕಾದಶ್ಯಾದಿ ಉಪವಾಸದಿನಗಳಲ್ಲಿ ಕೇವಲ ಆಘ್ರಾಣನ ಹೊರತು ಸೇವನೆಯಿಲ್ಲ. ಏಕಾದಶಿಯ ದಿನ ಸ್ವಾದೂದಕತೀರ್ಥವು ಅಸಾರವೆನಿಸಿದೆ. ಚಾತುರ್ಮಾಸ್ಯದಲ್ಲಿ ಆಯಾ ಪದಾರ್ಥಗಳು ಅಸಾರವೆನಿಸಿದೆ. ತುಲಸಿಮಾಲೆಯಿಲ್ಲದ ಶರೀರವು ಅಸಾರ. ಊರ್ಧ್ವಪುಂಡ್ರವಿಲ್ಲದ ನಾರಿಯು ನಿಸ್ಸಾರಳು. ಹರಿನಾಮವಿಲ್ಲದ ನಾಲಿಗೆಯು ನಿಸ್ಸಾರವು. ಕುಂಕುಮವು ಮೂರುವರ್ಷ ಸಾರ. ಕಸ್ತೂರಿ ಹತ್ತು ವರ್ಷ ಸಾರ, ಕರ್ಪೂರ ಒಂದು ವರ್ಷ ಸಾರ, ಚಂದನವು ಸರ್ವದಾ ಸಾರವಾಗಿದೆ. ಇದಲ್ಲದೆ ಸರ್ವಕಾಲದಲ್ಲಿ ನಿಸ್ಸಾರವಾದ ದ್ರವ್ಯಗಳನ್ನು ಭಗವಂತನಿಗೆ ನಿವೇದಿಸಕೂಡದು, ಭಕ್ಷಣವಂತೂ ಸರ್ವಥಾ ನಿಷೇಧಿಸಲಾಗಿದೆ.

ಮಹಾವಿಷ್ಣುವು ಜಗತ್ತಿನ ಉದ್ಧಾರಕ್ಕಾಗಿ, ದೇವತಾಕಾರ್ಯಕ್ಕಾಗಿ ಅನಿರುದ್ಧಾದಿ, ಮತ್ಸ್ಯಾದಿ, ದತ್ತ ವ್ಯಾಸಕಪಿಲಾದಿ ರೂಪಗಳನ್ನು ಸ್ವೀಕರಿಸಿರುವನು. ವಿಷ್ಣುವಿನಮಡದಿ ಮಹಾಲಕ್ಷ್ಮಿಯು ತಾನೂ ಸಹ ಶಾಂತಿ, ಜಯಾ, ಸೀತಾ ಸತ್ಯಾದಿ ಅನಂತರೂಪಗಳನ್ನು ಧರಿಸಿ ಭಗವಂತನನ್ನು ಸೇವಿಸುವಳು.

ವಾಯುಬ್ರಹ್ಮರು ಸಂಸಾರದಲ್ಲಿದ್ದರೂ ಸುಖವನ್ನೇ ಅನುಭವಿಸುವರು. ರುದ್ರೇಂದ್ರಾದಿ ದೇವತೆಗಳು ಸುಖವನ್ನನುಭವಿಸುವರು. ಕೆಲವೊಂದು ಬಾರಿ ದುಃಖವನ್ನು ಅನುಭವಿಸುವಾಗ ದೈತ್ಯರ ಆವೇಶವಿದೆಯೆಂದು ತಿಳಿಯಬೇಕು. ದೇವತೆಗಳಿಗೆ ಎಂದಿಗೂ ನರಕಾದಿಗಳಿಲ್ಲ. ಹಾಗೆಯೇ ದೈತ್ಯರಿಗೆ ಸ್ವಾಭಾವಿಕವಾದ ಸುಖದ ಅನುಭವವಿಲ್ಲ. ಕೆಲವೊಂದು ಬಾರಿ ಸುಖವು ಉಂಟಾದರೆ ಅದು ದೇವತೆಗಳ ಆವೇಶದಿಂದಾಗಿ ತಿಳಿಯಬೇಕು. ವಾಯುದೇವರಿಗೆ ಮಾತ್ರ ಅವತಾರತ್ರಯದಲ್ಲಿ ಗರ್ಭವಾಸ, ಶುಕ್ಲಶೋಣಿತಾದಿ ಸಂಬಂಧವಿಲ್ಲ. ವಾಯುದೇವರ ಅವತಾರವಾದ

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರನ್ನು ದೂಷಿಸಲು ಮಣಿಮಂತನು ಕಾಲಡಿ ಗ್ರಾಮದಲ್ಲಿ ಸಂಕರನಾಗಿ ಹುಟ್ಟಿ ಮಾಯಾವಾದ ಮತವನ್ನು ಪ್ರಚಾರಗೊಳಿಸುವನು. ಮುಂದೆ ಮಧ್ವಾಚಾರ್ಯರು ಅವತರಿಸಿ ಆ ಮತವನ್ನು ಖಂಡಿಸಿ ಪುನಃ ದ್ವೈತಮತವನ್ನು ಸ್ಥಾಪಿಸುವರು.

ಭಾರತಿದೇವಿಯು ಶಚಿ, ಶ್ಯಾಮಲಾ, ಉಷಾ ಮತ್ತು ಉಮಾ ಎಂದು ನಾಲ್ಕು ದೇವತಾಸ್ತ್ರೀಯರಿಂದೊಡಗೂಡಿ ಭೂಮಿಯಲ್ಲಿ ಜನಿಸುವಳು. ಇವಳಿಗೆ ಕಾಳಿ, ವಿಪ್ರಕನ್ಯಾ, ನಳನಂದಿನಿ, ದ್ರೌಪದಿ, ಚಂದ್ರಾ ಇತ್ಯಾದಿ ಅವತಾರಗಳಿವೆ. ದ್ವಾಪರದಲ್ಲಿ ಪಾಂಡವರ ಪತ್ನಿಯಾಗುವಳು. ಅವಳಿಗಿರುವ ಪಂಚಪತಿತ್ವ ಪ್ರಮಾಣಸಿದ್ಧವಾದುದು.

ರುದ್ರದೇವರು ಉಗ್ರ, ಕಪರ್ದಿ, ದೂರ್ವಾಸ, ಶುಕ, ಅಶ್ವತ್ಥಾಮ, ಜೈಗೀಷವ್ಯ ಮೊದಲಾದ ರೂಪಗಳನ್ನು ಹೊಂದಿರುವರು. ಮುಕ್ತಿಯಲ್ಲಿಯೂ ಭೇದವು ಮತ್ತು ತರತಮಭಾವವು ಇರುವುದು. ಎಲ್ಲರ ಆನಂದವು ಒಂದೇ ತೆರನಾದುದಿಲ್ಲ. ಆದರಲ್ಲಿ ತಾರತಮ್ಯವುಂಟು. ಜ್ಞಾನ, ಸಾಧನ ಹಾಗೂ ಸ್ವರೂಪಗಳ ತಾರತಮ್ಯದಿಂದ ಆನಂದದಲ್ಲಿ ತಾರತಮ್ಯವನ್ನಂಗೀಕರಿಸಬೇಕು.

ಭಗವಂತನು ತನ್ನ ಸ್ವರೂಪವನ್ನು ಹಾಗೂ ಬ್ರಹ್ಮಾಂಡದ ಪರಮಾಣುವಿನ ಅನಂತಾಂಶಗಳನ್ನೂ ಸಮಗ್ರವಾಗಿ ತಿಳಿದಿರುವನು. ಲಕ್ಷ್ಮೀದೇವಿಯು ಬ್ರಹ್ಮಾಂಡದ ಅನಂತಾಂಶಗಳನ್ನು ಆಲೋಚನೆಯಿಲ್ಲದೆಯೂ ಸಂಪೂರ್ಣ ಅರಿತಿರುವಳು. ಪರಬ್ರಹ್ಮನ ವಿಷಯದಲ್ಲಿ ಮಾತ್ರ ಪೂರ್ಣವಾಗಿ ತಿಳಿದಿಲ್ಲ. ಬ್ರಹ್ಮವಾಯುಗಳು ಜಗತ್ತಿನ ಜ್ಞಾನವನ್ನು ಆಲೋಚಿಸಿದಾಗ ಪೂರ್ಣವಾಗಿ ಪಡೆಯುವರು. ಮುಂದಿನ ದೇವತೆಗಳು ತಮ್ಮ ತಮ್ಮ ಯೋಗ್ಯತೆಗೆ ಅನುಗುಣವಾಗಿ ಜಗತ್ತಿನ ಜ್ಞಾನವನ್ನು ಪಡೆದಿರುವರು.

ಶ್ರೀಕೃಷ್ಣನ ಷಣ್ಮಹಿಷಿಯರಲ್ಲಿ ಒಬ್ಬಳಾದ ನೀಲಾದೇವಿಯು ಕೃಷ್ಣನನ್ನು ಪತಿಯನ್ನಾಗಿ ಪಡೆಯುವದಕ್ಕೆ ಪೂರ್ವಜನ್ಮದಲ್ಲಿ ಇತರ ಪತಿಗಳೆಲ್ಲರೂ ಅಲ್ಪರು ತ್ರಿಗುಣಬದ್ಧರು. ಭಗವಂತನೇ ನನಗೆ ಪತಿಯಾಗಲೆಂದು ಸಾವಿರಾರು ವರ್ಷಗಳವರೆಗೆ ತಪಸ್ಸನ್ನಾಚರಿಸಿ ವೆಂಕಟಾಚಲಪತಿಯಿಂದ ವರವನ್ನು ಪಡೆದಳು. ಕುಮಾರಿಯಾದ ಇವಳು ತಪವನ್ನಾಚರಿಸಿದ ಕಾರಣ ಆ ತೀರ್ಥಕ್ಕೆ ''ಕುಮಾರಿಧಾರಾ ತೀರ್ಥ''ವೆಂದು ಹೆಸರು ಬಂದಿತು. ಮುಂದಿನ ಜನ್ಮದಲ್ಲಿ ಸಂಸ್ಕಾರಾತ್ಪೂರ್ವದಲ್ಲಿ ಆ ನೀಲೆಯು ಶ್ರೀಕೃಷ್ಣನ ಮಡದಿಯಾದಳು. ಭದ್ರಾ-ಮಿತ್ರವಿಂದೆಯರು ಭಗವಂತನನ್ನು ಆರಾಧಿಸಿ ದೇಹವೆಲ್ಲವೂ ಭಗವಂತನಿಗಾಗಿಯೇ ಮೀಸಲು ಎಂದು ಭಾವಿಸಿ ಆ ದೇಹವನ್ನು ತೊರೆದು ಮರುಜನ್ಮದಲ್ಲಿ ಶ್ರೀಕೃಷ್ಣನ ಮಡದಿಯರಾದರು.

ಶರೀರದಲ್ಲಿ ೩೨ ಲಕ್ಷಣಗಳಿರುತ್ತವೆ. ಅವು ಪೂರ್ಣವಾಗಿ, ನಿರವಧಿಕ ಸ್ಪಷ್ಟವಾಗಿ ನಾರಾಯಣನಲ್ಲಿ, ತರುವಾಯ ಸ್ಪಷ್ಟತೆಯಲ್ಲಿ ಸ್ವಲ್ಪ ಕಡಿಮೆಯಾಗಿ ಲಕ್ಷ್ಮೀದೇವಿಯಲ್ಲಿ, ಇನ್ನೂ ಕಡಿಮೆಯಾಗಿ ಬ್ರಹ್ಮ, ವಾಯು, ಸರಸ್ವತಿ, ಭಾರತಿಯರಲ್ಲಿ ಇರುತ್ತವೆ. ಹೀಗೆ ೩೨ ಲಕ್ಷಣಗಳು ಈ ದೇವತೆಗಳಲ್ಲಿ ಮಾತ್ರ ಇವೆ. ಇತರ ದೇವತೆಗಳಲ್ಲಿ ಕಡಿಮೆಯಾಗಿ ಇವೆ. ಮನುಷ್ಯರವರೆಗೂ ಎಷ್ಟು ಲಕ್ಷಣಗಳು ಇರುವುವೆಂದು ತಿಳಿಸಿ, ಹಾಗೆಯೇ ಶರೀರದ ದುರ್ಲಕ್ಷಣಗಳನ್ನು ವಿವರವಾಗಿ ತಿಳಿಸಿ ಅವುಗಳು ದೈತ್ಯರಲ್ಲಿ ತಾರತಮ್ಯಾನುಸಾರವಾಗಿ ಇರುವವೆಂದೂ ಹೇಳಲಾಗಿದೆ. ರುದ್ರಾದಿ ದೇವತೆಗಳಲ್ಲಿಯೂ ಕೆಲವೊಂದು ದುರ್ಲಕ್ಷಣಗಳು ಇವೆ. ಈ ದುರ್ಲಕ್ಷಣಗಳು ಮೋಕ್ಷದಲ್ಲಿ ಜ್ಞಾನ, ಆನಂದಗಳ ಹ್ರಾಸಕ್ಕೆ ಕಾರಣವಾಗಿವೆಯೆಂದು ಅವುಗಳ ವಿಸ್ತಾರವಾದ ವಿವರಣೆಯಿದೆ.

ಪೂರ್ವಜನ್ಮದಲ್ಲಿ ಸೋಮಪುತ್ರಿ ಜಾಂಬವತಿಯು ಸರ್ವಪ್ರಕಾರಗಳಿಂದಲೂ ಭಗವಂತನನ್ನು ಆರಾಧಿಸಿದಳು. ಶೇಷಾಚಲವನ್ನು ಸೇರಿ ಭಗವಂತನನ್ನು ಕಾಣುವದಕ್ಕಾಗಿ ಕಠೋರತಪವನ್ನಾಚರಿಸಿದಳು. ಕಪಿಲತೀರ್ಥದಲ್ಲಿ ಸ್ನಾನವನ್ನಾಚರಿಸಿ ಜೈಗೀಷವ್ಯರಿಂದ ವಿಷ್ಣುವಿನ ಅನೇಕ ಮಾಹಾತ್ಮ್ಯವನ್ನು ಕೇಳುತ್ತಾ ಆ ಪರ್ವತದ ಸೋಪಾನವನ್ನು ಏರಿದಳು. ಸೋಪಾನವನ್ನು ಗಂಧಾದಿಗಳಿಂದ ಪೂಜಿಸಿ, ಅಲ್ಲಿ ಶಾಲಿಗ್ರಮವನ್ನಿಟ್ಟು ನಮಸ್ಕರಿಸಿ ಸೋಪಾನವನ್ನು ಏರುತ್ತಿದ್ದಳು. ಹೀಗೆ ಪ್ರತಿಯೊಂದು ಮೆಟ್ಟಲಿನ ಪೂಜೆಯನ್ನು ಮಾಡುತ್ತ ಏರಿದಳು. ಸಮಗ್ರಪರ್ವತವು ಶಾಲಿಗ್ರಾಮದಂತೆ ಪವಿತ್ರವೆಂದು ಭಾವಿಸಿ ಮೊಳಕಾಲಿನಿಂದ ಪರ್ವತಾರೋಹಣವನ್ನು ಮಾಡಿದಳು. ಜೈಗೀಷವ್ಯರು ಅನೇಕ ಭಗವದ್ಭಕ್ತರ ಮಾಹಾತ್ಮ್ಯವನ್ನು ಭಗವಂತನ ಗುಣಗಳನ್ನು ವರ್ಣಿಸುತ್ತಿದ್ದರು.

ನಿಷ್ಕಾಮಭಾವದಿಂದ ವಿಷ್ಣುವನ್ನು ಪೂಜಿಸಬೇಕು. ಭಗವಂತನ ಎಲ್ಲ ನಾಮಗಳು ಅವನ ಮಹಿಮೆಯನ್ನು ಕೊಂಡಾಡುವವು. ಸಕಲ ತೀರ್ಥ, ಕ್ಷೇತ್ರಗಳಲ್ಲಿ ಭಗವಂತನ ಸನ್ನಿಧಾನವುಂಟು. ನೆಲ, ನೀರು, ಬೆಂಕಿ, ಗಾಳಿ, ಆಕಾಶ, ವನ, ಗಿರಿ, ಗ್ರಾಮ, ಗುಹೆ ಎಲ್ಲೆಡೆಯಲ್ಲಿ ಭಗವಂತನಿದ್ದು ಸರ್ವರನ್ನು ಅನೇಕರೂಪಗಳಿಂದ ಸಂರಕ್ಷಿಸುವನು. ಭಗವಂತನನ್ನು ಪೂಜಿಸುವಾಗ ಆವರಣ, ಪೀಠ ದೇವತೆಗಳನ್ನು ಪೂಜಿಸಿ ಪರಿವಾರಸಮೇತವಾಗಿ ಅರ್ಚಿಸಬೇಕು. ''ಓಂ ನಮೋ ವೇಂಕಟೇಶಾಯ'' ಎಂಬ ಅಷ್ಟಾಕ್ಷರಮಂತ್ರವನ್ನು ಉಪದೇಶಿಸಿ, ನಾಮದ ನಿರ್ವಚನ ಮಾಡಿ ಅದರ ಮಹತ್ವವನ್ನು ಅರುಹಿದರು. ಹಗಲು-ರಾತ್ರಿಗಳನ್ನು ಕೇವಲ ಹರಿನಾಮ ಚಿಂತನೆಯಲ್ಲಿಯೇ ಜಾಂಬವತಿ ಕಳೆಯುತ್ತಿದ್ದಳು.

ವೆಂಕಟೇಶನು ಭಕ್ತರನ್ನು ಅನುಗ್ರಹಿಸಲಿಕ್ಕಾಗಿ ವೈಕುಂಠವನ್ನು ಬಿಟ್ಟು ಈ ಪರ್ವತದಲ್ಲಿ ಬಂದು ನೆಲೆಸಿರುವನು. ಈ ಕ್ಷೇತ್ರವು ಭೂವೈಕುಂಠವೆಂದು ವಿಶ್ರುತವಾಗಿದೆ. ದೇವತೆಗಳು ಸಹ ಈ ಕ್ಷೇತ್ರವನ್ನು ಸಮಗ್ರವಾಗಿ ವರ್ಣಿಸಲಾರರು. ಸ್ವಾಮಿ ಪುಷ್ಕರಿಣೀ ತೀರ್ಥವು ಸಕಲ ತೀರ್ಥಗಳ ಸನ್ನಿಧಿಯಿಂದ ಕೂಡಿದೆ. ಮೂರುವರೆ ಕೋಟಿ ತೀರ್ಥಗಳ ಸನ್ನಿಧಿಯಿಂದ ಕೂಡಿದೆ. ಮೂರುವರೆ ಕೋಟಿ ತೀರ್ಥಗಳ ಸನ್ನಿಧಿಯಿಂದ ಕೂಡಿದ ಸ್ವಾಮಿಪುಷ್ಕರಿಣಿಯಲ್ಲಿ ಸ್ನಾನ ಮಾಡುವ ಮಾತ್ರದಿಂದ ನರನು ಸರ್ವಪಾಪಗಳಿಂದ ಮುಕ್ತನಾಗುವನು. ಸ್ವಾಮಿಪುಷ್ಕರಿಣಿಯ ಸುತ್ತಲೂ ವಾಯುತೀರ್ಥ, ಮಧ್ವತೀರ್ಥ, ಚಂದ್ರತೀರ್ಥ, ಕುಬೇರತೀರ್ಥ, ಬ್ರಹ್ಮತೀರ್ಥ, ವಹ್ನಿತೀರ್ಥ, ಯಮತೀರ್ಥ, ನಿರ್ಋತಿತೀರ್ಥ, ಇತ್ಯಾದಿ ಅನೇಕ ತೀರ್ಥಗಳಿವೆ. ಜನಾರ್ದನ ಶಾಲಿಗ್ರಾಮ, ವರಾಹ, ನೃಸಿಂಹ, ಲಕ್ಷ್ಮೀನಾರಾಯಣ, ದಧಿವಾಮನ, ತ್ರಿವಿಕ್ರಮ, ಷಟ್‌ಚಕ್ರ ಸೀತಾರಾಮ, ವಾಸುದೇವ, ಪಟ್ಟಾಭಿರಾಮ, ಅನಂತ ಇತ್ಯಾದಿ ಅನೇಕ ಶಾಲಿಗ್ರಾಮಗಳ ಲಕ್ಷಣ, ಸ್ವರೂಪಗಳನ್ನು ಹಾಗೂ ಮೂರ್ತಿಗಳ ಲಕ್ಷಣಗಳನ್ನು ತಿಳಿದು ಈ ತೀರ್ಥಗಳಲ್ಲಿ ಇವುಗಳನ್ನು ದಾನ ಮಾಡಿದರೆ ಅಥವಾ ಪೂಜೆ ಮಾಡಿದರೆ ಅನಂತವಾದ ಫಲ ದೊರೆಯುವುದು.

ವೆಂಕಟೇಶನ ನೈವೇದ್ಯವು ಸರ್ವರಿಂದಲೂ ಗ್ರಾಹ್ಯವು. ಯಾರೂ ಪರಿತ್ಯಜಿಸಬಾರದು. ತನಗೆ ಅದು ಪ್ರಶಸ್ತವೆನಿಸದಿದ್ದಲ್ಲಿ ಕಲ್ಲುಸಕ್ಕರೆ, ಉತ್ತತ್ತಿ ಇತ್ಯಾದಿರೂಪವಾದ ನೈವೇದ್ಯವನ್ನಾದರೂ ಸ್ವೀಕರಿಸಬೇಕು.

ಈ ವಿಧವಾಗಿ ಜಾಂಬವತಿ ಭಗವಂತನನ್ನು ಪೂಜಿಸಿ, ಜನ್ಮಾಂತರದಲ್ಲಿ ಜಾಂಬವಂತನ ಪುತ್ರಿಯಾಗಿ ಶ್ರೀಕೃಷ್ಣನ ಮಡದಿಯಾದಳು. ಷಣ್ಮಹಿಷಿಯರಲ್ಲಿ ಜಾಂಬವತಿಯಲ್ಲಿ ಲಕ್ಷ್ಮಿಯ ಸನ್ನಿಧಾನವು ಅಧಿಕವಾದುದರಿಂದ ಅವಳು ಉತ್ತಮಳು.

ಇಂದ್ರ, ಕಾಮ, ಸ್ಕಂದ ಮುಂತಾದ ದೇವತೆಗಳು ಶಚಿ, ರತಿ ಮೊದಲಾದ ದೇವತಾಸ್ತ್ರೀಯರು ವಿಷ್ಣುವಿನ ಆಜ್ಞಾನುಸಾರವಾಗಿ ಭೂಮಿಯಲ್ಲಿ ಅವತಾರಗಳನ್ನು ಪಡೆದು ಭೂಭಾರಹರಣರೂಪಕಾರ್ಯದಲ್ಲಿ ಭಗವಂತನಿಗೆ ಅಂಗರಾಗಿರುವರು.

ಸಂಸಾರದಲ್ಲಿ ಭಾರ್ಯೆಯರು ಎರಡು ವಿಧರು. ದುಷ್ಟರಾದ ಭಾರ್ಯೆಯರು ವಿಷ್ಣು, ವೈಷ್ಣವರ, ಅಶ್ವತ್ಥ, ತುಲಸಿ, ಗೋವುಗಳ ಪೂಜೆಯನ್ನು ನಿಷೇಧಿಸಿ ಅಧರ್ಮಮಾರ್ಗದಲ್ಲಿ ನಮ್ಮನ್ನು ಎಳೆದೊಯ್ಯುವರು. ವಿಷ್ಣುವನ್ನು ತೊರೆದು ಚಂಡಿಕಾ, ಭೈರವ, ಬನದಾ, ಮಾರಿಗದ ಮುಂತಾದ ದೇವತೆಗಳನ್ನು ಸರ್ವೋತ್ತಮರೆಂದು ಉಪಾಸನೆ ಮಾಡಲು ಪ್ರಚೋದಿಸುವರು.

ಸರ್ವೋತ್ತಮನಾದ ನಾರಾಯಣನನ್ನೇ ಸರ್ವರೂ ಸರ್ವಕಾಲದಲ್ಲಿ ಪೂಜಿಸಬೇಕು. ಅನ್ಯದೇವತೋಪಾಸನೆ ಸರ್ವಥಾ ಮಾಡಕೂಡದು. ಸರ್ವಾಂತರ್ಯಾಮಿಯಾದ ಭಗವಂತನನ್ನು ಅರ್ಚಿಸಬೇಕು. ಆತನೇ ಸರ್ವರಿಗೂ ಫಲಪ್ರದನು.

ದುರ್ಬುದ್ಧಿರೂಪಳಾದ ಭಾರ್ಯೆಯ ವಿಷ್ಣುನೈವೇದ್ಯ, ನಿರ್ಮಾಲ್ಯಾದಿಗಳನ್ನು ನಾನು ಸೇವಿಸಲಾರೆನು. ಏಕಾದಶಿ, ವ್ರತ ನಿಯಮಾದಿಗಳನ್ನು, ವೈಷ್ಣವಚಿಹ್ನವಾದ ಗಂಧ, ಗೋಪೀಚಂದನಮುದ್ರಾದಿಗಳನ್ನು ನಾನು ಧರಿಸುವದಿಲ್ಲ. ಧರ್ಮ, ಯಜ್ಞ, ಹರಿಕಥಾಶ್ರವಣಗಳಿರುವ ಮನೆಯಲ್ಲಿ ನಾನಿರಲಾರೆನೆಂದು ಬಿಟ್ಟು ಹೋಗುವಳು.

ಯಮನ ಅವತಾರನಾದ ಸತ್ಯಜಿತನು ವಿಷ್ಣುವೇ ಸರ್ವಕರ್ತಾ ಜೀವನಿಗೆ ಸಾಮರ್ಥ್ಯವಿಲ್ಲ, ಕರ್ತೃತ್ವವಿಲ್ಲವೆಂದು ಹೇಳಲು ವಾಯುದೇವರು ಉತ್ತರಿಸಿದರು. ಭಗವಂತನೇ ಸ್ವತಂತ್ರಕರ್ತಾ ಇದು ಸತ್ಯ. ಆದರೂ ಜೀವನಿಗೆ ಜಡ ವೈಲಕ್ಷಣ್ಯವಿದೆ. ಪರಾಧೀನಕರ್ತೃತ್ವವಿದೆ. ಇದು ಶೃತಿ, ಸ್ಮೃತಿಗಳಿಂದ ಸಿದ್ಧವಾಗಿದೆ. ಆದುದರಿಂದ ಭಗವದಾಜ್ಞಾರೂಪವಾದ ವಿಧಿನಿಷೇಧಗಳನ್ನರಿತು ವಿಹಿತಕರ್ಮವನ್ನು ಆಚರಿಸುತ್ತ ನಿಷೇಧವನ್ನು ಪರಿತ್ಯಜಿಸಬೇಕು. ಪ್ರತ್ಯಕ್ಷಾದಿ ಅನುಭವದಿಂದ ಜೀವನ ಕರ್ತೃತ್ವವು ಸಿದ್ಧವಾಗಿದೆ. ಇದನ್ನು ಅಪಲಾಪ ಮಾಡುವಂತಿಲ್ಲ. ಭಗವಂತನೇ ಸರ್ವರಿಗೂ ಫಲಪ್ರದನೆಂದು ಸಮರ್ಥಿಸಿದರು. ಜಾಂಬವಂತ, ಯುಧಿಷ್ಠಿರ, ವಿದುರ, ಸತ್ಯಜಿತ ಇವು ಯಮಧರ್ಮನ ಅವತಾರಗಳು.

ಇಂದ್ರ, ಸೂರ್ಯ, ಅಗ್ನಿ, ಭೃಗು, ವಿಶ್ವಾಮಿತ್ರ, ಅತ್ರಿ, ಪುಲಹ, ಕ್ರತು, ತಾರಾ, ನಿರ್ಋತಿ ಇತ್ಯಾದಿ ದೇವತೆಗಳ ಹಾಗೂ ಬ್ರಹ್ಮಪುತ್ರರಾದ ಋಷಿಗಳ ತಾರತಮ್ಯ, ಅವತಾರ, ಕಾರ್ಯಗಳ ನಿರೂಪಣೆ, ಲೌಕಿಕವಾದ ಹರಿದ್ರಾ, ಕುಂಕುಮ, ತಿಲಕ, ಪುಷ್ಪಮಾಲಾ, ಮಾಂಗಲ್ಯ, ವಸ್ತ್ರಧಾರಣೆಗಿಂತ ಅಲೌಕಿಕವಾದ ವಿಷ್ಣು ಸರ್ವೋತ್ತಮನೆಂಬ ಕಂಠಸೂತ್ರ, ಬ್ರಹ್ಮವಾಯುಗಳೆಂಬ ವಸ್ತ್ರವನ್ನು, ಗಾಯತ್ರಿ ಎಂಬ ಹರಿದ್ರಾ, ರುದ್ರಶೇಷರೆಂಬ ಕುಂಕುಮ, ಗರುಡನೆಂಬ ಧೂಪ, ವಾರುಣಿಯೆಂಬ ಗಂಧ, ಸೌಪರ್ಣಿಯೆಂಬ ಸುವರ್ಣಾಭರಣವನ್ನು ಪಾರ್ವತಿಯೆಂಬ ಮಾಲೆಯನ್ನು ಧರಿಸಬೇಕು. ಇದರಿಂದ ಈ ಎಲ್ಲಾ ದೇವತೆಗಳ ತಾರತಮ್ಯಜ್ಞಾನ, ಇವರ ಸ್ಮರಣೆ ಅತ್ಯಾವಶ್ಯಕವೆಂದು ತಿಳಿದು ಬರುತ್ತದೆ. ಗರ್ಭದಲ್ಲಿಯೇ ಭಗವಂತನ ಸ್ತುತಿ ಭಗವಂತನ ಮಾಯಾಪಾಶದ ವರ್ಣನೆ ಸಂಸಾರದಿಂದ ಉದ್ಧಾರವನ್ನು ಪಡೆಯುವದಕ್ಕಾಗಿ ಜೀವನಿಂದ ಪ್ರಾರ್ಥನೆ, ಯೋಗ್ಯರಿಗೆ ಮಾತ್ರ ಭಗವಂತನ ಜ್ಞಾನ. ಉಳಿದವರಿಗೆ ಭೂಮಿಯ ಸ್ಪರ್ಶದಿಂದ ಮತ್ತೆ ಅಜ್ಞಾನ ವಿಸ್ಮೃತಿಗಳು, ಸಂಸಾರ ದುಃಖವುಂಟಾಗುವುದು.

ಪ್ರಹ್ಲಾದನು ಶಾಪದಿಂದ ಅಸುರಪುತ್ರನಾಗಿ ಜನಿಸಿದ, ವಾಯುದೇವರ ವಿಶೇಷ ಆವೇಶದಿಂದಾಗಿ ನಾರದರಿಗಿಂತ ಅಧಮ, ಆವೇಶವಿಲ್ಲದಿದ್ದಾಗ, ಕರ್ಮದೇವತೆ ಕಕ್ಷೆಯಲ್ಲಿ ಇರುತ್ತಾನೆ. ಇವನ ತಾಯಿ ಶುಚಿಷ್ಮತಿ. ಪ್ರಹ್ಲಾದನು ಗರ್ಭದಲ್ಲಿರುವಾಗಲೇ ಶುಚಿಷ್ಮತಿ ನಾರದರಿಂದ ಭಾಗವತಾದಿ ಸಚ್ಛಾಸ್ತ್ರಗಳನ್ನು ಕೇಳಿದ್ದಳು. ಆ ಸಂಸ್ಕಾರದಿಂದ ಬಾಲ್ಯದಿಂದಲೇ ಪ್ರಹ್ಲಾದನಲ್ಲಿ ಭಗವದ್ಭಕ್ತಿ ಜಾಗೃತವಾಗಿದ್ದಿತು. ಶಂಡ-ಮರ್ಕರ ಬಳಿ ವಿದ್ಯಾಭ್ಯಾಸ, ಹಿರಣ್ಯಕಶಿಪುವಿಗೆ ಪ್ರಲ್ಹಾದನು ಧರ್ಮವನ್ನು ಹೇಳಿದುದರಿಂದ ಕುಪಿತನಾಗಿ ಅನೇಕ ಶಿಕ್ಷೆಗಳು ಭಗವಂತನೇ ಎಲ್ಲ ಆಪತ್ತುಗಳನ್ನು ಪರಿಹರಿಸಿದ. ಪ್ರಹ್ಲಾದನು ದೈತ್ಯಬಾಲಕರಿಗೆಲ್ಲ ವರ್ಣಾಶ್ರಮಧರ್ಮ, ದೇಹದ ಅಸ್ಥಿರತೆ, ಸಾಧನೆಯ ಆವಶ್ಯಕತೆಗಳನ್ನು ಬೋಧಿಸಿದನು. ದೈತ್ಯಬಾಲಕರ ಪರಿವರ್ತನೆ, ಇದರಿಂದ ಕ್ರುದ್ಧನಾದ ಹಿರಣ್ಯಕಶಿಪು ಪ್ರಹ್ಲಾದನನ್ನು ವಧಿಸಲು ಉದ್ಯುಕ್ತನಾದನು. ಆಗ ವಾಯುದೇವರು ಪಕ್ಷಿರೂಪದಿಂದ ಬಂದು ಹಿರಣ್ಯಕಶಿಪುವಿಗೆ ಬೋಧಿಸಿದರು. ಪ್ರಹ್ಲಾದನಿಗೆ ಭಗವಂತನು ಅನುಗ್ರಹಿಸಿದ ಚರಿತ್ರೆ ವಿಸ್ತಾರವಾದ ನಿರೂಪಣೆ. ಪ್ರಹ್ಲಾದನ ನಂತರ ಅವನಿಗಿಂತ ಅಧಮಳು ಗಂಗಾದೇವಿ. ವರುಣನಿಗಿಂತ ಚಿಕ್ಕವಳಾದರೂ ಭಗವಂತನ ಪಾದದಿಂದ ಉದ್ಭೂತಳಾದುದರಿಂದ ಮಹಿಮೆಯಿಂದ ಅಧಿಕಳು. ಅವಳು ಸೀತಾ, ಅಲಕನಂದಾ, ಚಕ್ಷು, ಭದ್ರಾ ಎಂಬುದಾಗಿ ನಾಲ್ಕು ಭಾಗವಾಗಿ ಹರಿದಿರುವಳು. ಅದರಂತೆಯೇ ಇತರ ದೇವತಾಸ್ತ್ರೀಯರ ಸ್ವರೂಪ, ಅವತಾರಗಳ ನಿರೂಪಣೆ. ಕರ್ಮಾಭಿಮಾನಿ ಪುಷ್ಕರನವರೆಗೆ ಎಲ್ಲ ದೇವತೆಗಳ ನಿರೂಪಣೆಯನ್ನು ಮಾಡಿ ಕೊನೆಯಲ್ಲಿ ಭಗವಂತನನ್ನು ಸೇವಿಸುವ, ಆರಾಧಿಸುವ ಕ್ರಮವನ್ನು ತಿಳಿಸಿದ್ದಾರೆ.

ಪ್ರಾತಃ ಕಾಲ ತುಲಸಿಯನ್ನು ನಮಿಸುವಾಗ ಕೃಷ್ಣನನ್ನು, ಮೃತ್ತಿಕಾಶೌಚದಲ್ಲಿ ಕೇಶವನನ್ನು, ದಂತಧಾವನದಲ್ಲಿ ಚಂದ್ರಾಂತರ್ಗತ ಹರಿಯನ್ನು, ಮುಖಪ್ರಕ್ಷಾಲನೆಯಲ್ಲಿ ಮಾಧವನನ್ನು, ಗೋದೋಹದಲ್ಲಿ ಗೋಪಾಲಕೃಷ್ಣನನ್ನು, ಗೋವನ್ನು ಶುದ್ಧೀಕರಿಸುವಾಗ ಗೋವರ್ಧನನನ್ನು, ಶಿಶುವಿಗೆ ತಾಯಿ ಹಾಲುಣಿಸವಾಗ ಬಾಲಕೃಷ್ಣನನ್ನು, ಮೊಸರು ಕಡೆಯುವಾಗ ದಧಿವಾಮನನನ್ನು, ಮೃತ್ತಿಕಾಸ್ನಾನಕಾಲದಲ್ಲಿ ವರಾಹನನ್ನು, ಊರ್ಧ್ವಪುಂಡ್ರಧಾರಣೆಯಲ್ಲಿ ಕೇಶವಾದಿ ದ್ವಾದಶರೂಪಗಳನ್ನು, ಮುದ್ರಾಧಾರಣೆಯಲ್ಲಿ ಕ್ರುದ್ಧೋಲ್ಕಾದಿಗಳನ್ನು, ಪ್ರಾಣಾಹುತಿಗಳನ್ನು ತೆಗೆದುಕೊಳ್ಳುವಾಗ ಪಂಚಪ್ರಾಣನನ್ನು, ಶ್ರಾದ್ಧದಲ್ಲಿ ಅಚ್ಯುತಾನಂತಗೋವಿಂದರನ್ನು, ವಸ್ತ್ರಧಾರಣೆಯಲ್ಲಿ ಉಪೇಂದ್ರನನ್ನು, ಯಜ್ಞೋಪವೀತಧಾರಣೆಯಲ್ಲಿ ನಾರಾಯಣವಾಮನರನ್ನು, ಆರತಿಯ ಕಾಲದಲ್ಲಿ ಹಾಗೂ ವೈಶ್ವದೇವ ಯಜ್ಞಾದಿಗಳ ಕಾಲದಲ್ಲಿ ಪರಶುರಾಮನನ್ನು, ತೀರ್ಥಪ್ರಾಶನದಲ್ಲಿ

11

ಕೃಷ್ಣ, ರಾಮ, ವಾಸುದೇವರನ್ನು, ಜಲಪಾನದಲ್ಲಿ ಗಂಗಾಜನಕನನ್ನೂ, ಫಲಗಳನ್ನು ಭಕ್ಷಿಸುವಾಗ ಕೃಷ್ಣನನ್ನು, ತಾಂಬೂಲ ಭಕ್ಷಣೆಯಲ್ಲಿ ಪ್ರದ್ಯುಮ್ನನನ್ನು, ಪುಷ್ಪ, ತುಳಸಿಗಳನ್ನು ತೆಗೆಯುವಾಗ ಕೃಷ್ಣ-ಕಪಿಲರನ್ನು ಭಯಕಾಲದಲ್ಲಿ ನರಸಿಂಹನನ್ನು ಪ್ರಯಾಣದಲ್ಲಿ ಕೃಷ್ಣ- ತ್ರಿವಿಕ್ರಮರನ್ನು ಇತ್ಯಾದಿ ಹೀಗೆ ಅನೇಕ ವಿಧವಾದ ದೈನಂದಿನ ಕರ್ಮಗಳನ್ನು ಮಾಡುವಾಗ ಭಗವದ್ರೂಪಗಳನ್ನು ಸ್ಮರಿಸಿದರೆ ಆ ಎಲ್ಲ ಕರ್ಮಗಳಿಂದ ಪ್ರೀತನಾಗಿ ಭಗವಂತನು ಫಲಗಳನ್ನು ಕೊಡುವನು.

ಇಂತಹ ಅತ್ಯಮೂಲ್ಯವಾದ ಅನೇಕ ವಿಚಾರಗಳನ್ನೊಳಗೊಂಡ ಗರುಡಮಹಾಪುರಾಣದ ಬ್ರಹ್ಮಕಾಂಡವು ಅತ್ಯವಶ್ಯವಾಗಿ ಪಠನೀಯವಾಗಿದೆ.

ಪದ್ಮನಾಭಾಚಾರ್ಯ ಚಿಟಗುಪ್ಪ M.A.

गरुडपुराणान्तर्गतब्रह्मकाण्डस्थाध्यायानुक्रमणिका

अध्यायः-१

नैमिषारण्ये शौनकसूतसमागमः, मोक्षार्थं तत्त्वनिर्णयविषयकप्रश्नाः, नारायणस्यैवादौ नम्यत्वे कारणम्, मुख्यवायोः भगवत्प्रतीकत्वं, विष्णुप्रतिपादकानामेव श्रैष्ठ्यम्, सात्त्विकपुराणविभागः, गरुडपुराणस्य अंशत्रयनिरूपणम्, राजस-तामसपुराणविभागः, सात्त्विकेष्वपि तारतम्यकथनम्, गरुडपुराणस्य उत्तमत्वं,व्यासस्य ऋषित्वनिराकरणेन देवोत्तमत्वकथनम्, लक्ष्म्याः ईशकोटिप्रविष्टत्वकथनम्, वायोः मुख्यतः भूभारहरणे अङ्गत्वकथनम्, भीष्मद्रोणादीनां अवान्तराङ्गत्वनिरूपणम् ।

अध्यायः-२

तत्त्वाभिमानिदेवानां सृष्टिप्रश्नः, भगवतो स्वस्य रूपादीनां चाभेदः, जीवपरमात्मनोः बिम्बप्रतिबिम्बभावविवरणम्. जीवचितः स्वरूपोपाधित्वम्, प्रलये सर्वजीवानुदरे प्रवेश्य भगवतः शयनं, त्रिविधानन्त्यम्, विष्णोरेव ब्रह्मशब्दवाच्यत्वम्,, वायुविरिंचौ परस्परमविहायैव संसृतौ वसतः इति कथनम्, ब्रह्म-वायु-सरस्वती-भारती-गरुड-शेष-रुद्राणां तारतम्यकथनम्, वेदाक्षराणि यावन्ति, सार्थवेदपाठवर्णनम्, विष्णुसर्वोत्तमत्वज्ञानपूर्वकमेव वेदपठनं श्रेष्ठं, वेदेन भगवन्तं स्तुत्वा उद्बोधनप्रकारः ।

अध्यायः-३

सृष्ट्यर्थं देवस्य इच्छा, मूलरूपं, अवताराश्च प्रत्येकशः पूर्णाः, तत्त्वं विचारयतोः गुरुशिष्यभावः, प्राकृताप्राकृतविभेदेन भगवद्वीर्यकथनं, स्त्रीपुंरूपे भगवतः स्तः न नपुंसकरूपं, स्त्रीप्रतिबिम्बार्थं स्त्रीरूपं, लक्ष्मीः अनन्तानन्तरूपेण भगवन्तं पूजयति, वीर्याधानाधारभूता लक्ष्मीः न ऐन्द्रजालिका किन्तु सत्या, अनादिनित्या च, अविद्ययैव नानारूपदर्शनं, ईशजीवयोः

विरुद्धगुणवत्त्वं, कालदेशयोः परमाणुविचारः, अन्त्याणुत्वचर्चा, कालकोटिविहीनत्वं कालानन्त्यमित्यादि, भगवतः अणोरणीयस्त्वं, महतो महीयस्त्वं, पंचभेदकथनं, त्रिगुणसृष्टिः।

अध्यायः-४

प्रकृतेः त्रिगुणसृष्टिः, श्रीभूदुर्गारूपैः गुणत्रयाभिमानित्वम्, ब्रह्मणि स्थित्वा सृष्टिः, स्वयं स्थितिः, रुद्रे स्थित्वा संहारः, गुणक्षोभः, गुणवैषम्यकथनम्, दशशतादिरूपेण विभागकथनं, महत्तत्वसृष्टिः।

अध्यायः-५

अहंकारतत्त्वसृष्टिः, वैकारिकादित्रिविधविभागः, सर्वत्रापि लक्ष्म्या सह भगवान् प्रविश्य क्षोभयामास, इन्द्रिय-तन्मात्रा-भूतानामुत्पत्तिः, तत्तदभिमानिदेवानां च उत्पत्तिः, तेषां नामानि, तारतम्यकथनं, देवानां सृष्टौ कालनिरूपणं (यः यदा जातः, तदनन्तरं कः इति) द्वारपालानां विवरणम्, मनूनां तारतम्यं, बुध-स्वाहा-उषा-पुष्करादीनां तारतम्यनिरूपणं...।

अध्यायः-६

तत्तद्देवानां स्वोत्पत्त्यङ्गे स्थितिः, तदनन्तरं भगवतः स्तुतिः, लक्ष्मीकृतस्तुतिः, ब्रह्मस्तुतिः-भगवत एव सर्वस्वामित्वकथनम्, वायुस्तुतिः-लोकक्षेमार्थं भगवतोऽवतारः, स्वस्य अच्छिन्नभक्तत्वं, सर्वाऽपि भगवत्पूजा इति कथनम्, वैष्णवस्तोत्रं, अवैष्णवनिन्दा, सरस्वतीस्तुतिः-भगवन्महिमा न केनापि साकल्येन ज्ञायते इति कथनं, भारतीस्तुतिः-संसारासारत्वकथनं, वायुना स्वस्याः भगवन्महिमावबोधनकथनं, हरिवाय्वोः सर्वदा सामरस्यं, अवतारेऽपि वायोः न असामर्थ्यं, शेष-गरुड-रुद्र-वारुणी-सौपर्णी-पार्वतीकृतस्तुतिः।

अध्यायः-७

तारतम्यानुसारेण देवैः भगवतः स्तुतिः, इन्द्र-काम-आहंकारिक प्राण-शची-रति-दक्ष-बृहस्पति-अनिरुद्ध-स्वायम्भुवमनु-वरुण-नारद-भृगु-अग्नि-प्रसूति-

वसिष्ठ-मरीचि-अत्रि-अङ्गिरस्-पुलस्त्य-पुलह-क्रतु-वैवस्वतमनु-विश्वामित्रकृतस्तुतिः ।

अध्यायः-८

मित्र-तारा-निर्ऋति-प्रावही-विष्वक्सेन-अश्विनौ-गणपति-कुबेर-अग्निव्यतिरिक्तसप्तवसु-मूलरुद्रादृते दशरुद्र-मरुद्गण-विश्वेदेवाः-ऋभुगण जयाद्याः-पावक(अग्निपुत्र)-एकादशमनु-सप्तपितरः-च्यवन-उतथ्य-बल्यादयः-गन्धर्वाष्टक-प्रह्लाद-पर्जन्य-श्यामला-रोहिणी-संज्ञा-उषा(विराट्)(अनिरुद्धपत्नी)-स्वाहा-बुध-उषा(नामाभिमानि)-शनि-पुष्कर-आजानज देवैः कृता भगवत्स्तुतिरीतिः ।

अध्यायः-९

आजानजदेवतानामकथनं, गन्धर्वनाम, ऋषिनाम, पितृ, गन्धर्व, सर्वेषां देवादीनां भगवत्स्तुतिकथनं-तत्फलश्रुतिः ।

अध्यायः-१०

क्षोभानन्तरं ब्रह्माण्डसृष्टिः, ५० कोटिविस्तीर्णब्रह्माण्डं, तदुपरि ५० कोटिविस्तीर्ण आवरणं, आवरणनिरूपणं, जल-तेज-वायु-आकाश-अहंकार-महत्-गुणत्रय-अव्याकृताकाश-तत्रस्थविरजानदी-तत्स्वरूपकथनं, ब्रह्मणा सह मुक्तियोग्यानां स्नानं, ऋजुयोगिनां स्वरूपं, तेषां द्वात्रिंशत् लक्षणानि अन्येषां न्यूनत्वकथनं, ऋजूनां प्रारब्धं, रुद्रस्य, इन्द्रस्य च, आरब्धक्षयः, ब्रह्माण्डान्तर्गता सृष्टिः वैकृता इति कथनं, जगतः सत्यत्वं, विष्णोरेव सर्वोत्तमत्वं, तज्ज्ञानान्मोक्षः ।

अध्यायः-११

भगवतः अण्डोदके नृणां सहस्रवर्षपर्यन्तं स्वापः, श्रीः श्रुतिरूपेण स्तौति, द्वे अजे प्रकृती, (जीवाच्छादिका परमाच्छादिका इति) जीवब्रह्मभेदः, भगवतो आयुधद्वैविध्यं-भिन्नाभिन्नत्वरूपेण, स्वप्नसुषुप्तिकीर्तनम्, भयादिकं अज्ञानकार्यं,

ब्रह्मणो न भयादि किं तु विष्णुप्रीत्यर्थं, आलोचने सर्वविषयकत्वं,नाडीप्रवेशः तत्र विष्णोरन्वेषणम् ।

अध्यायः-१२

कमलनालस्थब्रह्मणः अन्वेषणं, भगवन्महिमायाः दुरधिगमत्वकथनं, ''तप'' शब्दश्रवणं, दिव्यसहस्रवर्षं तपः, भगवतः प्रादुर्भावः स्तुतिश्च, भगवतः अप्राकृतविग्रहवत्त्वं, चतुर्मुखब्रह्मभोग्यं सर्वमपि विष्णुभोग्यमेव, ऋजूनां सुस्पष्टज्ञानं, ऋजूनामनादितः परोक्षज्ञानं पूर्णं, ब्रह्मणस्त्वंशरूपेषु भारत्याः......इच्छाव्यक्तिः प्रायशो मारुतस्य इत्यादि, विष्णोः मूलरूपेषु अवतारेषु च छेद-भेद-मोह-क्लेशाद्यभावः, विष्णोरितरदेवैः अभेदचिन्तनं अनर्थप्रदं, कलिभिन्नदैत्यानां शतवर्षानन्तरं कलिना सहैव वायोर्गदाप्रहारेण तमसि प्रवेशः, दुर्योधन-अलक्ष्मी-जरासन्ध-हिरण्याक्ष-हिरण्यकशिपु-मणिमान्-बक-बाण-शम्बर-हिडिम्ब-कीचक-द्वापर-धेनुक-केशी-त्रिरिक-पौरुक-कंस-कुम्भकर्ण-इन्द्रियाभिमानिदैत्यानां-स्वरूपतारतम्यकथनं, रुद्रादयः भगवदिच्छया कदाचित् विरुद्धतत्त्वं प्रतिपादयन्ति, वायोस्तु कदापि नेति अच्छिन्नभक्तत्वकथनं, तथापि मयि अनुगृहाणेति चतुर्मुखस्य प्रार्थनम् ।

अध्यायः-१३

चतुर्मुखस्तोत्रेण प्रीतः नारायणः देवतासृष्ट्यर्थं ब्रह्माणमादिदेश, सृष्ट्या भगवतः न किमपि प्रयोजनं, वायु-भारती-शेष-रुद्र-गरुड-सौपर्ण्यादि इन्द्रियमानिदेवानां-तत्त्वाभिमानिदेवानां-पुष्करपर्यन्तं सर्वदेवानां तत्तत्काले संवत्सरे (यस्य यदा, यदनन्तरं यस्य इत्यादि) काल-योग्यता-तारतम्यपूर्वकं सृष्टिप्रकारविवरणम् ।

अध्यायः-१४

विष्णोः अवताराणां, भगवदवयवानां च प्रत्येकशः अनन्तत्वं (नख, पाद, केश, रोम, स्कन्ध, बाहु, इत्यादि) सर्वपदार्थस्य सारभोक्तृत्वं विष्णोः,

फलानां, पुष्पाणां, तैलादीनां, सारभोक्तृत्वं विष्णोः, वैश्वदेवविहीनान्नस्य निन्द्यत्वं, विविधफल, अन्नादीनां पुष्पाणां च कालभेदेन सारासारत्वनिरूपणं, मासभेदेन केषांचित्पदार्थानां असारत्वकथनं, मल्लिकादिपुष्पाणां शाकानां, पत्रशाकानां च सारासारत्वकथनं, एकादश्यादिषु विहिताविहितकथनं च ।

अध्यायः-१५

भगवदवताराणां कीर्तनं-वासुदेव,संकर्षण, प्रद्युम्नानिरुद्धरूपाणि, षोडशकलाः (ज्ञान,कर्म-इन्द्रिय, भूतपंचकं, मनश्च), सनत्कुमार, वराह, महिदास, नारायण, कपिल, दत्त, यज्ञ, ऋषभ, कूर्म, धन्वन्तरि, मोहिनी, नृसिंह, वामन, परशुराम, वेदव्यास(चतुर्वारं), राम, वेदव्यास(२८ महायुगे), कृष्ण, बुद्ध, कल्कि । केशवादि, सङ्कर्षणादि, विश्वादिसहस्र, परादिरूपेषु अत्यन्तमभेदः नाणुमात्रं भेदश्चिन्तनीयः ।

अध्यायः-१६

लक्ष्म्याः नानारूपाणि, अवताराश्च, जया, माया, कृति, शान्ति, दुर्गा, भू, अन्नपूर्णा, दक्षिणा, जयन्ती, जानकी, रुक्मिणी, सत्यभामादिकाः, विरिंचस्य- विरिंच, महान्, विधि, चतुर्मुखरूपेण चत्वारोऽवताराः वायोः- प्रधान, सूत्र, धृति, स्मृति, (श्वेतद्वीपस्वामिनः स्मृतेः)मुक्ति, चित्त, बल, यष्टृ इत्यादिरूपाणि, अनादिकालादारभ्य वक्रताभावात् ऋजुत्वं, वक्रत्वं नाम काम्यकर्मकरणं, कदाचिद्रुद्रादीनां तदस्ति, शिलादय एव विष्णुरिति ज्ञानं विपरीतं, प्रज्ञा, ज्ञानं, महाध्याता, विज्ञ (विज्ञान), विराग, सुखेत्यादि वायो रूपाणि, देवानां निरयो नास्ति, असुरावेशादेव दुःखादिकं, मनुष्य-ऋष्यादीनां च कलिबलादेव पापकर्मादि, वायोः अवतारत्रयं-द्वितीयरोचनाख्यः इन्द्रः, रामावतारे-हनूमान्, कृष्णावतारे-भीमः, कलौ मणिमान् संकररूपेण वेदादिशास्त्रदूषकः भवति तदा पूर्णप्रज्ञरूपेण अवतीर्य भगवन्मतस्थापनं करोति(मध्वावतारः), गर्भवासादिदुःखाभावः, शुक्लशोणितसम्बन्धाभावः,

अवतारकाले पूर्वं गर्भं समाशोध्य तत्र प्रवेशः, सर्वेष्वप्यवतारेषु ज्ञानानन्दादयः पूर्णाः (२३ रूपाणि) । वाण्याः अवतारत्रयं-ब्रह्माणी, सावित्री, सरस्वती । भारत्याः अवताराः-सर्ववेदात्मिका, भुजि, श्रद्धा (रोचनेन्द्रभार्या), हनूमदवतारे शिवकन्या, दमयन्ती, इन्द्रसेना, नमनन्दिनी, काली, द्रौपदी, (शच्यादियुता), मध्वावतारे कालटीग्रामे संकरगृहे कन्या भविष्यति- कन्यारूपेणैव वासः ।

अध्यायः-१७

द्रौपदीनिर्णयः, वायोः धर्मजादिषु वीरादिरूपेण आवेशः । सुराणां भोगः मानुषभोगविलक्षणः ।

अध्यायः-१८

पुरुषाख्यविरिंचानन्तरं शेषोत्पत्तिः, भगवच्छय्यात्वं, गायत्री भारतीभ्यां शतगुणावरत्वं, लक्ष्मण, शुक्लकेशावेशेन बलराम इति अवतारद्वयम् । गरुडस्य नावतारः, रुद्रस्यावताराः-सदाशिवः-दशकल्पं लवणाम्भसि तपः, शुकः-दूर्वासाः-द्रौणि-वामदेव-अघोर-सद्योजात-और्वरुद्रकृतस्तुतिः, नैवेद्यशेषभोगस्य महिमा ।

अध्यायः-१९

विरिंच-वायु-वाणी-भारतीनां तारतम्यानुगुणं भक्तिज्ञानबलादयः, भगवतः निरतिशयज्ञानबलादिकं, तदनन्तरं लक्ष्म्याः, भगवद्विषये न सर्वविषयकत्वं, चतुर्मुखादपि वाण्याः अल्पं, ततोऽल्पं शेषादीनां तमोगुण-अहंकार, बुद्धितत्त्व, भूततत्त्वादिषु यथायोग्यं ततोऽधमाः देवाः हरिं पश्यन्ति, केचिद्धृदये इत्यादिकथनं, नीला हव्यवाहपुत्री कृष्णमेव पतिं कामयाना । तस्याश्चरितं, कलौ युगे दुर्लभानां पदार्थानां कीर्तनं-शालग्राम-गो-अतिथि-तीर्थ-क्षेत्रादि....अतः कृष्ण एव पतिर्भूयात् इति तस्या इच्छा, दिव्यसहस्रवर्षं तपः, नारायणस्य प्रत्यक्षत्वं, भगवतः सङ्ग एव मुक्तिप्रदः अन्यत्सर्वं त्याज्यं, भगवानेव पतिर्भूयात् इति प्रार्थना, कृष्मजन्मनि संस्कारात्पूर्वं भार्याऽभवत्,

तदर्थं तां तनुं विसृज्यं अन्यजन्मनि कुम्भकगृहे जन्म, श्रीकृष्णेन साकं विवाहश्च ।

अध्यायः-२०

भद्रा-मित्रविन्दयोः विवाहः । भद्रायाः पिता नलः गात्रपीडां कुर्वन्तीं ता दृष्ट्वा किमर्थमेतदिति पृष्टे भगवदर्थमेव सर्वं अङ्गादिकं विनियोक्तव्यं अन्यथा यमलोकार्थं प्रयोजनमिति सुदीर्घं जिह्वा, हस्त, पाद, वदन, शिरः, कर्णानासिकादीनां सार्थक्यकथनं, तदनन्तरं तां तनुं विसृज्य देहान्तरे भद्रारूपेण जन्म तत्र श्रीकृष्णेन सह उद्वाहः ।

मित्रविन्दायाः पूर्वजन्मवृत्तान्तः-भगवत्प्राप्तौ साधनं श्रवणं-तस्य विस्तरशः महिमा, भागवत, विष्णुगरुडपुराणानां अवश्यं श्रोतव्यत्वं, कर्णयोः हरिकथालाप एव भूषणं, धनार्जनादौ व्यर्थं न कालो यापनीयः, कर्मानुसारेण सर्वं भगवानेव ददाति इत्याद्युक्तिः, तद्देहत्यागः, अन्यजन्मनि वसुदेवभगिन्यां मित्रविन्दानाम्ना जनिः, स्वयंवरे श्रीकृष्णेन सह विवाहश्च ।

अध्यायः-२१

कालिन्दीविवाहः-सूर्यपुत्री यमुनानुजा कालिन्दी कृष्णपत्नीत्वकामेन तपश्चकार. तदा श्रवणं न भगवन्महिमाश्रवणे सक्तं, नेत्र, घ्राण, त्वक्, पादादिकं न हरिसेवायां आसक्तं, विष्ण्वर्पितवस्तुजातं संसारे कदापि न स्वीकृतं, मित्रपुत्रकलत्रादयः केवलं संसारसुखभोगायैव कारणीभूताः न भगवन्महिमावबोधाय इति तेषा त्याज्यत्वं, एवं विचार्य तपसि क्रियमाणे कृष्णस्तामुवाह । तया न कोऽपि लाभः कृष्णस्याप्तकामत्वात्, ब्रह्मरुद्रशिवादिकाः तस्मादवराः इति विवरणम् ॥

अध्यायः-२२

लक्षणाविवाहः- सुलक्षणैः संयुता भगवानेव पतिः स्यात् इति तपश्चकार, द्वात्रिंशल्लक्षणानां सुदीर्घं वर्णनं, प्रत्येकशः तेषां कीर्तनं, विष्णु-रमा-

ब्रह्मभारतीनां द्वात्रिंशल्लक्षणवत्त्वं-तदन्येषां रुद्रादीनां अष्टाविंशदारभ्य ऊनलक्षणवत्त्वकथनं चक्रवर्तिपर्यन्तं क्रमादूनलक्षणनिरूपणं।

द्वात्रिंशद्दोषाणां सुदीर्घं निरूपणं, प्रत्येकशः तेषां कीर्तनं, कलेः समग्रदुर्लक्षणयुतत्वकथनम्, रुद्रादीन् आरभ्य यस्य यस्य यद्यद् दुर्लक्षणं तस्य तस्य कीर्तनम्।

पितृगृहे वर्तमाना लक्षणा पितृदत्तं सर्वं भगवति निवेद्य स्वीकरोति स्म, पुत्र, मित्र, शालक, गो, अश्व, गजब्राह्मणादिषु स्थितस्य भगवतः रूपवर्णनं (नामनिर्देशः) तं देहं विसृज्य अन्यजन्मनि मद्रपुत्रीत्वेन जनिः, स्वयंवरे तस्याः कृष्णेन सह परिणयः।

अध्यायः-२३

जाम्बवतीविवाहः-पूर्वजन्मनि सोमपुत्री बभूव, इतरापेक्षया तस्याः श्रैष्ठ्यं, लक्ष्म्याः विशेषसन्निधिः, पितुर्गृहे वर्धमाना सा भागवतादिपुराणश्रवणं, सदा भक्तिपुरःसरं प्रातरारभ्य रात्रिप्रभृति विष्णुपूजनं, ऊर्ध्वरेताः- भूत्वा तीर्थयात्रां चकार। तीर्थयात्रामहत्त्ववर्णनं, निष्कामतयैव कर्तव्यं, वाहन, पादत्राणादिसहितयात्रा न समग्रफलप्रदा, तीर्थयात्रायां परान्ननिषेधः, यात्रायां दिवारात्रौ सर्वदा हरिमाहात्म्यश्रवणं विधेयं, पुण्यक्षेत्रदर्शनात्पापनाशः, श्रीनिवासस्य दर्शनं कदा भवेत् इति सोत्कण्ठं स्तुतिः, शेषाचले श्रीनिवासस्य दर्शनं, शेषाचले एकैकं सोपानमारुह्य पुरतः शालग्रामं निधाय नमस्करणं, मध्ये भागवतादिसच्छास्त्रश्रवणम्।

अध्यायः-२४

वेंकटाचलस्य महिमावर्णनम्- जैगीषव्येन वर्णनं, सोपानारोहणवैशिष्ट्यं, सोमपुत्री जैगीषव्यं प्रति पुनः तन्महिमानं पप्रच्छ, जैगीषव्यः भगवदपरोक्षप्रकारमाह, अनन्तसूर्याधिककान्तिमत्त्वेन ब्रह्मणः रुद्रादीनां लक्षाधिकत्वेन इन्द्रादीनां सहस्राधिकत्वेन, मानुषाणां विद्युद्वत्, ऋषीणां

चन्द्रवत् इत्यादि। नवविधद्वेषनिरूपणं, भक्तानां कीर्तनं, प्रह्लाद,नारद,अम्बरीष, मुचुकुन्दादयः लक्ष्मीवायुसरस्वत्यः अच्छिन्नभक्ताः रुद्रादयः देवा विश्वामित्रादयः मान्धातृप्रभृतयः, भागीरथ्यादयश्च, विष्णु, ब्राह्मण, गंगा, तुलस्यादीनां नमनप्रकारः, ब्रह्मादिनामानि तत्तद्देवानां विष्णुः ददौ, श्रीनिवासशब्दार्थविवरणं, केशव, नारायणगोविन्दशब्दनिर्वचनक्रमः, जैगीषव्याय सोमपुत्री श्रीनिवासस्य सविधे विद्यमानतीर्थाणि अवलम्ब्य पप्रच्छ, विस्तरेण जैगिषव्यस्तेषां तीर्थाणां नामानि, महत्त्वं च प्रत्यपादयत्, विस्तारेण पीठदेवतास्थानं, नामसंकीर्तनं च, आवरणदेवतानामादिकं स्थानकीर्तनं च, एवमुक्ता सोमपुत्री श्रीनिवासं द्रष्टुं जगाम।

अध्यायः-२५

स्वामिपुष्करिणीमहत्त्वं, तत्र स्नात्वा श्रीनिवासं सोमपुत्री अन्याः कन्याश्च ददृशुः, श्रीनिवासरूपवर्णनं, तासां स्तुतिश्च, द्रव्यपुत्रमित्रकलत्रादिषु क्रियमाणं कामादिकं निराकृत्य त्वय्येव मनः देहि इति प्रार्थना, प्रसन्नः श्रीनिवासः सबीजाक्षरमन्त्रं ददौ, ततः सा तं जप्त्वा स्वामिसरसि ब्राह्मणान् भोजयामास, स्वां कृतकृत्यां मेने, देवैः पुष्पवृष्टिः, मन्त्रार्थं, महिमां च जैगीषव्य उवाच ॐ नमो वेंकटेशाय ॐ वेंकटश-व्यंकटेशशब्दस्य च विस्तारेण निर्वचनं, रात्रौ निद्रानन्तरं प्रातः उत्थाय सुप्रभातस्तोत्रकरणं नदी-देवता-ऋषि-राज-वन-वृक्ष-सिन्धु-पुष्प इत्यादयः सर्वे कुर्वन्तु सर्वे मम सुप्रभातम्। ततः व्यङ्कटेशं स्मृत्वा पुष्करिण्यां स्नानार्थं जैगीषव्येण सह गमनम्।

अध्यायः-२६

सोमपुत्री-श्रीनिवासः कुतः आगतः, शेषाचलस्य आगमनं, स्वामिपुष्करिणीविषये पप्रच्छ । जैगीषव्य उवाच-सनकादिभिः शप्तौ जयविजयौ हिरण्याक्षहिरण्यकशिपुरूपेण जातौ. अष्टवर्षः हिरण्याक्षः तपस्तप्तुं इयेष माता रुरोध, तदा देवावेशात् मात्रे तत्त्वमुपदिदेश, पुनः असुरावेशात् तपस्तप्त्वा

ब्रह्माण्डं जले स्थापयामास, वराहः तं हत्वा भुवं उद्धार, तदा शेषाचलस्थापनवर्णनं शेषाचलस्य माहात्म्यवर्णनं,(तस्य नानानामवत्त्वं तस्य सार्थक्यं च) स्वामिपुष्करिणीमध्ये श्रीनिवासः सन्निहितः, सार्धत्रिकोटितीर्थसन्निधानं तत्रास्ति, स्नानमात्रेण पापविमुक्तिः सद्गतिश्च, स्वामिपुष्करिणीपरितः नानाविधतीर्थजातं तेषां नामानि, परिमाणं, स्नानात्फलप्राप्तिः इत्यादीनां वर्णनं, (वायुतीर्थ-मध्वतीर्थ-चन्द्रतीर्थ-रौद्रतीर्थ-ब्रह्मतीर्थ-वह्नितीर्थ-नैर्ऋततीर्थ-वरुणतीर्थ-इत्यादि) तत्र स्नानं, भागवतश्रवणे च कृते महाफलं, वस्त्र,द्रव्य,शालग्राम,गोदानादिभिः महत्पुण्यं, शालग्रामलक्षणानि, तत्र तीर्थे दानान्महापुण्यावाप्तिरिति कथनम् । जनार्दनशालिग्रामलक्षणं, दधिवामनशालग्रामलक्षणं, भूवराहशालग्रामलक्षणं, नृसिंहशालग्रामलक्षणं, लक्ष्मीनारायणशालग्रामलक्षणं, सीताराम-शालग्रामलक्षणं, वासुदेवशालग्रामलक्षणं, पट्टाभिरामशालग्रामलक्षणं, पुरुषोत्तमशालग्रामलक्षणं, अनन्तपद्मनाभशालग्रामलक्षणं, विश्वम्भर-शालग्रामलक्षणं, मत्स्यशालग्रामलक्षणं, शिंशुमारशालग्रामलक्षणं, त्रिविक्रमशालग्रामलक्षणं, एवं जैगीषव्येण पुष्करिणीमहिमावर्णनम्॥

अध्यायः-२७

पापविनाशिनीतीर्थमहिमा-सोमपुत्री जैगीषव्यविप्रं तीर्थमहिमाप्रश्नं पप्रच्छ तदा जैगीषव्यः- ब्रह्महत्यादिपापनिवारणं अस्यां स्नानेन भवति, ब्रह्महत्या, सुरापान, स्वर्णस्तेयादिपापनाशः, तत्र स्नात्वा पुनः कुमारीतीर्थं प्राप, तस्य महिमावर्णनं, तत्र च स्नात्वा भक्त्या वेंकटेशस्य अंगप्रदक्षिणं चक्रे । ततः परदिने तुम्बुरुतीर्थं प्राप, तस्य महिमा, तुम्बुरुणा साकं नारदः अत्र तपश्चक्रे, विष्णोः प्रादुर्भावः, ततः कपिलतीर्थं, पञ्चायुधतीर्थं, ब्रह्मतीर्थं, ऋषितीर्थं इत्यादिषु सस्नौ । तदनन्तरं तां तनुं त्यक्त्वा जाम्बवतः पुत्री बभूव । इत्थं वेंकटगिरिमहिमावर्णनम् । अत्र नैवेद्यस्वीकारविचारः, स्वस्य प्राशस्त्याभावे गुडादिग्रहणम्।

अध्यायः-२८

पार्वत्या अवतारः, वारुण्यां लक्ष्मीसन्निधानं, अतः शुक्लकेशावेशयुतस्य बलभद्रस्य पत्नीत्वं, (रेवती) सौपर्णी एतास्तिस्रः षम्महिषीभ्यः द्विगुणाधमाः रुद्रादिभ्यः दशगुणाधमाः, कुत्रचित् जाम्बवत्याः श्रैष्ठ्यं, कुत्रचन शेषादवरत्वं तस्य सन्देहस्य परिहारः, चतुर्दशसु इन्द्रेषु सप्तमस्य पुरन्दरस्य नामनिर्वचनं, षष्ठस्य मन्त्रद्युम्नस्य निर्वचनं उभावप्येकः, गाधि,विकुक्षिशब्दार्थविवरणं, कुशशब्दार्थः, मन्त्रद्युम्न, पुरन्दर, गाधि, वालि, अर्जुन, विकुक्षि,कुशाः एते समाः, कृष्णपुत्रः प्रद्युम्नः भरतः अभवत्, भरतशब्दनिर्वचनं, चक्राभिमानी कामः-साम्बः, सुदर्शन-भरत-प्रद्युम्न-साम्ब-सनत्कुमारस्कन्दाः समानाः, इन्द्रकामौ उमादिभ्यो दशगुणावरौ तयोरपि कामः इन्द्राधमः, आहंकारिकप्राणः कामेन्द्राभ्यां दशगुणाधमः, अनिरुद्दः-शत्रुघ्नः, प्रद्युम्नपुत्रः-अनिरुद्धः(सङ्कर्षणाविष्टः) रतिः-रुग्मवती, लक्षणा(दुर्योधनपुत्री) द्विरूपा, बृहस्पतिः -तारः (वानरः), द्रोणः, उद्धवः त्रयोऽवताराः शची-तारा(वालिपत्नी), चित्राङ्गदा, इति द्विरूपा, मन्त्रद्युम्नभार्या-पुलोमजा, गाधिभार्या, कौशिका, विकुक्षिभार्या, वसुमती, कुशभार्या, कान्तिमती एताः शच्याः अवराः

शची-रति-अनिरुद्ध-मनु-दक्ष-बृहस्पति एते अहंकारात् दशाधमाः, प्रवहवायुः-कोणाधिपः-नासिक्यः-अतिवाहिकः एकः एव दक्षादिभ्यः पंचगुणाधमः। प्रवहशब्दस्य सार्थक्यं, जीवः परमात्मा च सत्यः भेदश्च सत्यः पंचभेदः, श्रोत्र,नेत्र,शिश्न,रसना, इत्यादीनां इन्द्रियाणां दुष्टवस्तुषु संगनिरूपणं, बुद्धिद्वयं (दुष्टा-सुष्ठु इति)बुद्धिद्वयस्य व्यापारनिरूपणं, (ज्येष्ठादेवीपूजाकरणं) क्षुद्रदेवाराधनं कुर्विति दुष्टबुद्ध्या प्रेर्यते जीवः । तन्निन्दा सुष्ठु बुद्ध्या विष्णुरेवोपास्य इति उच्यते । (अत्र ज्येष्टादेवी-शेष-विनायकादीनां पूजा निन्दिता वर्तते तत्कथं योजनीयं इति विचारणीयम्।)

अत्रेदं अवधेयम्-रामतत्त्वप्रकाशनपुस्तके ३९तमेन श्लोकेन २९ तमः अध्यायः समाप्तः तदनन्तरं अग्रिमश्लोकेन ३० तमः अध्यायः प्रारब्धः। ३० तमे अध्याये ११७ श्लोकाः विद्यन्ते।

अध्यायः-३१

ब्रह्मणः पुत्रः सूर्यपुत्रो यमो जातः, तस्यैव सत्यजिदिति नामान्तरं, सत्यजिदवतारे विष्णुमुद्दिश्य दिव्यसहस्रवर्षपर्यन्तं तपःकरणं, तत्तपोविघाताय कलिभार्या दुर्बुद्धिरागता, तया भगवतः निर्माल्यस्रग् धूपनैवेद्यादीनां एकादशी मुद्राधारणादीनांनिन्दनेन तद्ब्रह्त्यागः, तपसा तुष्टानां रुद्रेन्द्रवायूनामागमनं, सत्यजित् विष्णुरेव कर्ता जीवस्तु फलभोक्ता अतः सर्वत्र क्षमैव परमो धर्मः इति प्रत्यपीपदत्, तदा वायुना विष्णोरेव कर्तृत्वं तथाऽपि जीवस्यापि पराधीनकर्तृत्वं अंगीकार्यम्, तेनैव विधिनिषेधशास्त्रसार्थक्यं, अज्ञो दैवमित्येव मत्वा सर्वं परित्यजति इत्यादि समर्थनं, तदा प्रसन्नो विष्णुः सत्यजितं अनुगृह्य इन्द्रपदं ददौ। यमस्यावताराः सत्यजित्-जाम्बवान्-विदुरः युधिष्ठिर- इति चत्वारः। सूर्यः-रामावतारे सुग्रीवात्मना, कृष्णावतारे कर्णात्मना बभूव, वरुणस्य मण्डूक,वसुषेण, महाभिषक् शन्तनुरूपेण, चत्वारोऽवताराः मण्डूकरूपिणा वरुणेन विश्व-तैजस-प्राज्ञ-तुरीयात्मना-चतुर्धावस्थितस्य भगवतो वर्णनम्-तदेव माण्डूकोपनिषन्नाम्ना प्रसिद्धं, मण्डूकसुषेणादिशब्दानां अर्थनिर्वचनं अवतारकारणनिरूपणं च।

अध्यायः-३२

चतुर्मुखब्रह्मणो नारदजन्म नारदशब्दनिर्वचनं, नारदेन नरके पापच्यमानानां नानाविधपापिनां दर्शनं, एकादश्यादिभोजनादिना दुःखादिकं, शालिग्रामादीनां अपूजनेन, महामन्त्रादीनां जपाभावेन दुःखभोजिनां दर्शनं, भगवन्नाम्नो महापातकनाशनशक्तत्वेऽपि तस्यापठनेन लभ्यमानदुर्गतिवर्णनं, हरिनामस्मरणप्रकारबोधनं, अवैष्णवत्वेऽपि साध्वीकन्याग्रहणं, कदाप्यवैष्णवाय

वैष्णवकन्याप्रदानं न कार्यम्, कन्याविक्रयदोषकथनं, सप्तविक्रयिणां चण्डालत्वं, मोक्षार्थं हरिनामैव तारकमिति वर्णनम् ।

अध्यायः-३३

वह्निस्वरूपकथनं, तस्यावतारत्रयं-रामावतारे नीलनाम्ना वानररूपं, रामपुत्रत्वेन लवनाम्ना जन्म । कृष्णावतारे ध्रुष्टद्युम्नात्मना अवतारः । भृगुः पादप्रहारदोषेण व्याधो बभूव, भृगुशब्दार्थवर्णनं, विष्णुसर्वोत्तमत्वे विवादे सति भृगुणा रुद्र-ब्रह्म-विष्णुसमीपगमनं, क्रोधेन शापाय प्रवृत्तः पार्वत्या वारितश्च, भृगुमागतं अजानन्निव अजः स्थितः, भृगुः क्रोधाद्धन्तुं ययौ तदा ब्रह्मा क्रोधं शमयामास ।। ततः विष्णुं दृष्ट्वा भृगुः पादतलेन तताड । तदा विष्णुः निर्विकारः सन् ब्राह्मणानां माहात्म्यं लक्ष्म्यै सविस्तरं न्यरूरुपत्, क्षमायाचनेन लज्जितो भृगुः निवृत्तः सभायां विष्णोः सर्वोत्तमत्वं प्रत्यपादयत्, ब्रह्मशिवयोः क्रमादवरत्वं प्राख्यापयत् । कृष्णावतारे कृष्णपुत्रसाम्बस्य गर्भिणीवेषधारणेन वंचनसमये विप्रशापप्रभावेन मुसलेन यादवमरणं, तदा जराव्याधः श्रीकृष्णं मुसलस्थायसेन ताडयामास, पश्चाद्भक्त्या प्रायश्चित्तेन पूतश्च ।

अध्यायः-३४

विश्वामित्र-वसिष्ठ-मरीचिमुनीनां जन्म, तच्छब्दनिर्वचनं च, अत्रेः ब्रह्मणो नेत्राज्जन्म, जन्मानन्तरमेव अत्रिणा भगवदाराधनं वाय्वादीनां परीक्षार्थं आगमनं, तदा अत्रिः विष्णुरेव मम रक्षकः, वामन-व्यास-धन्वन्तरि-नृसिंह-भार्गवादिरूपेण तत्तद्देशे काले च सर्वान् रक्षति इति कथयति ।

त्र्यम्बको वृको भूत्वा अत्रिमत्तुं आजगाम तदा वायुः श्वानरूपं धृत्वा ररक्ष । शेषः सर्पः सन् भीषयामास तदा सरोजयोनिः गरुडरूपं स्वीकृत्य पक्षवातेन विशीर्णितवान् । आनन्दनामकहरिणा त्रातत्वात् तस्य अत्रिरिति नामसार्थक्यं । अंगिर-पुलह-पुलस्त्य-क्रतुप्रभृतीनां चतुर्मुखाज्जन्म, तत्तच्चब्दनिर्वचनं, तेषां तारतम्यनिरूपणं च ।

अध्यायः-३५

द्वादशादित्येष्वेको मित्रः कश्यपपुत्रः कृष्णावतारे राह्वंशयुक्तः भीष्मको नाम राजा बभूव, मित्रपुत्री गुरुभार्या तारा द्रोणभार्या कृपिसंज्ञा बभूव, स्वपातिव्रत्यात् चन्द्रसंगाद्दोषयुक्ताऽपि पंचकन्यासु स्मरणयोग्या । प्रवहपुत्रो निर्ऋतिः रामावतारे दुर्मुखो नाम वानरः, कृष्णावतारे घटोत्कच इति च जातः भानुपुत्री प्रवहभार्या प्रावही वैष्णवस्त्रीधर्मान् बोधयामास । रेणुका-शूद्रादिस्थापितवायुप्रतिमा इत्यादीनां पूजनं नैव कार्य, सर्वोत्तमाख्य गलसूत्रं, कथाख्याभरणं, लक्ष्म्याख्यकेशं, गायत्र्याख्यहरिद्रां, गरुडाख्यधूपं, पार्वत्याख्यमालां, सौपर्ण्याख्यसुवर्णं, वारुण्याख्यगन्धं धार्यम्। लौकिकधूपादीनां अग्राह्यत्ववर्णनं च । तारतम्यज्ञानविधुराणां स्त्रीणां निन्दनं निर्ऋति-मित्र-तारा-प्रावहीनां साम्यं इतरदेवतातारतम्यकथनं च ।

अध्यायः-३६

वायुपुत्रः विष्वक्सेनः नारायणस्य पार्षदः स्वपतिविनायकतुल्यः, अश्विनौ, गणपतिः, वित्तपश्च मित्रादिभ्योऽधमाः, शतसंख्याकदेवानामुल्लेखः, वस्वष्टकं, रुद्रैकादशकं, अजैकपाद-भूरिः, अहिर्बुध्नः-भूरिश्रवाः, विरूपाक्षोऽश्वत्थः (कृष्णभक्तः) विष्कम्भः-कृपः, पत्रतापाख्यः-सोमदत्तः, स एव जरासन्धसुतः (सहदेवः) मूलरुद्रः-भवः । द्वादशादित्याः । सविता सत्यवत्यां कृष्णाज्जातः नाम्ना भानुः, त्वष्टा वीरसेनः (यमाविष्टः) दशप्राणाः । परावहः-पाण्डुः, सौम्यः- विपृथुः, अपानः-गवाक्षः,व्यान-गवयः, उदानः-वृषः,समानः - गन्धमादः सवत्रात इति च । कूर्मः-कुन्तिभोजः । दश विश्वेदेवाः । तन्नामानि तेषां कार्यं च । पाण्डवपुत्रतया जन्म, अश्विनौ रामावतारे मैन्दविविदौ, कृष्णावतारे नकुलसहदेवौ, ।शतस्थदेवविषये गरुडप्रश्नः, श्रीकृष्णसमाधानं च। तारतम्यज्ञानस्य दौर्लभ्यकथनं, वेदादिज्ञानवतोऽपि तारतम्यज्ञाने निष्फलत्व, शतस्थदेवतारतम्यकथनम् ।

अध्यायः-३७

जयविजयादयोऽष्टौ द्वारपाः, तन्नामानि, तत्त्वाभिमानिदेवावरत्वं, मातृगर्भस्थजीवानां दुःखित्वकथनं, तत्रापि ऋषिदेवतामानवभेदात् दुःखनिरूपणं, दैत्यानां गर्भवासदुःखवर्णनं, देवादिजीवस्य गर्भे भगवत्स्तुतिप्रकारवर्णनम्, संसारस्य असारत्वकथनम्।

अध्यायः-३८

भृगुपुत्रः-च्यवनः, बृहस्पतिपुत्रः-उचथ्यः तयोर्नामसार्थक्यं, चतुर्दशमनूनां नामानि तन्निर्वचनं च, सप्त पितरः कर्मदेवाः गन्धर्वाष्टकं च जयादिभ्योऽधमाः। प्रह्लादः कर्मदेवसमः। विस्तरेण प्रह्लादचरितं प्रह्लादजनन्याः शुचिष्मतीति नाम, गर्भिणी सा नारदं संपूज्य भागवतमहिमानं अपृच्छत्,नारदेन भगवतः पारम्यं, भगवति सर्वेन्द्रियाणां प्रावण्यं, विष्णुभक्तेरेव साधनोत्तमत्वख्यापनं, भगवन्नामकीर्तनश्रैष्ठ्यकथनं। शुचिष्मत्यां प्रह्लादावतारः, शैशवादेव तस्य विष्णुभक्तत्वं, प्रह्लादभक्तिं दृष्ट्वा हिरण्यकशिपुसन्तापः, पितरं प्रह्लादः सूक्तिभिः बोधयामास। नवविधभक्तिनिरूपणं, विष्णोराराधनक्रमः, शुक्रपुत्रशण्डामर्कटाभ्यां हिरण्यकशिपुसान्त्वनम्।

अध्यायः-३९

प्रह्लादवाचा क्रुद्धः पिता गज, सर्प, विषपान, समुद्रक्षेपण, पर्वतादधःप्रक्षेपणादि आज्ञापयामास, भगवद्भक्ते तत्सर्वं निष्फलं जातं शण्डामर्कवाचा त्रैविध्याध्यापनं, दैत्यकुमारकैभ्यः प्रह्लादोपदेशः, मनुष्यजन्मसाफल्यं, पञ्चरात्रोक्तरीत्या पञ्चकालेषु भगवत्पूजनं, भगवद्ध्यानप्रकारनिरूपणं, तच्छ्रुत्वा हिरण्यकशिपुक्रोधः, प्रह्लादेन भगवद्बलादिकं निरूप्य समाधानं, क्रुद्धेन पित्रा खड्गं प्रगृह्य प्रह्लादवधोद्योगः तदा वायुः पक्षिरूपेण आगत्य हिरण्यं भगवन्माहात्म्यं प्रोच्य इतरदेवानां अस्वातन्त्र्यं, असामर्थ्यं प्रकटयामास। प्रह्लादं प्रीणयस्वेत्युक्त्या वायुः प्रययौ।

अध्याय-४०

कुपितो हिरण्यः द्विजगोऽग्निप्रतीकानि संच्छिद्य तुलसी-अश्वत्थ-शालिग्रामामादीन् चूर्णयामास । तदा हरिः स्तम्भे भृत्यसंरक्षणाय नृहरिरूपेण प्रकटः, नृसिंहरूपस्य अद्भुतत्ववर्णनं, हिरण्येन सह युद्धविहारः, हिरण्यवधः, देवैः कृता पुष्पवृष्टिः, ब्रह्म-रुद्र-ऋषि-पितृ-सिद्ध-विद्याधर-नाग-प्रजापति- मनु-गन्धर्व-चारण-यक्ष-किंपुरुषादिकृतनृसिंहस्तुतिः । अन्ते प्रह्लादेन सविस्तरं नरसिंहस्तुतिः, प्रसन्नेन हरिणा वरप्रदानं, ततो भगवदाज्ञया राज्यपरिपालनम् । प्रह्लादो वाय्वावेशकाले नारदाधमः, आवेशाभावे कर्मदेवसमः । प्रह्लादचरितसमाप्तिः ।

अध्यायः-४१

गङ्गा प्रह्लादादधमा विष्णुपदीति तस्या नाम, त्रिविक्रम वामपादाङ्गुष्ठजाता, रुद्रोऽपि कालकूटविषं असहिष्णुः स्वशिरसि एनां दध्रे, तस्याः चत्वारि रूपाणि-महाभिषक्पत्नी-अभिषेचनी, शंतनु-गङ्गा, सुषेण (वरुणवानर)-सुषेणा, मण्डूकभार्या-मण्डूकिनीति ।

पर्जन्यशब्दार्थः, लिङ्गादिकं पोषितव्यं न पोषितव्यं च, रामावतारे शरभनामकवानरः, शामलाशब्दार्थविवरणं, मलं लोहपात्रे भवति, अतो वैष्णवैस्तत्त्याज्यमेव, दग्ध-जीर्ण-पुराणवस्त्रादि नैव धार्यं, पलाण्डु-पिण्याक-तुल्वबिल्वे-दीर्घतक्रं-स्वादुहीनं कलिभार्या प्रियम् । शामला-रोहिणी बभूव-युधिष्ठिरेण विवाहः । चन्द्रभार्या-रोहिणी, आदित्यभार्या संज्ञा, गङ्गादयः षट् समाः, ताभ्यः स्वाहा-स्वधे अवरे, चन्द्रपुत्रबुधः-अभिमन्युः, अश्विभार्या उषा, नकुलभार्या शल्यात्मजा, पृथिव्यभिमानी-शनैश्चरः, कर्मपः-पुष्करः, हरिप्रीतिकरधर्मविवरणं-प्रातः नारायणस्मरणं, विण्मूत्र-केशव, शौच-त्रिविक्रम, गोदोहन-गोपाल, तुलसी, गो आदीनां माहात्म्यवर्णनं, स्तनपानबालकृष्ण, मृत्तिकास्नान-वराह, शङ्ख, चक्र, गदा, पद्म, नारायणमुद्राः, वस्त्रधारण-

उपेन्द्र, होम-परशुराम, तीर्थप्राशन-कृष्ण, राम, वासुदेव, शाकभक्षण-धन्वन्तरी, दुग्धान्न, फल, तैल, पानक, प्रयाण, पुत्रादिचुम्बन, ताम्बूल, शय्या, निद्रा-गान, तुलसीछेदन-पुष्पच्छेदन, प्रदक्षिण, प्रणाम, कर्मपूर्ति इत्यादि तत्तत् कालेषु स्मर्तव्यभगवद्रूपाणां नामनिर्देशः, समाप्तिश्च ।

॥ अथ गरुडपुराणम् ॥

(ब्रह्मकाण्डः)

॥ प्रथमोऽध्यायः ॥

*मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेः विधातृविहितस्तत्त्वं परं योगिनां
वृष्णीनां च पतिः सदैव शुशुभे रंगेऽच्युतः साग्रजः ॥ १ ॥

नमो नारायणायेति[1] तस्मै वै[2] मूलरूपिणे ।
नमस्कृत्य[3] प्रवक्ष्यामि नारायणकथामिमाम् ॥ २ ॥

शौनकाद्या महात्मानो ह्यृषयो[4] ब्रह्मवादिनः ।
नैमिषाख्ये महापुण्ये[5] तपस्तेपुर्महत्तरम् ॥ ३ ॥

जितेन्द्रिया जिताहाराः सन्तः सत्यपरायणाः ।
यजन्तः परया भक्त्या विष्णुमाद्यं जगद्गुरुम् ॥ ४ ॥

यज्ञैर्यज्ञपतिं केचित् ज्ञानैर्ज्ञानात्मकं परम् ।
केचित्परमया[6] भक्त्या नारायणमपूजयन् ॥ ५ ॥

एकदा तु महात्मानः समाजं चक्रुरुत्तमाः ।
धर्मार्थकाममोक्षाणामुपायं ज्ञातुमिच्छवः ॥ ६ ॥

षड्विंशतिसहस्राणि[7] मुनीनामूर्ध्वरेतसाम् ।
तेषां शिष्यप्रशिष्याणां संख्या वक्तुं न शक्यते ॥ ७ ॥

मुनयो भावितात्मानो मिलितास्ते महौजसः ।
लोकानुग्रहकर्तारो वीतरागा विमत्सराः ॥ ८ ॥

पाठान्तर-१.नारायणायैव । २. तस्मै ते । ३. नमस्कृत्वा । ४. ऋषयो । ५. महारण्ये । ६.केचित्तु परया । ७. सहस्राणां । * अयं श्लोकः रामतत्त्वप्रकाशनपुस्तके दृश्यते । अन्यत्र न ।

कथं हरौ मनुष्याणां भक्तिरव्यभिचारिणी ।
केन सिद्ध्येत्तु[१] सकलं कर्म त्रिविधमात्मनः ॥ १० ॥

इत्येवं[२] प्रष्टुमात्मानमुद्यतान्प्रेक्ष्य शौनकः ।
सांजलिर्वाक्यमाह स्म विनयावनतः सुधीः ॥ ११ ॥

शौनक उवाच

आस्ते सिद्धाश्रमे पुण्ये सूतः पौराणिकोत्तमः ।
स एतदखिलं वेत्ति व्यासशिष्यो यतीश्वरः ॥ १२ ॥

तस्मात्तमेव पृच्छाम इत्येवं शौनको मुनिः[३] ।
अथ ते ऋषयो[४] जग्मुः पुण्यं सिद्धाश्रमं ततः ॥ १३ ॥

पप्रच्छुस्ते सुखासीनं नैमिषारण्यवासिनः ।

ऋषय ऊचुः

वयं त्वतिथयः प्राप्तास्त्वातिथेयोऽसि सुव्रत ॥ १४ ॥

स्नानदानोपचारेण[५] पूजयित्वा यथाविधि ।
केन विष्णुः प्रसन्नः स्यात्स कथं पूज्यते नरैः ॥ १५ ॥

मुक्तिसाधनभूतं च ब्रूहि तत्त्वविनिर्णयम्[६] ।

सूत उवाच

श्रुणुध्वमृषयः सर्वे हरिं तत्त्वविनिर्णयम् ॥ १६ ॥

नत्वा विष्णुं श्रियं वायुं भारतीं शेषसंज्ञकम् ।
द्वैपायनं गुरुं कृष्णं प्रवक्ष्यामि यथामति ॥ १७ ॥

नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्वाथान् साधयाम्यहम् ॥ १८ ॥

---

१. सिध्यंत। २. आहेदं। ३.मुनीन्। ४. मुनयो। ५. ज्ञानदानोपचारेण। ६. तत्त्वं सुनिश्चितम्।

शौनक उवाच

किमर्थं नमनं विष्णोर्ग्रन्थादौ मुनिसत्तम ।
कर्तव्यं ब्रूहि मे ब्रह्मन् कृपया[1] मम सुव्रत ॥ १९ ॥

ततः श्रियं ततो वायुं भारतीं च ततः परम् ।
अन्ते व्यासं किमर्थं च त्वं नमस्कृतवानसि[2] ॥
सूत सूत महाभाग ब्रूहि कारणमत्र च[3] ॥ २० ॥

सूत उवाच

आदौ वन्द्यः सर्ववेदैकवेद्यो वेदे शास्त्रे सेतिहासे पुराणे ।
सत्तां प्रायो विष्णुरेवैक एव प्रकाशतेऽतो नम्य एको हरिर्हि ॥ २१ ॥

सर्वत्र मुख्यस्त्वधिकोऽन्यतोऽपि स एव नम्यो न च शंकराद्याः ।
नमन्ति येऽविनयाच्छंकरं तु विनायकं चण्डिकां रेणुकां च ॥ २२ ॥

तथा सूर्यं भैरवं मातरिश्वं तथा वार्णीं गिरिजां वै श्रियं च ।
सर्वेऽपि ते वैष्णवा नैव लोके न तद्भक्ता वेति चार्या वदन्ति ॥ २३ ॥

न पार्थक्यान्नमनं कार्यमेव प्रीणन्ति नैता देवताः पूजनेन ।
पूजां गृहीत्वा देवताश्चैव सर्वाः किंचिद्दत्वा फलदानेन तांश्च ॥ २४ ॥

सन्तर्प्य तुष्टैः स्वमनोऽनुसारात् तैः कारितां काम्यपूजां तथैव ।
निवेदयित्वा परदेवतायां विष्णौ हरौ श्रीपुरुषादिवन्द्ये ॥ २५ ॥

इहापरत्रापि सुखेतराणि दास्यन्ति पश्चादधरं वै तमश्च ।
अतो ह्येते नैव पूज्या न नम्या मोक्षेच्छुभिर्ब्राह्मणाद्यैर्द्विजेन्द्र ॥ २६ ॥

तथैव सर्वाश्रमिभिश्च नित्यं महाविपत्तावपि विप्रवर्याः ।
श्रीकाम्यया ये तु भजन्ति नित्यं श्रीब्रह्मरुद्रेन्द्रयमादिदेवान् ॥ २७ ॥

---

१. कारणं। २. नमनं कृतवानसि । ३. अत्र हि।

इहैव भुंजन्ति महच्च दुःखं महापदः कुष्ठभगंदरादीन् ।
नमन्ति येऽवैष्णवान्ब्रह्मरुद्रवायुप्रतीकान् नैव ते विष्णुभक्ताः ॥ २८ ॥

अभिप्रायं त्वत्र वक्ष्ये मुनीन्द्राः परं गोप्यं हृदि धार्यं हि तद्धि ।
वायोः प्रतीकं पूज्यमेवेह विप्राः न ब्रह्मरुद्रादिप्रतीकमेव ॥ २९ ॥

पूजाकाले देवदेवस्य विष्णोः वायोः प्रतीकं योग्यभागे निधाय ।
अन्तर्गतं तस्य वायोर्हरिं च लक्ष्मीपतिं पूजयित्वा हि सम्यक् ॥ ३० ॥

पश्चाद्वायोः सुप्रतीकं च सम्यक् निर्माल्यशेषेण हरेः समर्चयेत् ।
पृथक् च स्रग्धूपविलेपनादिपूजां प्रकुर्वन्ति च ये विमूढाः ॥ ३१ ॥

तेषां दुःखमिह लोके परत्र भविष्यते नात्र विचार्यमस्ति
प्रायश्चित्तं स्वस्ति विप्राः कथंचित्तत्कुर्वन्तु स्मरणं नाम विष्णोः ॥ ३२ ॥

पाषण्डरुद्रादिकसंप्रतिष्ठितान् हरेर्वायोः शंकरस्य प्रतीकान् ।
नमन्ति ये फलबुध्या विमूढास्तेषां फलं शाश्वतं दुःखमेव ॥ ३३ ॥

वायोः प्रतीकं यदि विप्रवर्यैः प्रतिष्ठितं चेन्नमनं हि कार्यम् ।
नैवेद्यशेषेण हरेश्च विष्णोः पूजा कृता चेन्नहि दोषलेशः ॥ ३४ ॥

गुरुर्हि मुख्यो हनुमज्जनिर्महान् रामाङ्घ्रिभक्तो हनुमान्सदैव ।
एवं विदित्वा परमं हरिं च पुत्रं पुनर्मुख्यदेवस्य वायोः ॥ ३५ ॥

नमस्कारो नान्यथा विप्रवर्या आधीयतां हृदि सर्वैः रहस्यम् ।
ये वैष्णवा वैष्णवदासभृत्याः सर्वेऽपि ते सर्वदा विष्णुमेव ॥ ३६ ॥

नमन्ति ये वै प्रतिपादयन्ति तथैव पुण्यानि च सात्त्विकानि ।
नमन्ति ये वासुदेवं हरिं च सम्यक् स्वशक्त्या प्रतिपादयन्ति ॥ ३७ ॥

प्रवत्तिमार्गेण न पूजयन्ति ह्यापत्काले परदैवं तदन्यम् ।
ते वैष्णवा वैष्णवदासभृत्या अन्ये सर्वेऽवैष्णवमात्रकाः स्मृताः ॥ ३८ ॥

उपक्रमैरुपसंहारस्य लिंगैर्हरिं गुरुं ह्यन्तरेणैव यान्ति ।
तान्येवाहुः सत्पुराणानि विप्राः कलौ युगे नाभ्यसूयन्ति सर्वे ॥ ३९ ॥

यतो हि नान्यं प्रतिपादयन्ति प्रवृत्तिधर्मान् स्वस्ववर्णानुरूपान् ।
अतो ह्यसूयन्ति सदा विमूढा कलौ हि विप्राः प्रचुरा हि तेऽपि ॥ ४० ॥

न चास्ति विष्णोः सदृशं च दैवतं न चास्ति वायोः सदृशो गुरुश्च ।
न चास्ति तीर्थं सदृशं विष्णुपद्याः न विष्णुभक्तेन समोऽस्ति भक्तः॥ ४१ ॥

अन्यानि विष्णोः प्रतिपादकानि सर्वाणि ते सात्त्विकानीति चाहुः ।
श्राव्याणि तान्येव मनुष्यलोके श्राव्याणि नान्यानि च दुःखदानि ॥ ४२ ॥

कलौ युगे सर्वपुराणमध्ये त्रीण्येव मुख्यानि हरिप्रियाणि ।
मुख्यं पुराणं हि कलौ नृणां च श्रेयस्करं भागवतं पुराणम् ॥ ४३ ॥

पूर्वं हि सृष्टिः प्रतिपाद्यतेऽत्र यतो ह्यतो भागवतं परं स्मृतम् ।
यस्मिन् पुराणे कथयन्ति सृष्टिं ह्यादौ विष्णोर्ब्रह्मरुद्रादिकानाम् ॥ ४४ ॥

नानार्थमेवं[१] कथयन्ति विप्र[२] नीचोच्चरूपं ज्ञानमाहुर्महान्तः ।
तेनैव सिद्धं प्रवदन्ति सर्वं ह्यतः परं भागवतं पुराणम् ॥ ४५ ॥

ततः परं विष्णुपुराणमाहुः ततः परं गारुडसंज्ञकं च ।
त्रीण्येव मुख्यानि कलौ नृणां तु तथा विशेषो गारुडे किंचिदस्ति ॥ ४६ ॥

शृणुध्वं वै तं विशेषं च विप्रास्त्र्यंशैर्युक्तं गारुडाख्यं पुराणम् ।
आद्यांशं वै कर्मकाण्डं वदन्ति द्वितीयांशं धर्मकाण्डं तमाहुः ॥ ४७ ॥

तृतीयांशं ब्रह्मकाण्डं वदन्ति तेषां मध्ये त्वन्तिमोऽयं वरिष्ठः ।
तृतीयांशश्रवणात्पुण्यमाहुः तुल्यं पुण्यं भागवतस्य विप्राः ॥ ४८ ॥

तृतीयांशे पठिते वेदतुल्यं फलं भवेन्नात्र विचार्यमस्ति ।
तृतीयांशश्रवणादेव विप्राः फलं [३]प्रोक्तं पठतोऽप्यर्थमेवम् ॥ ४९ ॥

---

१. ज्ञानार्थमेवं । २. विप्रा । ३. सिद्धिं पाठतोऽप्यर्थतो वा ।

तृतीयांशश्रवणादर्थतश्च पुण्यं चाहुः पठतो वै दशांशम् ।
ततोऽवरं मत्स्यपुराणमाहुस्ततोऽवरं कूर्मपुराणमाहुः ॥ ५० ॥
तथैव वै वायुपुराणमाहुस्त्रीण्येव चाहुः सात्त्विकानीति लोके ।
तत्रापि किंचिद्भेदितव्यं भवेच्च पुराणषट्के सत्त्वरूपे मुनीन्द्राः ॥ ५१ ॥
सत्त्वाधमे मात्स्यकौर्मे तथाहुः वायुं चाहुः सात्त्विकं मध्यमं च ।
विष्णोः पुराणं भागवतं पुराणं सत्त्वोत्तमं गारुडं चाहुरार्याः ॥ ५२ ॥
स्कान्दं पाद्मं वामनं वै वराहं तथाऽऽग्नेयं भविष्यं पर्वसृष्टौ ।
एतान्याहू राजसानीति विप्रास्तत्रैकदेशः सात्त्विकस्तामसश्च ॥ ५३ ॥
रजः प्राचुर्याद्राजसानीति चाहुः श्राव्याणि नैतानि मुमुक्षुभिः सदा ।
तेषां मध्ये सात्त्विकांशाश्च सन्ति तेषां श्रुतेर्गारुडीयं फलं च ॥ ५४ ॥
ब्रह्माण्डलैंग्ये ब्रह्मवैवर्तकं वै मार्कण्डेयं ब्राह्ममादित्यकं च ।
एतान्याहुस्तामसानीति विप्रास्तत्रैकदेशः सात्त्विको राजसश्च ॥ ५५ ॥
श्राव्याणि नैतानि मनुष्यलोके तत्त्वेच्छुभिस्तामसानीत्यतो हि ।
तेषु स्थिताः सात्त्विकांशा मुनीन्द्रास्तेषां श्रुतिर्गारुडैकांघ्रितुल्यम ॥ ५६ ॥
[१]अल्पान्युपपुराणानि वदन्त्यष्टादशानि च ।
विष्णुधर्मोत्तरं चैव तन्त्रं भागवतं तथा ॥ ५७ ॥
तत्त्वसारं नारसिंहं वायुप्रोक्तं तथैव च ।
तथा हंसपुराणं च षडेतानि मुनीश्वराः ॥ ५८ ॥
सात्त्विकान्येव जानीध्वं प्रायशो नात्र संशयः ।
एतेषां श्रवणादेव गारुडार्धफलं श्रुतम् ॥ ५९ ॥
भविष्योत्तरनामानं बृहन्नारदमेव च ।
यमनारदसंवादं लघुनारदमेव च ॥ ६० ॥

---

१. अन्यान्युपपुराणानि ।

विनायकपुराणं च बृहद्ब्रह्माण्डमेव च ।
एतानि राजसान्याहुः श्रवणाद्भक्तिरुत्तमा ॥ ६१ ॥

गारुडात्पादतुल्यं च फलं चाहुर्मनीषिणः ।
पुराणं भागवतं शैवं नन्दिप्रोक्तं तथैव च ॥ ६२ ॥

पाशुपत्यं रैणुकं च भैरवं च तथैव च ।
एतानि तामसान्याहुर्हरितत्त्वार्थवेदिनः ॥ ६३ ॥

एतेषां श्रवणाद्विप्राः गारुडाङ्घ्र्यर्धमेव च ।
सर्वेष्वपि पुराणेषु श्रेष्ठं भागवतं स्मृतम् ॥ ६५ ॥

वक्तुः स्याद्विगुणं पुण्यं व्याख्यातुश्च तथाधिकम् ।
अनन्तवेदैः साम्यमाहुर्महान्तः भारान्महत्त्वाद्भारतस्यापि विप्राः ।
वेदेभ्योऽस्य त्वर्थतश्चाधिकत्वं वदन्ति वै विष्णुरहस्यवेदिनः ॥ ६७ ॥

तत्र श्रेष्ठां गीतिकामाहुरार्यास्तथैव विष्णोर्नामसहस्रकं च ।
तयोस्तत्र श्रवणाद्भारतस्य दशाधिकं फलमाहुर्महान्तः ॥ ६८ ॥

दैत्याः सर्वे विप्रकुलेषु भूत्वा कृते युगे भारते षट्सहस्राम् ।
निष्कास्य काश्चिन्नवनिर्मितानां निवेशनं तत्र कुर्वन्ति नित्यम् ॥ ६९ ॥

मत्वा हरिं भगवान् व्यासरूपी चक्रे तदा भागवतं पुराणम् ।
तथा समाख्याय च वैष्णवं तत्ततः परं गारुडाख्यं स चक्रे ॥ ७० ॥

अतो हि गारुडं मुख्यं पुराणं शास्त्रसम्मितम् ।
गारुडेन समं नास्ति विष्णुधर्मप्रदर्शने ॥ ७१ ॥

यथा सुराणां प्रवरो जनार्दनो यथाऽऽयुधानां प्रवरं सुदर्शनम् ।
यथाऽश्वमेधः प्रवरः क्रतूनां छिन्नेषु भक्तेषु तथैव रुद्रः ॥ ७२ ॥

नदीषु गंगा जलजेषु पद्ममच्छिन्नभक्तेषु तथैव वायुः ।
तथा पुराणेषु च गारुडं च मुख्यं तदाहुर्हरितत्त्वदर्शने ॥ ७३ ॥

गारुडाख्ये पुराणे तु प्रतिपाद्यो हरिः स्मृतः ।
अतो हरिर्नमस्कार्यो गम्यो योग्यो हरिः स्मृतः ॥ ७४ ॥
भाग्यात्मकत्वात् श्रीदेव्या नमनं तदनु स्मृतम् ।
परो नरोत्तमो वा यः साधकेशोऽपि च स्मृतः ॥ ७५ ॥
अतो नम्यो वायुरपि पुराणादौ द्विजोत्तमाः ।
भारती वाक्यरूपत्वान्नम्या वायोरनन्तरम् ॥ ७६ ॥
उपसाधको नरः प्रोक्तो यतोऽतस्तदनन्तरम् ।
नम्य इत्युच्यते सद्भिस्तारतम्येन सर्वदा ॥ ७७ ॥
अतो व्यासं नमस्कुर्याद् ग्रन्थकर्तृत्वहेतुतः ।

शौनक उवाच

व्यासस्य नमनं ह्यन्ते कथं कार्यं महात्मनः ॥ ७८ ॥
अन्ते च वन्दने तस्य कारणं ब्रूहि सुव्रत ।

सूत उवाच

विष्णोरनन्तरं व्यासनमनं मुख्यमेव हि ॥ ७९ ॥
हरिरेव यतो व्यासो वाच्यवक्तृस्वरूपकः ।
व्यासो नैव समत्वेन प्रोक्तो भगवतो हरेः ॥ ८० ॥
तत्रापि कारणं वक्ष्ये सादरेण मुनीश्वराः ।
व्यासस्तु कश्चन ऋषिः पुराणे तामसे स्मृतः ॥ ८१ ॥
इति ज्ञानावलम्बेन दैत्या दैत्यानुगैः समाः ।
प्रविशन्ति ह्यन्धतम इति त्वन्ते नमस्कृताः ॥ ८२ ॥
यदिदं परमं गोप्यं हृदि धार्यं न संशयः ।
पराणां नम्यमेवोक्तं प्रतिपाद्यं यतोऽत्र हि ॥ ८३ ॥

समासव्यासभावाद्धि पराणां तत्प्रतीयते ।
वास्तवं तं न जानीयुरुपजीव्यो यतो हरिः ॥ ८४ ॥

हरिर्व्यासस्त्वेक एव व्यासस्तु हरिवत्स्मृतः ।
उपजीव्यतदीशत्वे तयोरेव न संशयः ॥ ८५ ॥

ईशकोटिप्रविष्टत्वात् श्रियः स्वामित्वमीरितम्
त्रयाणामुपजीव्यत्वात् सेव्यत्वात् स्वामिता स्मृता ॥ ८६ ॥

वाय्वादीनां त्रयाणां च सेव्यत्वात्सेव्यता स्मृता ।
भूभारहरणे विष्णोः प्रधानाङ्गं हि मारुतिः ॥ ८७ ॥

वाक्यरूपा भारती तु द्वितीयाङ्गं हि सा स्मृता ।
तृतीयाङ्गं हरेः शेषो न नम्याः साम्यतो हरेः ॥ ८८ ॥

प्रतिपाद्या मुख्यतया नम्या एव समीरिताः ।
अवान्तराश्च वाय्वाद्या न नम्यास्तेन ते स्मृताः ॥ ८९ ॥

भीष्मद्रोणादिनामानि भीष्मादिष्वेव मुख्यतः ।
वाचकानि यतो नित्यं तन्नम्यास्ते मुनीश्वराः ॥ ९० ॥

पराणामेव नम्यत्वं प्रतिपाद्यत्वमेव हि ।
एतत्सर्वं मयाऽऽख्यातं किमन्यच्छ्रोतुमिच्छथ ॥ ९१ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे
सात्त्विकादिपुराणविभागनम्यानम्यदेवविभागादिविषयनिरूपणं
नाम प्रथमोऽध्यायः ॥ १ ॥

॥ द्वितीयोऽध्यायः ॥

श्रीशौनक उवाच

कथं ससर्ज भगवान् तत्तत्तत्त्वाभिमानिनः ।
सृष्टिक्रमं न जानामि देवानां ह्यन्तरं मुने ॥ १ ॥
शौनकेनैवमुक्तस्तु सूतो वचनमब्रवीत् ।
सम्यग्व्यवसिता बुद्धिस्तव ब्रह्मर्षिसत्तम ॥ २ ॥
एवमेव कृतः प्रश्नो हरौ तु गरुडेन वै[1] ।
यदुक्तवान् हरिस्तस्मै तद्वक्ष्यामि तवानघ ॥ ३ ॥
सृष्टौ *ज्ञाते तवोत्कर्षो ज्ञातप्रायो भविष्यति ।
ब्रह्मादीनां तारतम्यज्ञानं मम भविष्यति ॥ ४ ॥
मोक्षोपायः स एवोक्त इतरत्तस्य साधनम् ।
गरुडेनैवमुक्तस्तु कृष्णो वचनमब्रवीत् ॥ ५ ॥

श्रीकृष्ण उवाच

[2]मूलरूपो ह्यतो ज्ञेयो पूर्णत्वाद्विष्णुरव्ययः ।
अवतारमिदं प्रोक्तं पूर्णत्वादेव सुव्रत ॥ ६ ॥
अनेको ह्येकतां प्राप्य संशेते [3]प्रलयाय वै ।
तत्रापि च विशेषोऽस्ति ज्ञातव्यं तत्त्वमंजसा ॥ ७ ॥
भेदेन दर्शनाद्वापि भेदाभेदेन दर्शनात् ।
विष्णोर्गुणानां रूपाणां तदंगानां *सुखादिनाम्[4] ॥ ८ ॥
[5]तत्रैव दर्शनाद्वापि क्षिप्रमेव तमो व्रजेत् ॥ ९ ॥

---

१. कृतप्रश्नो हरिस्तु गरुडेन वै । *ज्ञातायामित्यर्थः । २. मूलरूपी ह्यजो ।३. प्रलयार्णवे। *सुखादीनामित्यर्थः । ४. मुखादिनां । ५. तथा दर्शनको यस्तु

[1]पुरुषान्तरमारभ्य कल्पिता ये द्विजोत्तम ।
हरिरूपास्तु ते ज्ञेया एकीभूता हि तेन ते ॥ १० ॥
प्रलये समनुप्राप्ते जीवाः संयान्ति मामकाः ।
विराड्रूपे हरेः सन्ति तदा ते च ह्यनेकधा ॥ ११ ॥
एकीभावं प्राप्नुवन्ति मूलेन [2]प्रलये द्विज ।
बिंबेन तु स्वयं विष्णुरेकीभावं व्रजेद्यदि ॥ १२ ॥
प्रतिबिम्बः कथं जीवो भवेन्नारायणस्य च ।
तदधीनस्तत्सदृशो हरेर्जीवो न संशयः ॥ १३ ॥
प्रतिबिंबस्य शब्दार्थो ह्ययमेव उदाहृतः ।
तस्माच्च बिंबरूपाणां एकीभावं न चिन्तयेत् ॥ १४ ॥
कृष्णरामादिरूपेषु त्वेकीभावो विवक्षितः ।
बिंबानां मूलरूपस्य भेदो नात्र विवक्षितः ॥ १५ ॥
तत्रापि च विशेषोऽस्ति [3]ज्ञातव्यस्तत्वमिच्छुभिः ।
एकांशेन तु बिम्बैस्तु चैकीभावं व्रजन्ति ते ॥ १६ ॥
एकांशेन तु जीवत्वे संस्थिता नात्र संशयः ।
बिम्बमूलं न जानन्ति ते जना ह्यसुराः स्मृताः ॥ १७ ॥
बिम्बरूपस्य विष्णोश्च बलज्ञानक्रियादिषु
तारतम्यं विजानन्ति ते जना ह्यसुराः स्मृताः ॥ १८ ॥
एक एव हरिः पूर्वं ह्यविद्यावशतः स्वयम् ।
अनेको [4]भवति ह्यारादादर्शप्रतिबिम्बवत् ॥ १९ ॥
एवं वदन्ति ये मूढास्तेऽपि यान्त्यधरं तमः ।
उपाधिर्द्विविधः प्रोक्तः स्वरूपो बाह्य एव च ॥ २० ॥

---

१. पुरुषं तु समारभ्य कल्प्यन्ता ये द्विजोत्तम ।२. प्रलये द्विजाः । ३. ज्ञातव्यं तत्वमिच्छुभिः । ४. ज्ञातव्यं तत्वमिच्छुभिः । ५. भवति ह्यद्धा ह्यादर्शे प्रतिबिम्बवत् ।

बाह्योपाधिर्लये याति मुक्तावन्यस्य संस्थितिः ।
सर्वोपाधिविनाशे हि प्रतिबिम्बः कथं भवेत् ॥ २१ ॥

चिद्रूपाख्यो ह्युपाधिस्तु मोक्षे येऽप्यधिकारिणः ।
दुःखरूपो ह्युपाधिस्तु तमसो येऽधिकारिणः ॥ २२ ॥

मिश्ररूपो ह्युपाधिस्तु नित्यसंसारिणां मतः ।
बाह्योपाधिर्लिंगदेहः सर्वेषां नात्र संशयः ॥ २३ ॥

दैत्यान् दुःखयते यस्मात् तस्माद्दुःखी हरिः [१]स्मृतः ।
तत्तद्दुःखस्वरूपत्वात् दैत्यानां बिंबरूपकः ॥ २४ ॥

दैत्यस्थितानां बिम्बानां मूलरूपस्य वै [२]प्रभो ।
परस्परं तथा भेदं ह्यन्तरं वा न चिन्तयेत् ॥ २५ ॥

श्रीभूदुर्गादिरूपाणां तथा सीतादिरूपिणाम् ।
अन्योन्यं नाणुमात्रं च भेदो [३]बाह्यान्तरेऽपि च ॥ २६ ॥

चिन्तनीयः कथमपि ज्ञात्वा यान्त्यधरं तमः ।
[४]प्रतिबिम्बस्थितो बिम्बः [५]स्त्रीरूपो ह्यस्ति सर्वदा ॥ २७ ॥

प्रलये समनुप्राप्ते [६]लक्ष्म्या सह खगोत्तम ।
एकीभावं नाप्नुवन्ति बिम्बेन सह संस्थिताः ॥ २८ ॥

बिम्बस्थितानां रूपाणां लक्ष्म्याश्च विनतासुत ।
[७]भेदस्तु नाणुमात्रं च शङ्कनीयः कथंचन ॥ २९ ॥

यदा हि शेते[८] प्रलयार्णवे [९]विभुर्जीवाश्च सर्वानुदरे निवेश्य ।
मुक्तांश्च ब्रह्मेन्द्रमरुद्गणादीन् प्राप्तव्यमुक्तींश्च सृतौ च संस्थितान् ॥ ३० ॥

---

१. स्वयं । २. प्रभोः । ३. बाह्यान्तरोऽपि वा । ४. प्रतिबिम्बस्थिते बिम्बे । ५. श्रीरूपो ।
६. लक्ष्म्या । ७. भेदश्च । ८. स शेते । ९. प्रभुः ।

प्राप्तान्धकूपादिसमस्तजीवान् तथैव प्राप्तव्यकलीनथापरान् ।
तथैव नित्यं सृतिसंस्थितान् जनानचेतनान् वृक्षरूपादिजीवान्॥ ३१ ॥

एवं जनान् जठरे सन्निधाय सम्यक् शेते ह्यम्भसि [1]वै स कल्पे ।
[2]लक्ष्मीस्तु सा सर्ववेदात्मिका च भक्त्या हरौ नित्यसंवर्धितापि ॥ ३२ ॥

अत्यादरं दर्शयतीव[3] सा तु ईडे विष्णुं भक्तिसंवर्धितापि ।
चेष्टादिरूपेण तदा न किंचिद् आसीद्विना विष्णुमथ श्रियं च ॥ ३३ ॥

पर्यङ्करूपेण बभूव देवी [4]वासस्वरूपेण रमा विरेजे ।
सर्वं रमा सैव तदैव चासीत्सैका देवी बहुरूपा बभाषे ॥ ३४ ॥

त्वमुत्कृष्टः सर्वदेवोत्तमत्वान्न त्वत्समः कश्चिदेवाधिको वा[5] ।
त्वं ब्रह्म एको न चतुर्मुखश्च नाहं न रुद्रो न बृहस्पतिश्च ॥ ३५ ॥

विष्णावेव ब्रह्मशब्दो हि मुख्यो ह्यन्येष्वमुख्यो ब्रह्मरुद्रादिकेषु ।
अनन्तगुणपूर्णत्वात् ब्रह्मेति हरिरुच्यते ॥ ३६ ॥

गुणादिपूर्णताभावान्नान्ये ब्रह्मेत्युदीरिताः ।
देशानन्त्यं गुणतः कालतो वा नास्त्यानन्त्यं क्वापि देशे च काले ॥ ३७ ॥

ब्रह्मादिदेवे देशतः कालतो वा नेत्यानन्त्यं क्वापि देशे च काले ।
यदानन्त्यं किमु वक्तव्यमत्र गुणानन्त्यं नास्ति ब्रह्मादिकेषु ।
यद्यप्यहं देशतः कालतश्च समस्तदा वासुदेवेन सार्धम् ॥ ३८ ॥

तथापि मे गुणतो नास्त्यनन्त्यं ततो धर्मा गुणतोनन्ततश्च ।
सन्ति श्रुतावविरुद्धाश्च देवे चिन्त्या अचिन्त्या बहुधा ह्यनन्ताः ॥ ३९ ॥

अतो गुणांस्तव देवस्य विष्णोः स्तोतुं सदा स्मो न हरेः कदापि ।
नाहं न केशौ[6] न च गीर्न रुद्रो न दक्षकन्या न च मेनकासुता ॥ ४० ॥

---

१. वै कराले । २. लक्ष्मीस्तदा । ३. दर्शयन्तीव । ४. वायूदरूपेण । ५. कश्चिदतोऽधिको वा । ६. केरौ ।

न वै बिडौजा न च वा पुलोमजा न चेध्मवाहो न यमो न चान्यः ।
न नारदो नापि भृगुर्वसिष्ठो न विघ्नपो नापि बल्यादयश्च ॥ ४१ ॥
न वै विराटो नापि भीमः[1] शनिश्च न पुष्करो न कशेरुस्तथैव ।
न किन्नराः[2] पितरो नैव देवा गन्धर्वमुख्या[3] नापि वा तुष्यसंज्ञाः[4] ॥ ४२ ॥
न वै क्षितीशा न च मानुषाश्च विष्णोर्न जानन्ति किमत्र चान्ये ।
मत्तोऽधमः कोटिगुणेन ब्रह्मा समो हि तस्य ब्रह्मणो मातरिश्वा ॥ ४३ ॥
तौ वै विरागे हरिभक्तिभावे धृतिस्थितिप्राणबलेषु योगे ।
बुद्धौ समानौ संसृतौ मोक्षकाले परस्पराधारसमन्वितौ च ॥ ४४ ॥
अन्नाभिमानं ब्रह्म चाहुर्मुरारिं जीवाभिमानं वायुमाहुर्महान्तः ।
न शक्तोऽसौ ब्रह्मदेवो विवस्तुं वायुं विना संसृतावेव नित्यं ॥ ४५ ॥
*न तं विना मातरिश्वापि वस्तुं अन्योन्यमाप्तिः कालतो न्यूनता च ।
यदा महत्तत्वनियामकोऽभूद्ब्रह्माण्डान्तस्थूलसृष्टौ महात्मा ॥ ४६ ॥
तदा वायुर्नाशकद्वै महात्मा बाह्ये सृष्टौ कालभेदेन चास्ति ।
सरस्वती भारती ब्रह्मणस्तु संवत्सरानन्तरं सम्बभूव ॥ ४७ ॥
यदा दशाब्दा समतीता महात्मा तदा वायुः समभूल्लोकपूज्यः ।
किंचिन्न्यूनत्वं स्थूलसृष्टौ महात्मन्नेतावता वानयोः साम्यहानिः ॥ ४८ ॥
सरस्वती वत्सरात्सम्बभूव ह्यनन्तरं ब्रह्मणो जन्मकालात् ।
गिरः सकाशात्कालतो न्यूनतास्ति वायोस्तदा ह्यधमत्वे क्षतिः का ॥ ४९ ॥
वायोरनन्तरं वाणी ह्यभूत्संवत्सरात्परम् ।
यावत्पश्चाज्जनिस्तावत् पूर्वदेहक्षयो भवेत् ॥ ५० ॥

---

१. नाग्निभार्या । २. न वै चिराः पितरो । ३. देवगन्धर्वमुख्या । ४. मनुष्यसंज्ञाः ।
*न तं विना मातरिश्वापि वस्तुं ह्यतोन्योन्यं सर्वदा चाश्रितौ हि ।
यस्माद्ब्रह्मत्वं नियमेनैव याति वायुस्तस्मात्समता मुक्तिकाले ॥
वायुत्वेऽपि किंचिदूनत्वमस्ति पदाप्राप्तिः कालतो न्यूनता च ॥ -अधिकः पाठः रामतत्त्वप्रकाशने ॥

शेषो वीन्द्रो रुद्र एते त्रयश्च समा ह्येते ज्ञानबलादिकेष्वपि ।
तथापि[१] तेषां कालतो न्यूनतास्ति कालोऽपि तेषां दिव्यसहस्रवर्षः ॥ ५० ॥
अनन्तरुद्रौ ब्रह्मवायू यथा वा[२] तथा ज्ञेयौ नैव हानिः स्वरूपे ।
स्थूलस्य सृष्टौ बाह्यसृष्टौ महात्मन्कालान्न्यूनत्वं स मया नैव चिन्त्यः[३] ॥ ५१ ॥
तेषां सकाशाद्वारुणी पार्वती च सौपर्णिनाम्नी तिस्र एता महात्मन् ।
दशाब्देभ्योऽनन्तरं सम्बभूवुः सरस्वती भारतीवच्च बोध्या ॥ ५२ ॥
इन्द्रोऽवरो रुद्रभार्यादिकेभ्य[४] एवं ज्ञानं सर्वदा देह्यमन्दम्[५] ।
एवं ज्ञानं यस्य भवेच्च लोके स वै ज्ञानी वेदवेद्यः स एव ॥ ५३ ॥
न वै ज्ञानी ह्यन्तरं यो न वेद न वेदवादी न च वेदपाठकः ॥ ५४ ॥
वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि प्रियाणि च हरेः सदा ॥ ५५ ॥
मम स्वामी हरिर्नित्यं दासोऽहं सर्वदा हरेः ।
ब्रह्माद्याः देवताः सर्वाः गुरवो मे यथाक्रमम् ॥ ५६ ॥
एतेषां च हरिः स्वामी वेदे सर्वत्र गीयते ।
एवं जानंस्तु यो विद्वान् (वेदान्) संपठेत्स द्विजोत्तमः ॥ ५७ ॥
स वेदपाठको ज्ञेयस्तदन्ये वेदवादिनः ।
वेदभारभराक्रान्तः स वै ब्राह्मणगर्दभः ॥ ५८ ॥
ज्ञानाभिमानी वेदमानी उभौ तु परस्परं ह्यूचतुः[६] सर्वदैव ।
अलं ह्यलं यत्र वासो मुरारेराचार्याणां संगदोषाद् द्विजानाम् ॥ ५९ ॥
महापराधाः सन्ति लोके महात्मन् सहस्रशः शतशः कोटिशश्च ।
हरिश्च तान् क्षमते सर्वदैव नामत्रयस्मरणाद्वै कृपालुः ॥ ६० ॥

---

१. अथापि । २. यथावत्तथा । ३. अनयोर्नैव चिन्त्यम् । ४. रुद्रभार्यादिकाभ्यः । ५. देहि मह्यम् । ६. उभौ तौ परस्परं ।

सर्वापराधाद्रहितं दानमानैर्युक्तं सदा तारतम्याच्च हीनम् ।
दृष्ट्वापराधं तस्य विष्णुर्महात्मा हाहाकारं कुरुते क्रोधबुध्द्या ॥ ६१ ॥
उत्तिष्ठ गोविन्द सुवेदवेद्य सोऽव्याकृताख्यो मयि सम्यक् प्रसीद ।
भो केशवोत्तिष्ठ सुखस्वरूप सृष्टौ व्यये वर्तयितुं समर्थः ॥ ६२ ॥
सृष्ट्वा ब्रह्माणं प्रेरयेत्पूज्यसृष्टौ सृष्ट्वा रुद्रं प्रेरयेत्संहृतौ च ।
प्राप्तव्ययोग्यान् ब्रह्मशेषादिदेवान् दृष्ट्वा दृष्ट्वा देहि मोक्षं च सम्यक् ॥ ६३ ॥
हरे मुरारे स्वापहीनाद्य तिष्ठ कल्यादिकानन्तरज्ञानहीनान् ।
सम्यक् दृष्ट्वा कर्मदृष्ट्या महात्मन् लब्धं तमो देहि दुःखस्वरूपम् ॥ ६४ ॥
दैत्यादिकान् दुःखमतीन्ह यस्मात् तमस्यन्धे सर्वदा चित्स्वरूपी ।
तस्मादाहुर्दुःखरूपी हरिस्त्वं दुःखस्वरूपात्त्वं च दुःखी हरे त्वम् ॥ ६५ ॥
उत्तिष्ठ नारायण वासुदेव ह्युत्तिष्ठ कृष्णाच्युत माधवेति ।
उत्तिष्ठ चन्द्रेश दयार्द्रमूर्ते उत्तिष्ठ लक्ष्मीश नमो नमस्ते ॥ ६६ ॥
उत्तिष्ठ मध्वेश सरस्वतीश उत्तिष्ठ रुद्रेश तथाम्बिकेश ।
उत्तिष्ठ चन्द्रेश तथा शचीश विप्रेश भक्तेश गवेश नित्यम् ॥ ६७ ॥
शास्त्रप्रियोत्तिष्ठ ऋचि प्रियस्त्वं यजुःप्रियोत्तिष्ठ निदानमूर्ते ।
सामप्रियस्त्वं च तथा मुरारे अथर्ववेदप्रिय सर्वदा त्वम् ॥ ६८ ॥
गद्यप्रियस्त्वं च पुराणमूर्ते स्तुतिप्रियोत्तिष्ठ विचित्रमूर्ते ।
सुगायनप्रीतिकरस्त्वमेव ह्युत्तिष्ठ शीघ्रं कमलापतिस्त्वम् ॥ ६९ ॥
एवं स्तुतो विणुरजः पुराणे ह्यतित्वरावानुत्थितो नित्यबुद्धः ॥ ७० ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे
ब्रह्मरुद्रादिदेवतातारतम्यनिरूपणं नाम द्वितीयोऽध्यायः ॥ २ ॥

॥ तृतीयोऽध्यायः ॥

श्रीकृष्ण उवाच

बभूवेच्छा मम देवस्य विष्णोः स्रष्टुं सृजन्मोक्ष्ययोग्यांश्च मोक्तुम् ।
इच्छाशक्तिः सर्वदैवास्ति विष्णोस्तथापि तदूव्याहरणं च लौकिकम् ॥ १ ॥

तदा हरिर्जगृहे [१]लौकिकं च तमःपानं तेन रूपेण चक्रे ।
तद्रूपमाहुः प्राकृतं वै तदज्ञा ह्यन्धन्तमः प्रविशन्त्येव सर्वे ॥ २ ॥

अवताराः महाविष्णोः पूर्णाः सर्वे प्रकीर्तिताः ।
पूर्णं च तत्परं रूपं पूर्णात्पूर्णाः प्रकीर्तिताः[२] ॥ ३ ॥

परावरत्वं तेषां तु व्यक्तिमात्रविशेषतः ।
न देशकालसामर्थ्यात्पारावर्यं कथंचन ॥ ४ ॥

पूर्वरूपं च पूर्णं च पूर्णं यदवतारगम् ।
रूपं तदात्मन्यादाय पूर्णमेवावशिष्यते ॥ ५ ॥

लौकिकव्यवहारोऽयं भूभारक्षपणादिकः ।
तस्य दृष्टिं विना नान्यो लयः कृष्णादिना क्वचित् ॥ ६ ॥

तत्वे पीडा न कर्तव्या तया दुःखानि विन्दति ।
अत्यन्तपूडनात्तस्य रोगस्तस्य न संशयः ॥ ७ ॥

ज्ञातव्यांशे तु पीडा तु कर्तव्या गुरुणा सह ।
तमन्तेवासिनं चाहुः स एव च गुरुः स्मृतः ॥ ८ ॥

ये कुर्वन्ति हरेस्तत्वविचारं तु परस्परम् ।
तावेव गुरुशिष्यौ तु विनोदानन्दसंयुतौ ॥ ९ ॥

गुरुणापि समं हास्यं कर्तव्यं कुटिलं विना ।
हर्षामर्षयुतः शिष्यो गुरुः कौटिल्यसंयुतः ॥ १० ॥

---

१. पौरुषं । २. पूर्णात्पूर्णः समुद्गतः ।

उभौ तौ निरयं यातौ यावदाचन्द्रतारकम् ।
साक्षाद्धरिः पुरुषः पिङ्गलाक्षः स्वमायायां गुणमय्यां महात्मा ।
स्वपौरुषेणैव सुमंगलेन अधात्तु वीर्यं भगवान् वीर्यवांश्च ॥ ११ ॥

गरुड उवाच

वीर्यस्वरूपं ब्रूहि मे वासुदेव वीर्ये त्वदीये संशयो मे विभाति ।
किं वीर्यमीशस्य स्वरूपभूतं किं वा विभिन्नं वद साधु वेत्सि ॥ १२ ॥

कृष्ण उवाच

यद्वीर्यमाधत्त हरिः स्वयं प्रभुर्मायाभिधायां विनतातनूज ।
तद्वीर्यमाहुर्नृहरेः स्वरूपं विपश्चितो निश्चितत्वदर्शिनः ॥ १३ ॥

भिन्नं तदाहुः प्राकृतमेव चाहुः स्वनाभिपद्मादिकवच्च बोध्यम् ।
नैतावता ज्ञानरूपस्य विष्णोः न वीर्यहानिरिति चिन्तनीयम् ॥ १४ ॥

वीर्यस्वरूपी भगवान्वासुदेवः सर्वत्र देशेऽपि च सर्वकाले ।
सर्वार्थवान् यदि न स्यात्खगेन्द्र तर्हीश्वरः पुरुषो नैव स स्यात् ॥ १५ ॥

अचिन्त्यवीर्यैश्चिन्त्यवीर्यैर्द्विरूपः स्त्रीरूपमेकं पुरुषं तथापरम् ।
उभे रूपे वीर्यवती खगेन्द्र तयोरभेदश्चिन्तनीयो हि सम्यक् ॥ १६ ॥

स्त्रीरूपवान् यदि न स्यात्खगेन्द्र स्त्रीणां कथं प्रतिबिम्बत्वमेव ।
स्त्रीरूपमस्माद्ब्रह्मजं चिन्तनीयं स्वरूपमेतन्नान्यथा चिन्तनीयम् ॥ १७ ॥

स्त्रीबिम्बभूतहरिरूपे खगेन्द्र स्त्रीरूपमस्तीति विचिन्तनीयम् ॥ १८ ॥

गरुड उवाच

स्त्रिया स्त्रियश्च संयोगं व्यर्थमाहुर्मनीषिणः ।
स्त्रीरूपभूते बिम्बे तु स्त्रीरूपाः सन्ति सर्वदा ॥ १९ ॥

स्थितौ तत्र निमित्तं च ब्रूहि कृष्ण मम प्रभो ।

कृष्ण उवाच

स्त्रीबिम्बभूते स्त्रीरूपे लक्ष्मीर्न स्यात्खगेश्वर ।
नित्यावियोगिनी देवी कथं स्यात्परमात्मनः ॥ २० ॥

हरेरनन्तरूपाणां स्त्रीरूपाणां खगेश्वर
अनन्तानन्तरूपेण नित्यं शुश्रूषणे रता ॥ २१ ॥

अतो लक्ष्म्या वियोगस्तु शंकनीयः कथंचन ।

नारायणो नाम हरिः स्वतन्त्रः श्रिया विना नास्ति कदापि तार्क्ष्य ।
हरेर्मुकुन्दस्य परारविनेद शुश्रूषमाणा परमादरेण ॥ २२ ॥

हरिं विना श्रीरपि देशकाले नास्तीति मोक्षेच्छुभिरेव वेद्यम् ।
यस्यामधाद्वीर्यमनुक्षणं च सा मामिका चेन्द्रजालात्मिकेति ॥ २३ ॥

वदन्ति ये ह्यसुरा मूढरूपा अन्धन्तमः प्रविशन्त्येव सर्वे ।
माया नाम प्रकृतिस्त्वेवमाहुः सुसूक्ष्मरूपा नतु चेन्द्रजालिका ॥ २४ ॥

तस्याभिमानः श्रीरिति वेदितव्यो वीर्याधानं तत्र तेषां च मेलः ।
कार्योन्मुखं मेलनं चाहुरार्या इतो रूपं नाहुरार्याश्च विष्णोः ॥ २५ ॥

सानादिनित्या सत्यरूपा च विष्णोः मिथ्यारूपा सा कथं स्यात्खगेन्द्र।
सत्या तनुः प्रकृतेस्तन्निगूढा सत्यत्वमाहुर्व्यवहारार्थरूपम् ॥ २६ ॥

व्यवहाररूपा सत्यता चेत्प्रकृत्यास्तदा कथं स्याद्यदनादिभूता ।

अनादिनित्या यदि न स्यात्खगेन्द्र सुसूक्ष्मरूपेण न कारणं स्यात् ॥२७॥

सूक्ष्मेण रूपेण च कारणं स्यात्तर्हि प्रपंचस्य कारणं वद ।
अविद्याया वशतो विष्णुरेव नानारूपैर्दृश्यते विष्णुरेव ॥ २८ ॥

शास्त्रज्ञानान्नाशमेति ह्यविद्या न संशयो हरिणा चैक्यमेति ।
एवं ब्रूषे यदि वादात्खगेन्द्र वक्ष्येऽहं ते तत्र युक्तिं श्रुणु त्वम् ॥ २९ ॥

सर्वज्ञरूपस्य हि मे मुरारेः कथं हरेर्घटते ह्यज्ञता च ।
सूर्ये यथा तमो नास्ति तथा नारायणे हरौ ।
अज्ञानं नास्ति पक्षीन्द्र कथं तत्वं ब्रवीष्यहो ॥ ३० ॥

अतो नाहुर्ब्रह्मणो नादिकालादुपाधिसंबन्धवशादज्ञता चेत् ।
सर्वज्ञोऽसौ कुत्र पक्षीन्द्र विष्णुरल्पज्ञजीवो ज्ञानशून्यश्च कुत्र ॥ ३१ ॥

विरुद्धयोश्चानयोः सर्वदैव कथं चैक्यं संवदिष्यन्ति वेदाः ।
देशे काले सर्वदा दुःखहीनो जगत्कर्ता पूर्णशक्तिः सदैव ॥ ३२ ॥

जीवः सदा स्वल्पकर्ताप्यपूर्णो संसाररूपी दुःखरूपी च नित्यम् ।
विरुद्धयोश्चानयोरैक्यमाहुरीशस्य मायावशतो मायिनश्च ॥ ३३ ॥

ये वैष्णवा वैष्णवदासवश्याः तेषां द्रोहं सर्वदा संचरेद्यः ।
हरिप्रीतिस्तेन भवेन्न नित्यमानन्दवृद्धिस्तेन भवेन्न मुक्तौ ॥ ३४ ॥

मायी सदा मायिभृत्यस्तथापि भेदज्ञानान्निन्द्यते कार्यते च ।
तेनापि तेषां दुःखवृद्धिर्भवेच्च ह्यन्धन्तमः पुनरावृत्तिहीनम् ॥ ३५ ॥

खगेन्द्रातः प्रकृतिः सूक्ष्मरूपा सा नित्या सा सत्यभूता सदैव ।
एवं स्वयं कालवाय्वादिकानां पराणवः सत्यरूपाश्च सन्ति ॥ ३६ ॥

पराणूनां लक्षणं वेदितव्यं ज्ञानेच्छुभिर्नान्यथा वेदितव्यम् ।
पदार्थानां पार्थिवानां खगेन्द्र विशेषाणां चरमाख्यो विशेषः ॥ ३७ ॥

स एव स्यात्परमार्द्विजेन्द्र योऽन्त्यो विशेषोऽवयवश्च स स्मृतः।

गरुड उवाच

हे कृष्ण हे माधव सात्वतां पते पदार्थानां चरमांश पराणुः ॥ ३८ ॥

इति प्रोक्तं तत्र मे संशयोऽस्ति योऽन्त्यो विसेषः स तु नाशयुक्तः ।
यो ह्यंशयुक्तो नतु योऽन्त्यो विशेष एवं ममाभाति वचस्तु तथ्यम् ॥ ३९ ॥

कृष्ण उवाच

य एव लोके संस्थिता मानुषास्तु विशेषाणां दर्शने शक्तियुक्ताः ।
तथापि ते यस्य चांशित्वमेव विशेषं वै नैव द्रष्टुं समर्थाः ॥ ४० ॥

तमेवाहुश्चरमांशं विशेषं ये चैवमाहुर्मुनयस्तेन चान्ये ।
ये काणादाः गौतमाद्याः खगेन्द्र निरंशकं परमाणुं वदन्ति ॥ ४१ ॥

अनन्तांशैः संयुतत्वेपि तांश्च निरंशिनो भ्रान्तिदृष्ट्या वदन्ति ।
तस्मात्पराणोः परमाणुत्वमस्ति तदंशानां विनतागर्भजात ॥ ४२ ॥

पराणूनां एकदेशे खगेन्द्र तन्नो सन्ति प्राणिनां राशयश्च ।
प्रत्येकशः सन्ति रूपा हरेश्च ह्यतश्च तत्परमाणोरणीयः ॥ ४३ ॥

यो वा त्वणीयान्परमस्य विष्णोः स एष रूपो महतो महीयान् ।
तेषामन्योन्यं न विशेषोऽस्ति कश्चिदचिन्त्यरूपे च विचिन्तनीयः ॥ ४४ ॥

कालकोटिविहीनत्वं कालानन्त्यं विदुर्बुधाः ।
देशकोटिविहीनत्वं देशानन्त्यं विदुर्बुधाः ॥ ४५ ॥

गुणानामप्रमेयत्वं गुणानन्त्यं विदुर्बुधाः ।
आनन्त्यं त्रिविधं नित्यं हरेर्नान्यस्य कस्यचित् ॥ ४६ ॥

तस्य सर्वस्वरूपेषु चानन्त्यं तु त्रिलक्षमम् ।
तथापि देशतस्तस्य परिच्छेदोऽपि युज्यते ॥ ४७ ॥

परिच्छेदस्तथा व्याप्तिरेकरूपेऽपि युज्यते ।
तस्याचिन्त्याद्भुताश्चैर्य व्यवहारार्थमेव च ॥ ४८ ॥

गुणतः कालतश्चैव परिच्छेदो न कुत्रचित् ।
व्याप्तत्वं देशतो ह्यस्ति सर्वभूतेषु यद्यपि ॥ ४९ ॥

न च भेदः क्वचित्तस्य ह्यणुमात्रेऽपि युज्यते ।
तथापि विद्यतेऽणुत्वं तस्मादैश्वर्ययोगतः ॥ ५० ॥

तस्माद्विध्यवतारार्थं व्याप्तत्वं चापि भण्यते ।
यत्तस्य व्यापकं रूपं परं नारायणं विदुः ॥ ५१ ॥

अतश्च परमाणूनां पार्थिवानन्त्यवादिनाम् ।
भेदः परस्परं ज्ञेयस्तथेशस्य महात्मनः ॥ ५२ ॥

जडेशयोर्जडानां च जीवानां च परस्परम् ।
तथैव जडजीवानां नित्यं भेदो जडेशयोः ॥ ५३ ॥

पंचभेदा इमे नित्यं सर्वावस्थासु सर्वशः ।
एतादृश्यां तु मायायां वीर्यमाधत्त वीर्यवान् ॥
पुरुषाख्यो हरिस्तस्मात् त्रिगुणानसृजत्प्रभुः ॥ ५४ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे भगवद्वीर्यस्वरूपतदाधानद्वारकगुणत्रयसृष्टि जडेशभेदादिनिरूपणं

नाम तृतीयोऽध्यायः ॥ ३ ॥

॥ चतुर्थोऽध्यायः ॥

श्रीकृष्ण उवाच

[१]यथा ससर्ज भगवान् त्रीन् गुणान्प्रकृतेस्तदा ।
लक्ष्मीस्त्रिरूपा संभूता श्रीभूदुर्गेति संज्ञिता ॥ १ ॥

सत्वाभिमानिनी श्रीस्तु भूर्देवी रजमानिनी ।
तमोभिमानिनी दुर्गा ह्येवमाहुर्मनीषिणः ॥ २ ॥।

अन्तरं न विजानीतद्रूपाणां च परस्परम् ।
गुणानां चैव सम्बन्धाद् दुर्गादीनां खगेश्वर ॥ ३ ॥

अन्तरं ये विजानन्ति ते यान्त्यन्धन्तमः परम् ।
पुरुषस्तु त्रिरूपोऽभूत् विष्णुर्ब्रह्मा भवेति सः ॥ ४ ॥

सत्वेन लोऽकान्वर्धयितुं विष्णुः साक्षाद्धरिः स्वयम् ।
तमसापि समान्हन्तुं रुद्रे च प्राविशद्धरिः ॥ ५ ॥

आद्यो ब्रह्मा स विज्ञेयो न तु साक्षाद्धरिः स्वयम् ।
तमसापि समान्हन्तुं रुद्रे च प्राविशद्धरिः ॥ ६ ॥

रुद्रे स्थितो रुद्रसंज्ञो न रुद्रस्तु हरिः स्वयम् ।
विष्णुरेव हरिः साक्षात् तावुभौ न ही स्मृतौ ॥ ७ ॥

आविष्टरूपौ विज्ञेयौ ब्रह्मरुद्राभिधायकौ ।
एवं ज्ञात्वा मोक्षमेति नान्यथा तु कथंचन ॥ ८ ॥

विष्णुब्रह्मादिरूपाणामैक्यं जानन्ति ये द्विजाः ।
ते यान्ति नरकं घोरं पुनरावृत्तिवर्जितम् ॥ ९ ॥

गुणत्रयं प्रविष्टस्तु पुरुषो हरिरव्ययः ।
कार्योन्मुखं यथा भूयात्क्षोभयामास वै तथा ॥ १० ॥

---

१. यदा ससर्ज ।

जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् ।
गुणत्रये विद्यमानाद्भागादेव न संशयः ॥ ११ ॥
अतश्च परमाणूनां पार्थिवानन्त्यवादिनाम् ।
महतो ब्रह्मवायू च जज्ञाते [१]ह्यभिमानिनौ ।
तयोः संवत्सरात्पश्चात् यमलौ संबभूवतुः ॥ १२ ॥
रजःप्रधानं यच्छत्वं महच्छत्वमितीरितम् ।
सर्गं त्विमं विजानीयाद् गुणवैषम्यनामकम् ॥ १३ ॥

गरुड उवाच

महत्तत्वस्वरूपस्य ज्ञानार्थं देवकीसुत ।
त्वयोक्ता गुणवैषम्यनामिका सृष्टिरुत्तमा ॥ १४ ॥
गुणवैषम्यशब्दार्थं मम ब्रूहि महाप्रभो ।

श्रीकृष्ण उवाच

गुणवैषम्यशब्दार्थज्ञापनाय खगेश्वर ॥ १५ ॥
अपेक्षितं च तत्रादौ गुणसाम्यं न संशयः ।
सम्यग् ज्ञापयितुं तच्च ह्यादौ तावत्खगेश्वर ॥ १६ ॥
राशीभूतगुणानां तु दर्शयिष्ये [२]स्थितिं च वै ।
राशीभूतस्य तमसः सकाशाद्विनतासुत ॥ १७ ॥
राशीभूतं रजो ज्ञेयं द्विगुणं तत्तु नान्यथा ।
राशीभूतस्य रजसः सकाशाद्विनतासुत ॥ १८ ॥
राशीभूतं रजश्चैव द्विगुणं परिकीर्तितम् ।
राशीभूतं तथा सत्त्वं द्विगुणं समुदाहृतम् ।
मूलप्रकृतिजा ह्येते न मूला प्रकृतिः स्मृता ॥ १९ ॥

---

१. स्वाभिमानिनौ । २. स्थितिं तव ।

यतः प्रकृतिरूपाणां परिच्छेदो न विद्यते ।
अतः प्रकृतिजा ज्ञेया न मूलास्ते खगेश्वर ॥ २० ॥

एवं तव गुणानां च परिमाणं खगेश्वर ।
उक्तं स्वरूपं तेषां तु तव सम्यक् खगेश्वर ॥ २१ ॥

तत्र राशित्रये सत्त्वं केवलं समुदाहृतम् ।
रजस्तमोभ्यां गरुड ह्यविमिश्रं ह्यतस्तु तत् ॥ २२ ॥

साम्यत्वाच्च तथैवोक्तिर्न तु तत्त्वाभिमानिनः ।
उपस्थमानिनो वीन्द्र बभूवुस्तदनन्तरम् ॥ २३ ॥

विश्वामित्रो वसिष्ठोऽत्रिर्मरीचिः पुलहः क्रतुः ।
पुलस्त्योऽङ्गिरसश्चैव तथा वैवस्वतो मनुः ॥ २४ ॥

मन्वादयोऽनन्तसंख्या उपस्थात्मान ईरिताः ।
पायोश्च मानिनो वीन्द्र जज्ञिरे तदनन्तरम् ॥ २५ ॥

सूर्येषु द्वादशेष्वेको मित्रस्तारा गुरोः प्रिया ।
कोणाधिपो निर्ऋतिश्च प्रावही प्रवहप्रिया ॥ २६ ॥

चत्वार एते पक्षीन्द्र पायुतत्त्वाभिमानिनः ।
घ्राणाभिमानिनः सर्वे जज्ञिरे द्विजसत्तम ॥ २७ ॥

विष्वक्सेनो वायुपुत्रो ह्यश्विनौ गणपस्तथा ।
वित्तपः सप्त वसवः उक्तो ह्यग्निस्तथाऽष्टमः ॥ २८ ॥

सप्तानां श्रुणु नामानि द्रोणः प्राणो ध्रुवस्तथा ।
अर्को दोषस्तथा वस्कः सप्तमस्तु विभावसुः ॥ २९ ॥

दश रुद्रास्तथा ज्ञेया मूलरुद्रो भवः स्मृतः ।
दश रुद्रस्य नामानि श्रुणुष्व द्विजसत्तम ॥ ३० ॥

रैवतोऽजो भवो भीमो वामदेवो वृषाकपिः ।
अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ॥ ३१ ॥

दश रुद्रा इति प्रोक्ता षडादित्यान् द्विजोत्तम ।
उरुक्रमस्तथा शक्रो विवस्वान्वरुणस्तथा ॥ ३२ ॥

पर्जन्योऽतिबाहुरेत उक्ताः पूर्वं द्विजोत्तम ।
पर्जन्यव्यतिरिक्तास्तु पंचैवोक्ता न संशयः ॥ ३३ ॥

गङ्गासमस्तु पर्जन्य इति प्रोक्तः खगेश्वर ।
सविता ह्यर्यमा धाता पूषा त्वष्ट तथा भगः ॥ ३४ ॥

चत्वारिंशत्तथा सप्त मरुतः परिकीर्तिताः ।
द्वावुक्ताविति विज्ञेयौ प्रवहोऽतिवहस्तथा ॥ ३५ ॥

तथा दशविधा ज्ञेया विश्वेदेवाः खगेश्वर ।
श्रुणु नामानि तेषां तु पुरूरवार्द्रवसंज्ञकौ ॥ ३६ ॥

धूरिलोचनसंज्ञौ द्वौ क्रतुदक्षेतिसंज्ञकौ ।
द्वौ सत्यवसुसंज्ञौ च कामकालकसंज्ञकौ ॥ ३७ ॥

एवं दशविधाज्ञेया विश्वदेवाः प्रकीर्तिताः ।
तथा ऋभुगणश्चोक्तस्तथा च पितरस्त्रयः ॥ ३८ ॥

द्यावापृथिव्यौ विज्ञेयौ एते च षडशीतयः ।
देवाः प्रजज्ञिरे सर्वे नासिकेन्द्रियमानिनः ॥ ३९ ॥

आकाशस्याभिमानी तु गणपः समुदाहृतः ।
उभयत्राभिमानीति ज्ञेयं तत्त्वार्थवेदिभिः ॥ ४० ॥

विष्वक्सेनं विना सर्वे जयाद्याः विष्णुपार्षदाः ।
अभवन्समर्हानाश्च विष्वक्सेनादनन्तरम् ॥ ४१ ॥

एतेऽपि नासिकायाश्च अवान्तनियामकाः ।
अतस्ते तत्त्वमानिभ्यो ह्यवरास्ते प्रकीर्तिताः ॥ ४२ ॥

स्पर्शतत्त्वाभिमानी तु अपानश्चेत्युदाहृतः ।
रूपाभिमानी संजज्ञे व्यानो नाम महाप्रभो ॥ ४३ ॥

रसात्मक उदानश्च समानो गन्धनामकः ।
अपां नाथाश्च चत्वारो मरुतः परिकीर्तिताः ॥ ४४ ॥

एवं गुणत्रयाणां च मिश्रितत्वात्खगेश्वर ।
गुणसाम्यमिति प्रहुरेवं जानीहि वै खग ॥ ४५ ॥

अन्यथा ये विजानन्ति ते यान्ति ह्यधरं तमः ।

गरुड उवाच

राशीकृतगुणानां च त्रयाणां परमेश्वर ॥ ४६ ॥

विशालानां परब्रह्मन् प्रलये गुणसाम्यता ।
कथं ब्रूहि महाभाग ह्येतत्तत्त्वं समासतः ॥ ४७ ॥

श्रीकृष्ण उवाच

राशीभूतगुणानां त्रयाणामपि सत्तम ।

तदा विमिश्रितत्वेन ह्यवस्थानं विदुर्बुधाः ॥ ४८ ॥

इदानीं गुणवैषम्यं श्रुणु सम्यग् मम प्रिय ।
सृष्टिकाले तु संप्राप्ते यत्पूर्वं प्रलये खग ॥ ४९ ॥

दशभागैश्च सत्त्वे तु मिश्रितं यद्रजस्तथा ।
तमस्यप्येकभागेन प्रविष्टं यत्तु तद् रजः ॥ ५० ॥

रजस्यप्येकभागेन प्रविष्टं यच्च तद्रजः ।
एवं द्वादशभागैश्च प्रविष्टं सर्वशो रजः ॥ ५१ ॥

सत्त्वस्थैर्दशभागैश्च तथैकेन रजोंऽशिना ।
एवमेकादशैर्भागैस्तथैकांशेन वै द्विज ॥ ५२ ॥

मिश्रितं भवति ह्यद्धा महत्तत्वं तदा स्मृतम् ।
एतदन्यो विशेषश्च मन्तव्यो विनतासुत ॥ ५३ ॥

एकांशस्तमसो ज्ञेयो महत्तत्वे न संशयः ।
एवं त्रयोदशैर्भागैर्मिश्रितं तच्च सत्तम ॥ ५४ ॥

एवमेतद्विजानीयान्नान्यथा तु कथंचन ।

गरुड उवाच

चतुर्मुखाच्छ्रुतं पूर्वं भगवन्सात्वतां पते ॥ ५५ ॥

चतुर्भागात्समुत्पन्नं महत्तत्वमिति प्रभो ।
तत्रैकांशस्तमः प्रोक्तस्त्रिभागो रज एव च ॥ ५६ ॥

तदाहुर्ब्रह्मणो रूपं गुणवैषम्यनामकम् ।
चतुर्भागात्मकं प्रोक्तं महत्तत्वं श्रुतं मया ॥ ५७ ॥

त्रयोदशांशैः सम्भूतमिति प्रोक्तं त्वयानघ ।
तदेतत्संशयं छिन्दि कृपालो भक्तवत्सल ॥ ५८ ॥

कृष्ण उवाच

ब्रह्मोक्तस्य मयोक्तस्य विवादो नास्ति सर्वथा ।
मूलसत्वे मिश्रितं च दशभागेन यद्रजः ॥ ५९ ॥

तत्सर्वं च मिलित्वैव त्वेको भागस्तु कीर्तितः ।
मूले रजसि यच्चोक्तो रजोभागः खगेश्वर ॥ ६० ॥

भागे द्वितीये विज्ञेयस्तद्रजो नात्र संशयः ।
मूले रजसि यच्चोक्तो रजोभागस्तथैव च ॥ ६१ ॥

तृतीयभागो विज्ञेयो नात्र कार्या विचारणा ।
तथा मूले च तमसि ह्येको भागस्तमः स्मृतः ॥ ६२ ॥

एवं त्रिभागो रजसः एकांशस्तमसः स्मृतः ।
तदाहुर्ब्रह्मणो देहं गुणवैषम्यनामकम् ॥ ६३ ॥

गरुड उवाच

महत्तत्वस्य चत्वारो भागास्तेषु रजस्त्रयः ।
तमसस्त्वेक एवेति त्वयोक्तं गरुडध्वज ॥ ६४ ॥

रजोभागात्मको देहो ब्रह्मणः परमेष्ठिनः ।
इति प्रतीयते ब्रह्मन् वचनात्तव माधव ॥ ६५ ॥

शुद्धसत्त्वात्मको देहो ब्रह्मणः परमेष्ठिनः ।
एवं हि श्रूयते कृष्ण संशयो मेऽत्र बाधते ॥ ६६ ॥

तमेव संशयं छिन्दि यद्धि तच्छ्रोतुमर्हति ।

कृष्ण उवाच

त्रिभागभूते रजसि तथा द्वादशभागके ॥ ६७ ॥

रजसोऽपेक्षया सत्त्वं दशांशाधिकमेव च ।
प्रविष्टमस्तीति खग ज्ञातव्यं तच्छ्रुणु द्विज ॥ ६८ ॥

तमसोऽपेक्षया तत्र तम एकादशं स्मृतम् ।
एकांशस्तु रजो ज्ञेयं एवमाहुर्मनीषिणः ॥ ६९ ॥

तमसोऽपेक्षया तत्र तम एकादशं स्मृतम् ।
एकांशस्तु रजो ज्ञेयं एवमाहुर्मनीषिणः ॥ ७० ॥

एवं च मिलितान्भागान् वक्ष्ये श्रुणु महामते ।
त्रयोदशांशो विज्ञेयो द्वादशांशं रजः स्मृतम् ॥ ७१ ॥

एकांशस्तमसो ज्ञेयस्तत्र भागान् श्रुणु द्विज ।
आदौ तु द्वादशांशेषु भागान्वक्ष्यामि तच्छुणु ॥ ७२ ॥

एकांशस्तमसो ज्ञेयस्तद्दशांशाधिकं रजः ।
तच्छतांशाधिकं सत्वमेवमाहुर्मनीषिणः ॥ ७३ ॥

एकांशस्तमसि ह्येवं विभागान् श्रुणु सत्तम ।
एकांशस्तु रजो ज्ञेयस्तमो ह्येकादशाधिकम् ॥ ७४ ॥

तमोभागास्तु विज्ञेयास्तद्दशांशाधिकः स्मृतः ।
सत्वभाग इति ज्ञेयो महद्धात्वे खगेश्वर ॥ ७५ ॥

सत्वांशो बहुलो यस्मात् शुद्धसत्वं चतुर्मुखः ।
उत्पद्धिर्महतश्चोक्तमेवं च विनतासुत ।
तज्ज्ञानान्मोक्षमाप्नोति नान्यथा तु कथंचन ॥ ७६ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे महत्तत्वसृष्टिकथनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

।। पंचमोऽध्यायः ।।

एतादृशे महत्तत्वे लक्ष्म्या सह हरिः स्वयं ।
प्रविवेश महाभाग क्षोभयामास वै हरिः ।। १ ।।

अहं तत्त्वमभूत्तस्माज्ज्ञानद्रव्यक्रियात्मकम् ।
अहंकारसमुत्पत्तावेकांशस्तमसि स्मृतः ।। २ ।।

तद्दशांशाधिकरजः तद्दशांशाधिकं प्रभो ।
सत्वमित्युच्यते सद्भिः ह्येतदात्मा त्वहं स्मृतम् ।। ३ ।।

अहं तत्वाभिमानी तु आदौ शेषो बभूव ह ।
सहस्राब्दाच्च पश्चात्तौ जातौ खगहरौ द्विज ।। ४ ।।

अहंतत्वे खगे ह्येषु प्रविष्टो हरिरव्ययः ।
क्षोभयामास भगवांल्लक्ष्म्या सह हरिः स्वयम् ।। ५ ।।

अहंतत्वमृडाद्येषु प्रविष्टो हि हरिः स्वयम् ।
वैकारिकस्तामसश्च तैजसश्चेत्यहं त्रिधा ।
त्रिधा बभूव रुद्रोऽपि यतस्तेषां नियामकः ।। ६ ।।

वैकारिकस्थितो रुद्रो वैकारिक इति स्मृतः ।
तामसे तु स्थितो रुद्रस्तामसो ह्यभिधीयते ।। ७ ।।

तैजसे तु स्थितो रुद्रो लोके वै तैजसः स्मृतः ।
तैजसे तु ह्यहंतत्वे लक्ष्म्या सह हरिः स्वयम् ।। ८ ।।

विशित्वा क्षोभयामास तदासौ दशधा त्वभूत् ।
श्रोत्रं चक्षुःस्पर्शनं च रसनं घ्राणमेव च ।। ९ ।।

वाक्पाणिपादं पायुश्च उपस्थेति दश स्मृताः ।
वैकारिके ह्यहंतत्वे प्रविश्याक्षोभयद्धरिः ।। १० ।।

मनस्तत्वमभूदादौ इन्द्रियाणां च देवताः ।
एकादशविधा आसन् क्रमेण तु खगेश्वर ॥ ११ ॥

मनोऽभिमानिनी ह्यादौ वारुणी त्वभवत्तदा ।
अनन्तरं च सौपर्णी गिरिजापि तथैव च ॥ १२ ॥

शेषादनन्तरास्तासां दशवर्षादनन्तरम् ।
उत्पत्तिरिति विज्ञेयं क्रमेण तु खगेश्वर ॥ १३ ॥

मनोऽभिमानिनावन्या विन्द्रकामौ प्रजज्ञतुः ।
तार्क्ष्य ह्यनन्तरौ ज्ञेयौ मुक्तौ संसार एव च ॥ १४ ॥

ततस्त्वगात्मा ह्यभवत्सोऽहंकारिक ईरितः ।
ततः पाण्यात्मकश्चैव जज्ञिरे पक्षिसत्तम ॥ १५ ॥

शचीरतिश्चानिरुद्धस्तथा स्वायंभुवो मनुः ।
बृहस्पतिस्तथा दक्ष एते पाण्यात्मकाः स्मृताः ॥ १६ ॥

दक्षस्यानन्तरं जज्ञे प्रवहो नाम चाण्डज ।
स एवोक्तश्चातिवाहः पाण्यात्मेत्येव चोदितः ॥ १७ ॥

दक्षस्यानन्तरं ज्ञेयो न तु शच्यादिवत्स्मृतः ।
ततोऽभवन्महाभाग चक्षुरिन्द्रियमानिनः ॥ १८ ॥

स्वायंभुवमनोर्भार्या शतरूपा यमस्तथा ।
चन्द्रसूर्यौ तु चत्वारश्चक्षुरिन्द्रियमानिनः ॥ १९ ॥

चन्द्रः श्रोत्राभिमानीति तथा ज्ञेयः खगेश्वर ।
जिह्वेन्द्रियात्मा वरुणः सूर्यस्यानन्तरोऽभवत् ॥ २० ॥

वागिन्द्रियात्मा वरुणः सूर्यस्यानन्तरोऽभवत् ।
वागिन्द्रियाभिमानिन्यो ह्यभवन्वरुणादनु ॥ २१ ॥

त्रय एते महात्मानो वागिन्द्रियनियामकाः ।
ये ऋष्यादयश्चोक्तास्ते न तत्वनियामकाः ।। २२ ।।

साम्यत्वाच्च तथैवोक्तिर्न तु तत्वाभिमानिनः ।
उपस्थमानिनो वीन्द्र बभूवुस्तदनन्तरम् ।। २३ ।।

विश्वामित्रो वशिष्ठोत्रिर्मरीचिः पुलहः क्रतुः ।
पुलस्त्योऽगिरसश्चैव तथा वैवस्वतो मनुः ।। २४ ।।

मन्वादयोऽनन्तसंख्या उपस्थात्मान ईरिताः ।
पायोश्च मानिनो वीन्द्र जज्ञिरे तदनन्तरम् ।। २५ ।।

सूर्येषु द्वादशेष्वेको मित्रस्तारा गुरोः प्रिया ।
कोणाधिपो निर्ऋतिश्च प्रावही प्रवहप्रिया ।। २६ ।।

चत्वार एते पक्षीन्द्र पायुतत्वाभिमानिनः ।
घ्राणाभिमानिनः सर्वे जज्ञिरे द्विजसत्तम ।। २७ ।।

विष्वक्सेनो वायुपुत्रो ह्यश्विनौ गणपस्तथा ।
वित्तपः सप्तवसवः उक्तो ह्यग्निस्तथाष्टमः ।। २८ ।।

सप्तानां श्रुणु नामानि द्रोणः प्राणो ध्रुवस्तथा ।
अर्को दोषस्तथा वस्कः (स्तुः) सप्तमस्तु विभावसुः ।। २९ ।।

दश रुद्रास्तथा ज्ञेया मूलरुद्रो भवः स्मृतः ।
दश रुद्रस्य नामानि श्रुणुष्व द्विजसत्तम ।। ३० ।।

रैवतोऽजो भवो भीमो वामदेवो वृषाकपिः ।
अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ।। ३१ ।।

दश रुद्रा इति प्रोक्ता षडादित्यान् श्रुणु द्विज ।
उरुक्रमस्तथा शक्रो विवस्वान्वरुणस्तथा ।। ३२ ।।

पर्जन्योऽतिबाहुरेत उक्ताः पूर्वं द्विजोत्तम ।
पर्जन्यव्यतिरिक्तास्तु पंचैवोक्ता न संशयः ॥ ३३ ॥
गंगासमस्तु पर्जन्य इति प्रोक्तः खगेश्वर ।
सविता ह्यर्यमा धाता पूषा त्वष्टा तथा भगः ॥ ३४ ॥
चत्वारिंशत्तथा सप्त मरुतः परिकीर्तिताः ।
द्वावुक्ताविति विज्ञेयौ प्रवहोऽतिवहस्तथा ॥ ३५ ॥
तथा दशविधा ज्ञेया विश्वेदेवाः प्रकीर्तिताः ।
श्रुणु नामानि तेषां तु पुरूरवार्द्रवसंज्ञकौ ॥ ३६ ॥
धूरिलोचनसंज्ञौ द्वौ क्रतुदक्षेतिसंज्ञकौ ।
द्वौ सत्यवसुसंज्ञौ च कामकालकसंज्ञकौ ॥ ३७ ॥
एवं दशविधा ज्ञेया विश्वेदेवाः प्रकीर्तिताः ।
तथा ऋभुगणाश्चोक्तास्तथा च पितरस्त्रयः ॥ ३८ ॥
द्यावापृथिव्यौ विज्ञेयौ एते च षडशीतयः ।
देवाः प्रजज्ञिरे सर्वे नासिकेन्द्रियमानिनः ॥ ३९ ॥
आकाशस्याभिमानी तु गणपः समुदाहृतः ।
उभयत्राभिमानीति ज्ञेयं तत्वार्थवेदिभिः ॥ ४० ॥
विष्वक्सेनं विना सर्वे जयाद्या विष्णुपार्षदाः ।
अभवन्समहीनाश्च विष्वक्सेनादनन्तरम् ॥ ४१ ॥
एतेऽपि नासिकायाश्च अवान्तरनियामकाः ।
अतस्ते तत्वमानिभ्यो ह्यवरास्ते प्रकीर्तिताः ॥ ४२ ॥
स्पर्शतत्वाभिमानी तु अपानश्चेत्युदाहृतः ।
रूपाभिमानी संजज्ञे व्यानो नाम महाप्रभो ॥ ४३ ॥

रसात्मक उदानश्च समानो गन्धनामकः ।
अपां नाथाश्च चत्वारो मरुतः परिकीर्तिताः ॥ ४४ ॥

जयाद्यनन्तरान्वक्ष्ये समुत्पन्नान् खगेश्वर ।
प्रधानाग्नेः प्रथमजः पावकः समुदाहृतः ॥ ४५ ॥

भृगोर्महर्षेः पुत्रश्च च्यवनः समुदाहृतः ।
बृहस्पतेश्च पुत्रस्तु ह्युतथ्यः परिकीर्तितः ॥ ४६ ॥

रैवतश्चाक्षुषश्चैव तथा स्वारोचिषः स्मृतः ।
उत्तमो ब्रह्मसावर्णिर्धर्मसावर्णिरेव च ॥ ४७ ॥

देवसावर्णिसावर्णिरिन्द्रसावर्णिरेव च ।
तथैव दक्षसावर्णिर्धर्मसावर्णिरेव च ॥ ४८ ॥

एकादशविधा ह्येवं मनवः परिकीर्तिताः ।
पितृणां सप्तकं चैवेत्याद्याः संजज्ञिरे खग ॥ ४९ ॥

तदनन्तरमुत्पन्नास्तेभ्यो नीचाः शृणु द्विज ।
वरुणस्य पत्नी गंगा तु पर्जन्याख्यो विभावसुः ॥ ५० ॥

यमभार्या श्यामला तु ह्यनिरुद्धप्रिया विराट् ।
ब्रह्माण्डमानिनी सैव ह्युषानाम्नी सुशब्दिता ॥ ५१ ॥

रोहिणी चन्द्रभार्योक्ता सूर्यभार्या तु संज्ञका ।
एता गंगादिषट्संख्या जज्ञिरे विनतासुत ॥ ५२ ॥

गंगाद्यनन्तरं जज्ञे स्वाहा वै मन्त्रदेवता ।
स्वाहानामाग्निभार्योक्ता गंगादिभ्योऽधमा श्रुता ॥ ५३ ॥

स्वाहानन्तरजो ज्ञेयो ज्ञानात्मा बुधनामकः ।
बुधस्तु चन्द्रपुत्रो यः स्वाहाया अधमः स्मृतः ॥ ५४ ॥

उषा नाम तथा जज्ञे बुधस्यानन्तरं खग ।
उषा नामाभिमानी तु ह्यश्विभार्या प्रकीर्तिता ॥ ५५ ॥

बुधाधमा सा विज्ञेया नात्र कार्या विचारणा ।
ततः शनैश्चरो जज्ञे पृथिव्यात्मेति विश्रुतः ॥ ५६ ॥

उषाधमस्तु विज्ञेयस्ततो जज्ञेऽथ पुष्करः ।
कर्माभिमानी विज्ञेयः शनैश्चर इतीरितः ॥ ५७ ॥

तत्वाभिमानिनो देवानेवं सृष्ट्वा हरिः स्वयम् ।
प्रविवेश स देवेशस्तत्त्वेषु रमया सह ॥ ५८ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे
तत्वाभिमानिदेवतोत्पत्तितारतम्यनिरूपणं
नाम पंचमोऽध्यायः ॥ ५ ॥

।। षष्ठोऽध्यायः ।।

कृष्ण उवाच

तत्र तत्र स्थितास्तत्त्वे[१] तत्तत्तत्वाभिमानिनः ।
स्वे स्वे ह्यायतने स्वांगे तदर्थं च खगेश्वर ।। १ ।।
हरिं नारायणं सम्यक् स्तोतुं समुपचक्रिरे ।
चित्याचित्यगुमे विष्णौ विरुद्धाः सन्ति सद्गुणाः ।। २ ।।
एकदेशेप्यनन्तास्तान् गुणान् संस्तवनेच्छया ।
तारतम्यानुसारेण प्रत्येकमीडिरे हरिम् ।।
तत्राप्यादौ हरिं लक्ष्मीं स्तोतुं समुपचक्रमे ।
एकैकशो ह्यनन्तास्ते तद्गुणानां स्तुतौ मम ।
क शक्तिरिति बुध्या सा व्रीडयावनताब्रवीत् ।। ३ ।।

श्रीरुवाच

नतास्मि ते नाथ पदारविन्दं न वेद चान्यच्चरणादृते तव ।
त्वयीश्वरे सन्ति गुणाः श्रुतास्तु तथाश्रुताः सन्ति च देवदेव ।। ४ ।।
सम्यक् सृष्ट्वा स्वायतनं च दत्वा गोविन्द दामोदर मां च पाहि ।
स्तुत्या मदीयेन सुखैकपूर्ण प्रयोजनं नास्ति तथापि देव ।। ५ ।।
शुश्रूषणं मदुचितं स्तवनं रमेश प्रीत्यर्थमेव च हरे न किंचिदस्ति ।

ब्रह्मोवाच

लक्ष्मीपते सर्वजगन्निवास त्वं ज्ञानसिन्धुः क च विश्वमूर्ते ।
अहं क चाज्ञस्तवने शक्तिरस्ति ह्यज्ञोऽहं वै ह्यल्पशक्तिर्ममास्ति ।। ६ ।।
लक्ष्म्याश्चैव ज्ञानवैराग्यभक्ति ह्यत्यल्पमद्धा मयि सर्वदैव ।
तव प्रसादादस्ति जगन्निवास तत्र स्वामित्वं नास्ति विष्णो सदैव ।। ७ ।।

---

१. सर्वे देवाः ।

न देहि त्वं सर्वदा मे मुरारे अहं ममत्वं प्रार्थ्यमेतावदेव ।
ममाज्ञानं योग्यगुणे रमेश प्रमादो वा नास्ति नास्त्यद्य नित्य[1] ॥ ८ ॥
न मे हृषीकाणि पतन्त्यसत्पथे पदारविन्दे तु पतन्तु सर्वदा ।
लक्ष्म्या ह्यहं कोटिगुणेन हीनः स्तोतुं सामर्थ्यं नास्ति मे सुप्रसीद ॥ ९ ॥
इति स्तवं विष्णुगुणान् विधाता तार्क्ष्ये स्थितः प्रांजलिस्तस्य चाग्रे ।
तदा वायुर्देवदेवो महात्मा दृष्ट्वा विष्णुं भक्तिसंवर्धितात्मा ॥ १० ॥
स्नेहोत्थ[2]रावोस्खलिताक्षरस्तं मुञ्चन् कणान् प्रांजलिराबभाषे ।

वायुरुवाच

एते हि देवास्तव भृत्यभूताः पादारविन्दं परमं सुदुर्लभम् ॥ ११ ॥
चतुर्विधान्पुरुषार्थान्रमेश संप्रार्थयन्त्येव सदापि देवो दृष्ट्वा ।
दृष्ट्वा हरेः सैव मायैव तावत्सुकारणं किंचिदन्यन्न चास्ति ॥ १२ ॥
अतो न चाहं प्रवृणोमि भूमन् भवत्पदाम्भोजनिषेवणोत्सुकः ।
जनस्य कृष्णाद्विमुखस्य कर्मणा ह्यपुण्यशीलस्य सुदुःखितस्य ॥ १३ ॥
अनुग्रहार्थं च तवावतारो नान्यच्च किंचित्पुरुषस्तवेश ।
गोभूसुराणां च महीरुहाणां तथा सुराणां प्रवरावतारैः ॥ १४ ॥
क्षेमोपकाराणि च वासुदेव क्रीडन्विधत्ते न च किञ्चिदन्यत् ।
मनो न तृप्यत्यपि शंसतां नः सुकर्म मौलेश्चरितामृतानि ॥ १५ ॥
अच्छिन्नभक्तस्य हि मे मुकुन्द सदा भक्तिं देहि पदारविन्दे ।
सदा तदेवास्तु न किंचिदन्यद्यत्र त्वमासीः पुरुषे देवदेव ॥ १६ ॥
अहं च तत्रास्मि तव प्रसादाद्यत्रास्म्यहं तत्र भवान्महाप्रभो ।
व्याप्तिर्ममेयं च शरीरमध्ये चतुर्मुखस्यापि न चैतदन्यैः ॥ १७ ॥
मदीयनिद्रा तव वन्दनं प्रभो मदीययात्राचरणं प्रदक्षिणम् ।
मदीयवाख्याहरणस्तुतिस्तवेत्येवं विदित्वा च समर्पयामि ॥ १८ ॥

---

१. नास्त्येव नित्यं । २. स्नेहोत्थारोमा

मद्दृष्टियोग्यं च पदार्थजातं दृष्ट्वा हरेः प्रतिमा एव तच्च ।
इत्थं मत्वाहं सर्वदा देवदेव तत्र स्थितान्हरिरूपान्भजिष्ये ॥ १९ ॥

यच्चन्दनं यच्च पुष्पं च धूपं वस्त्रं च यद्भक्ष्यभोज्यादिकं च ।
एतत्सर्वं विष्णुप्रीत्यर्थमेव ह्येतद्व्रतं सर्वदा वै करिष्ये ॥ २० ॥

अवैष्णवान्दूषयिष्ये सदाहं सद्वैष्णवान्पालयिष्ये मुरारे ।
विष्णुद्रुहां छेदयिष्ये च जिह्वां तच्छ्रुण्वतां पूरयिष्ये त्रपूल्काः ॥ २१ ॥

एतादृशी शक्तिरस्तीह देव तव प्रसादाद् बलिनोऽपि विष्णो ।
अथापि नाहं स्तवने समर्थः लक्ष्म्या ह्यहं कोटिगुणेन हीनः ॥ २२ ॥

एतत्स्तोत्रं ह्यर्पयिष्ये तवैव यतः प्रीतिर्ह्यक्षया मे सदा स्यात् ।
स्तोत्रं ह्येतत्पाठयन्तीह लोके ते वैष्णवास्ते च हरिप्रियाश्च ॥ २३ ॥

कुर्वन्ति ये पठनं नित्यमेव समर्पयिष्यन्ति सदा हरौ च ।
तेषां हरिः प्रीयते केशवोऽलं हरौ प्रसन्ने किमलभ्यमस्ति ॥ २४ ॥

एवं स्तुत्वा बलदेवो महात्मा तूर्ष्णीं स्थितः प्रांजलिरग्रतो हरेः ।

सरस्वत्युवाच

को वा रसज्ञो भगवन्मुरारे हरे गुणस्तवनात्कीर्तनाद्वा ॥ २५ ॥

अलंबुद्धिं प्राप्नुयाद्देवदेव ब्रह्मादिभिः सर्वदा स्तूयमान ।
यः कर्णनाडीं पुरुषस्य यातो भवप्रदां देहरतिं छिनत्ति ॥ २६ ॥

न केवलं देहरतिं छिनत्ति असद्गृहक्षेत्रसुतेषु नित्यम् ।
पश्वादिरूपेषु धनादिकेषु ह्यनर्घ्यरत्नेषु प्रियं छिनत्ति ॥ २७ ॥

अनन्तवेदप्रतिपादितापि लक्ष्मीर्न वै वेद तव स्वरूपम् ।
चतुर्मुखो नैव न वेद वायुरसौ न वेत्तीति किमत्र चित्रम् ॥ २८ ॥

एतादृशस्य स्तवने क्वास्ति शक्तिमर्म प्रभो ब्रह्मवाय्वोः सकाशात् ।
शतैर्गुणैः सर्वदा न्यूनतास्ति ह्यतो हरे दयया मां च पाहि ॥ २९ ॥

एवं स्तुत्वा हरिं सा तु तूष्णीमास खगेश्वर ।
भारती तु तदा स्तोतुं हरिं समुपचक्रमे ॥ ३० ॥

भारत्युवाच

ब्रह्मेश लक्ष्मीश हरे मुरारे गुणांस्तव श्रद्दधानस्य नित्यम् ।
तथा स्तुवन्तोऽस्य विवर्धमानां मतिं च नित्यं विषयेष्वसत्सु ॥ ३१ ॥

कुर्वन्ति वैराग्यममुत्र लोके ततः परं दृढभक्तिं तथैव ।
ततः परं चैव हरेः प्रसन्नतां कुर्वन्ति नित्यं तव देव देव ॥ ३२ ॥

तेनापरोक्षं च भवेच्च तेषां ह्यतो गुणानां स्तवने च मे रतिः ।
ज्ञाने प्रजाते पुरुषस्य नित्यं संसारदुःखं तु तदा छिनत्ति ॥ ३३ ॥

विच्छिन्नदुःखस्य तदाधिकारिणो आनन्दरूपाख्यफलं ददाति ।
हरेर्गुणानस्तुवतां च पापं तेषां हि पुण्यं च तया क्षिणोति ॥ ३४ ॥

एवं विदित्वा परमो गुरुर्मम वायुर्दयालुर्मम वल्लभश्च ।
हरेर्गुणान्सर्वगुणेषु सारान् ममैव योग्यान्सुखमुख्यभूतान् ॥ ३५ ॥

उद्धृत्य पुष्पेभ्य इवार्तबन्धुः शिवाय नो ह्यवदत्पुण्यकीर्तिः ।
तव प्रसादाच्च श्रियः प्रसादाद्वायोः प्रसादाच्च ममास्ति नित्यम् ॥ ३६ ॥

यद्यत्करोत्येव सदैव वायुस्तत्तत्करोत्येव सदैव नित्यम् ।
वायोर्विरोधं न करोति देवः स तद्विरोधं न करोति नित्यम् ॥ ३७ ॥

हरेर्विरुद्धं न करोति वायुः वायोर्विरुद्धं न करोति विष्णुः ।
वायोः प्रसादान्मम नास्ति किंचिदज्ञानभावश्च तव प्रसादात् ॥ ३८ ॥

यथैव मूले च तथावतारे दुःखादिकं नास्ति समीरणस्य ।
वायुस्तथाहं च उभौ मुकुन्द तथावतारेषु न दुःखरूपौ ॥ ३९ ॥

अशक्तवद् दृश्यते वायुदेवः युगानुसाराल्लोकधर्मास्तु रक्षन् ।
न तावता तत्र देवे मुरारे ह्यशक्तता तत्र संचिन्तनीया ॥ ४० ॥

अवताररूपे मयि दुःखादिकं च न चिन्तनीयं ज्ञानिभिर्देवदेव ।
अहं कदाचिद्दुःखवतीव दृश्ये दैत्यांस्तथा पातयितुं तमोऽन्धे ॥ ४१ ॥

नैतावता मम वायोश्च नित्यं दुःखादिकं नैव संचिन्तनीयम् ।
एतादृशाहं स्तवने तु नास्ति शक्तिर्गुणानां मधुसूदन प्रभो ॥ ४२ ॥

वायोः सकाशाच्च गुणेन हीना संसाररूपे मुक्तिरूपे च देव ।
एवं स्तुत्वा भारती तु तूष्णीमास खगेश्वर ॥
तदनन्तरजः शेषः प्रांजलिः प्राह केशवम् ॥ ४३ ॥

शेष उवाच

नाहं न जाने तव पादमूलं रुद्रो न वेत्ति गरुडो नैव वेद ।
अहं वाण्याः शतगुणांशहीनो दत्वा ह्यायतनं पाहि मां वासुदेव ॥ ४४ ॥

एवं स्तुत्वा स शेषस्तु तूष्णीमास खगेश्वर ।
तदनन्तरजो वीशः स्तोतुं समुपचक्रमे ॥ ४५ ॥

तव पदोः स्तुतिं किं करोम्यहं तव पदाम्बुजे ह्यर्पितं मनः ।
कथमहं सखे पक्षियोनिजः कथमहं चगुणानीडितुं क्षमः ॥ ४६ ॥

एवं स्तुत्वा स गरुडस्तूष्णीमास नयान्वितः ।
तदनन्तरजो रुद्रः स्तोतुं समुपचक्रमे ॥ ४७ ॥

रुद्र उवाच

मायां तवेश भगवन्नविदाम भूमन् भक्तिर्ममास्तु तव पादसरोजमूले ।
छिन्नापि सा नतु सदातनमस्ति देव तेन ह्यहं तव विरुद्धमजं करोमि ॥ ४८ ॥

संछिन्नबुद्धिसहितस्य च ते मुरारे का शक्तिरस्ति स्तवने मम मूढबुद्धेः ।
वाण्या सदा शतगुणेन विहीनमेनं मां पाहि चेश मम चायतनं च दत्वा ॥ ४९ ॥

एवं स्तुत्वा स रुद्रस्तु तूष्णीमास द्विजोत्तम ।
शेषानन्तरजा देवी वारुणी वाक्यमब्रवीत् ॥ ५० ॥

वारुण्युवाच

लक्ष्मीपते ब्रह्मपते मनःपते गिरःपते रुद्रपते नृणां पते ।
गुणांस्तव स्तोतुमहं समर्था न पार्वती नापि सुपर्णपत्नी ॥ ५१ ॥
शेषादहं दशगुणैर्विहीना मां पाहि नित्य जगतामधीश ।
एवं स्तुत्वा वारुणी तु तूष्णीमास खगेश्वर ॥ ५२ ॥

सौपर्ण्युवाच

स्तोतुं गुणांस्तव हरे जगदीश वाचा श्रोतुं हरे तव कथां श्रवणे न शक्तिः ।
चेतश्च न स्मरति देव तव स्वरूपं को नाम लोके भगवत्पदार्थः ॥ ५३ ॥
अतो गुणस्तवने नास्ति शक्तिः वीन्द्रादहं दशगुणैरवरा च नित्यम् ।
एवं स्तुत्वा तु सौपर्णी तूष्णीमास खगेश्वर ।
रुद्रानन्तरजा स्तोतुं गिरिजा तूपचक्रमे ॥ ५४ ॥

पार्वत्युवाच

गोविन्द नारायण वासुदेव त्वया हि मे किंचिदपि प्रयोजनम् ।
नास्त्येव स्वामिन्न च नाम वाचा सौभाग्यरूपः सर्वदा ह्येक एव ॥ ५५ ॥
नारायणेति तव नाम च एकमेव वैराग्यभक्तिविभवे परमं समर्थम् ।
असंख्यब्रह्मादिकहत्यनाशने गुर्वगनाकोटिविनाशने च ॥ ५६ ॥
नामाधिकारिणी चाहं गुणानां च महाप्रभो ।
स्तवने नास्ति मे शक्ती रुद्राद्दशगुणैरहम् ॥ ५७ ॥
अवरा च सदास्म्येव नात्र कार्या विचारणा ॥
एवं स्तुत्वा सा गिरिजा तूष्णीमास खगेश्वर ॥ ५८ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे
तत्वाभिमानितत्तद्देवताकृतविष्णुस्तुतिनिरूपणं
नाम षष्ठोऽध्यायः ॥ ६ ॥

गुणांस्तव महाप्रभो

॥ सप्तमोऽध्यायः ॥

कृष्ण उवाच

पार्वत्यनन्तरोत्पन्न इन्द्रो वचनमब्रवीत् ।

इन्द्र उवाच

तव स्वरूपं ह्यविजानन् हि देव समुत्सुकः स्तवने यस्तु मूढः ।
अजानतः स्तवनं देवदेव तदेवाहुर्हेलनं चक्रपाणे ॥ १ ॥
तथापि तद्वै तव नाम पूर्वं भवेत्तदा पुम्यकरं भवेदिति ।
रुद्रादिकानां स्तवने नास्ति शक्तिस्तदा वक्तव्यं मम नास्तीति किं वा ॥ २॥
गुणांशतो दशभी रुद्रतो वै सदा न्यूनो मत्समः कामदेवः ।
ज्ञाने बले समता सर्वदास्ति तथाऽपि कामः किंचिदूनः सदैव ॥ ३ ॥
एवं स्तुत्वा देवदेवो हरिं च तूष्णीं स्थितः प्रांजलिर्नम्रमूर्धा ।
तदनन्तरजो ब्रह्मा ह्याहंकारिक ऊचिवान् ॥ ४ ॥

आहंकारिक उवाच

नमस्ते गुणपूर्णाय नमस्ते ज्ञानमूर्तये ।
नमोऽज्ञानविदूराय ब्रह्मणोऽनन्तमूर्तये ॥ ५ ॥
इन्द्रादहं दशगुणैः सर्वदा न्यून उक्तो न जाने त्वां सर्वदा ह्यप्रमेय ।
तथापि मां पाहि जगद्गुरो त्वं दत्वा दिव्यं ह्यायतनं च विष्णो ॥ ६ ॥
आहंकारिक एवं तु स्तुत्वा तूष्णीं बभूव ह ।
तदनन्तरजा स्तोतुं शची समुपचक्रमे ॥ ७ ॥

शच्युवाच

संचिन्तयामि ह्यनिशं तव पादपद्मं वज्रांकुशध्वजसरोरुहलांछनाढ्यम् ।
योगीश्वरैरपि सदा मनसापि धर्तुं नो शक्यमीश तव पादरजः स्मरामि ॥ ८ ॥
आहंकारिकप्राणाच्च गुणैश्च दशभिः सदा ।
न्यूनभूतां च मां पाहि कृपालो भक्तवत्सल ॥ ९ ॥

एवं स्तुत्वा शची देवी तूर्ष्णीं स्थितवती ह्यभूत् ।
तदनन्तरजा स्तोतुं रतिः समुपचक्रमे ॥ १० ॥

रतिरुवाच

संचिन्तयामि नृहरेर्वदनारविन्दं भृत्यानुकम्पितधिया हि गृहीतमूर्तिम् ।
यच्छ्रीनिकेतनमजरुद्रविपादिकैश्च संलालितं कुटिलकुन्तलवृन्दजुष्टम् ॥ ११ ॥
एतादृशं तव मुखं नुवितुं नशक्तिः शच्या समापि भगवन् परिपाहि नित्यम् ।
कृत्वा स्तुतिं रतिरिमां परमादरेण तूर्ष्णीं स्थिता भगवतश्च समीप एव ॥ १२ ॥
रत्यनन्तरजो दक्षः स्तोतुं समुपचक्रमे ॥

दक्ष उवाच

संचिन्तये भगवतश्चरणोदतीर्थं भक्त्या ह्यजेन परिषिक्तमजादिवन्द्यम् ।
यच्छौचनिःसृतमजप्रवरावतारं गंगाख्यतीर्थमभवत्सरितां वरिष्ठं ॥ १३ ॥
रुद्रोऽपि तेन विधृतेन जटाकलापपूतेन पादरजसा ह्यशिवः शिवोऽभूत् ।
एतादृशं हि चरणं करुणेश विष्णो स्तोतुं हि शक्तिरपि नास्ति कृतावतार ॥
रत्या समः सृतिगतो न गतोऽस्मि मोक्षमेतादृशं च परिपाहि निदानमूर्ते ॥ १४ ॥
एवं स्तुत्वा स दक्षस्तु तूर्ष्णीमेव बभूव ह ।
तदनन्तरजः स्तोतुं बृहस्पतिरुपाक्रमत् ॥ १५ ॥

बृहस्पतिरुवाच

संचिन्तयामि सततं तव चाननाब्जं त्वं देहि दुष्टविषयेषु विरक्तिमीश ॥ १६ ॥
एतेषु सक्तिर्यदि वै स जीवो कर्ता च भोक्ता च सदा च दाता ।
पोष्टा च पुत्रसुहृदा च पशूंश्च सर्वमेवं विनश्यति यतो हि तदाशु छिन्दि ॥ १७ ॥

अनिरुद्ध उवाच

योऽहं हरे तव कथां रसिकां विहाय स्त्रीणां भगे च वदने परिमुह्य नित्यम्।
विष्ठांत्रपूरितबिले रसिको हि नित्यं स्थायी च सूकरवदेव विमूढबुद्धिः ॥ २० ॥

मज्जास्थिपित्तकफरक्तमलादिपूर्णे चर्मान्त्रवेष्टितमुखे पतितं हि भीतम् ।
आस्वादने मम च पापगतेर्मुरारे मायाबलं तव विभो परमं निमित्तम् ॥ २१ ॥
संसारचक्रे भ्रमतश्च नित्यं सुदुःखरूपे सुखलेशवर्जिते ।
मलं वमन्तं नवभिश्च द्वारैः शरीरमारुह्य सुमूढबुद्धिः ॥ २२ ॥
नमामि नित्यं तव सत्कथामृतं विहाय देव सृतिमूलनाशनम् ।
कुटुम्बपोषं च सदा च कुर्वन् दानाद्यकुर्वन्निवसन् गृहे च ॥ २३ ॥
दूरे च संसारमलं त्विदं कुरु देहि ह्यदो दिव्यकथामृतं सदा ।
एतादृशोऽहं तव सद्गुणौघं स्तोतुं समर्थो नास्मि शचीसमश्च ॥ २४ ॥
एवं स्तुत्वानिरुद्धस्तु तूष्णीमास खगेश्वर ।
तदनन्तरजः स्तोतुं मनुः स्वायम्भुवोऽब्रवीत् ॥ २५ ॥

स्वायम्भुव उवाच

सोऽहं विभो ह्यनुभवन्नपि गर्भदुःखं तस्माद्बहिर्गतवतोऽपि गृहान्धकूपे ।
(तत्र स्थितश्च बहुदुःखभुजेऽपि नित्यं तान् त्यक्षितुं न भवति मम सुष्ठुबुद्धिः ॥
एतादृशांश्च मम दोषगणानगण्यान्देवोत्तम त्वमगणय्य नु मां तु पाहि ।
एतादृशश्च स्तवने क्व च शक्तिरस्ति शच्या समं च परिपाहि त्वमेव नित्यम् ॥
एवं स्तुत्वा मनुर्विप्र तूष्णीमेव ह्यवस्थितः ।
शच्याद्याश्च षडाह्येते समा एव न संशयः ॥
मनोरनन्तरजो प्रवहो वायुसत्तमः ।
विनयावनतो भूत्वा स्तोतुं समुपचक्रमे ॥

प्रवह उवाच

त्वमेव भगवन् विष्णो देवदेव जगत्पते ।
विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ॥
पाहि मां दयया विष्णो गुरोर्दक्षादिकस्य च ।

(.......) विद्यमानाः श्लोकाः रामतत्त्वप्रकाशनपुस्तके अधिकतया पठिताः ।

सदा पंचगुणैर्हीन अतिवाहकसंज्ञकः ॥
नासिक्यापरनामाहं तथा भौतिकनामकः ।
एवं स्तुत्वा तु प्रवहस्तूष्णीमास खगोत्तम ॥
प्रवहस्यानन्तरजो यमः स्तोतुं प्रचक्रमे ।

यम उवाच

नमस्तेऽमिततत्त्वाय ब्रह्मादीनां च हेतवे ।
निर्गुणस्य तवोत्कृष्टं नाहं वेद परोऽपि वा ॥
अहं तु प्रवहाच्चैव द्विगुणादधमः स्मृतः ।
स्तवने देवदेवेश क्व च शक्तिर्ममेश्वर ॥
तथाप्यायतनं दत्वा त्राहि मां करुणाकर ॥
शतरूपा मनोर्भार्यायमानन्तरजा स्मृता ।
स्वायंभुवप्रिया देवं स्तोतुं समुपचक्रमे ॥

शतरूपोवाच

नेह पत्युर्नधर्माय नविरागाय कल्पते ।
न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ॥
साहं भगवतो नूनं वंचिता मायया दृढम् ।
यत्त्वां विरक्तिदं प्राप्य स्तोतुं शक्तिर्न चास्ति मे ॥
एवं तु शतरूपा सा तूर्ष्णी स्थित्वा बभूव ह ।
शतरूपानन्तरजश्चन्द्रो वचनमब्रवीत् ॥

चन्द्र उवाच

तावद्भयं मम विभो द्रविणाच्च देहाच्छोकस्पृहापरिभवो विपुलश्च लोभः ।
तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्नतेऽङ्घ्रिमभयं प्रवृणोमि सोऽहम् ॥

सूर्य उवाच

ब्रह्मा भवेन्द्रौ मुनयश्च सर्वे ये देहभाजश्च तव स्वरूपम् ।
विदुः प्रमाणं बलवीर्ययोर्वा नैवात्मतन्त्रस्य समीरितुं वा ॥

एतादृशं मां करुणार्द्रदृष्ट्या पाहीश मे ह्यायतनं च दत्वा ।
सदाप्यहं चन्द्रसमान एवेत्येवं हि स्तुत्वा स बभूव तूष्णीम् ॥

यमस्तु पापिनां शास्ता मनुभार्या च मानवी ।
दिशोऽभिमानी चन्द्रस्तु सूर्यश्चक्षुर्नियामकः ॥)

मनोर्भार्या मानवी च यमः संयमिनीपतिः ।
दिशोऽभिमानी चन्द्रस्तु सूर्यश्चक्षुर्नियामकः ॥
परस्परसमा ह्येते मुक्तौ संसार एव च ॥ २७ ॥

प्रवहाद्विगुणोनाश्चेत्येवं जानीहि चाण्डज ।
सूर्यानन्तरजः स्तोतुं वरुणः संप्रचक्रमे ॥ २८ ॥

वरुण उवाच

त्वदिच्छया रचिते देहगेहे पुत्रे कलत्रेऽपि धने द्रव्यजातौ ।
ममाहमित्यल्पधिया च मूढा संसारदुःखे विनिमज्जन्ति सर्वे ॥ २९ ॥

अतो हरे तादृशीं मे कुबुद्धिं विनाश्य मे देहि सदैव दास्यम् ।
अहं मनोः पादपादार्धभूतगुणेन हीनः सर्वदा वै मुरारे ॥ ३० ॥

एवं स्तुत्वा तु वरुणः प्रांजलिः समुपस्थितः ।
वरुणानन्तरोत्पन्नो नारदो ह्यस्तुवद्धरिम् ॥ ३१ ॥

नारद उवाच

यन्नामधेयश्रवणानुकीर्तनात्स्वाद्वन्यतत्त्वं मम नास्ति विष्णो ।
पुनीह्यतश्चैव परोवरीयान् यज्जिह्वाग्रे वर्तते नाम तस्य ॥ ३२ ॥
यज्जिह्वाग्रे हरिनामैव नास्ति स ब्राह्मणो नैव स एव गोखरः ।
अहं न जाने च तव स्वरूपं न्यूनो ह्यहं वरुणात्सर्वदैव ॥ ३३ ॥
एवं स्तुत्वा नारदो वै खगेन्द्र तूष्णीमभूद्देवदेवस्य चाग्रे ।
यो नारदानन्तरं संबभूव भृगुर्महात्मा स्तोतुमुपप्रचक्रमे ॥ ३४ ॥

भृगुरुवाच

किमासनं ते गरुडासनाय किं भूषणं कौस्तुभभूषणाय ।
लक्ष्मीकलत्राय किमस्ति देयं वागीशं किन्ते वचनीयमस्ति ॥ ३५ ॥
अतो न जाने तव सद्गुणांश्च ह्यहं सदा वरुणात्पादहीनः ।
एवं स्तुत्वा हरिं देवं भृगुस्तूर्ष्णीं बभूव ह ।
तदनन्तरजो ह्यग्निरस्तावीत्पुरुषोत्तमम् ॥ ३६ ॥

अग्निरुवाच

यत्तेजसाहं सुसमद्धितेजा हव्यं वहाम्यध्वरं आज्यसिक्तम् ।
यत्तेजसाहं जठरे संप्रविश्य पचन्नन्नं सर्वदा पूर्णशक्तिः ।
अतो न जाने तव सद्गुणांश्च भृगोरहं सर्वदा वै समोऽस्मि ॥ ३७ ॥
तदनन्तरजा स्तोतुं प्रसूतिरुपचक्रमे ।

प्रसूतिरुवाच

यन्नामार्थविचारणेऽपि मुनयो मुह्यन्ति वै सर्वदा
त्वद्भीता अपि देवता ह्यविरतं स्त्रीभिः सहैव स्थिताः ।
मान्धातृध्रुवनारदाश्च भृगवो वैवस्वताद्याखिलाः
प्रेम्णा वे प्रणमाम्यहं हितकृते तस्मै नमो विष्णवे ॥ ३८ ॥
अतो न जाने तव सद्गुणान्सदा चैवंविधा का मम शक्तिरस्ति ।
स्तुत्वा ह्येवं प्रसूतिस्तु तूष्णीमासीत्खगेश्वर ॥ ३९ ॥
अग्निर्वागात्मको ब्रह्मपुत्रो भृगुऋषिस्तथा ।
तद्भार्या वै प्रसूतिस्तु त्रय एते समा मताः ॥ ४० ॥
वरुणात्पादहीनाश्चप्रवहाद्द्विगुणाधमाः ।
दक्षाच्छतावरा ज्ञेया मित्रात्तु द्विगुणाधिकाः ॥ ४१ ॥
प्रसूत्यनन्तरं जातो वसिष्ठो ब्रह्मनन्दनः ।
विनयावनतो भूत्वा स्तोतुं समुपचक्रमे ॥ ४२ ॥

वसिष्ठ उवाच

नमोऽस्तु तस्मै पुरुषाय वेधसे नमो नमोऽसद्वृजिनच्छिदे नमः ।
नमो नमः स्वाङ्गभवाय नित्यं नतोऽस्मि हे नाथ तवांघ्रिपंकजम् ।। ४३ ।।

स्वरूपानुभवाय

मां पाहि नित्यं भगवन्वासुदेव ह्यग्रेरहं सर्वदा न्यून एव ।
मित्रादहं सर्वदा किंचिदूनः स्तुत्वा देवं सोऽभवत्तत्र तूष्णीम् ।। ४४ ।।
यो वसिष्ठानन्तरजो मरीचिर्ब्रह्मनन्दनः ।
हरिं तुष्टाव परया भक्त्या नारायणं गुरुम् ।। ४५ ।।

मरीचिरुवाच

दैवेन चाहं हतधीर्भवतः प्रसंगात्सर्वाशुभोपगमनाद्विमुखेन्द्रियश्च ।
कुर्वे च नित्यं सुखलेशलवादिना त्वद्दूरं मनस्त्वशुभकर्म समाचरिष्ये ।। ४६ ।।
एतादृशोऽहं भगवन्नतः सदा वसिष्ठविप्रस्य समान एव ।
एवं स्तुत्वा मरीचिस्तु तूष्णीमास तदा खग ।
तदनन्तरजो ह्यत्रिरस्तुवत् प्रांजलिर्हरिम् ।। ४७ ।।

अत्रिरुवाच

पश्याम्यहं भगवतश्च तव स्वरूपं ह्यानन्द*...रभत एव विकारशून्यम् ।
त्रैगुण्यशून्यमखिलेषु च संविभक्तं तत्र प्रविश्य भगवन्न हि पश्यतीव ।
अतो मुरारेस्तव सद्गुणांश्च स्तोतुं न शक्नोमि मरीचितुल्यः ।। ४९ ।।
एवं स्तुत्वा ह्यत्रिरपि तूष्णीमास तदा खग ।
तदनन्तरजः स्तोतुमंगिरा वाक्यमब्रवीत् ।। ५० ।।

अंगिरा उवाच

द्रष्टुं न शक्नोमि तव स्वरूपं ह्यनन्तबाहूदरमस्तकं च ।
अनन्तसाहस्रकिरीटजुष्टं महार्हनानाभरणैश्च शोभितम् ।। ५१ ।।

---

*.... अत्र मूलपुस्तके शब्दः अस्पष्टः ।

एतादृशं रूपमनन्तपारं स्तोतुं ह्यशक्तस्तु समोऽस्मि चात्रेः ।
एवं स्तुत्वा ह्यंगिराश्च तूष्णीमास खगेश्वर ।
तदनन्तरजः स्तोतुं पुलस्त्यो वाक्यमब्रवीत् ॥ ५२ ॥

पुलस्त्य उवाच

यो वा हरिस्तु भगवान्स उपासकानां सन्दर्शयेद्भुवनमंगलमंगलश्च ॥ ५३ ॥
तस्मै नमो भगवते पुरुषाय तुभ्यं यो नार्चितो निरयभाग्भिरसत्प्रसंगैः ।
एतादृशं तव गुणान्नवितुं न शक्तं मां पाहि नित्यं सममङ्गिरस्य ॥ ५४ ॥
एवं स्तुत्वा पुलस्त्योऽपि तूष्णीमेव बभूव ह ।
तदनन्तरजः स्तोतुं पुलस्त्यो वाक्यमब्रवीत् ॥ ५५ ॥

पुलह उवाच

निष्कामरूपरहितं न समर्पितं च स्नानाध्वरं व्रतसुदानजपादिकं च ।
आराधनं भगवतस्तव सत्क्रियाश्च व्यर्थं भवेदिति वदन्ति महानुभावाः ॥ ५६ ॥
तस्मै सदा भगवते प्रणमामि नित्यं निष्कामया तव समर्पणया च बुद्ध्या ।
वैकुण्ठनाथ भगवंस्तवने न शक्तिः सोऽहं पुलस्त्यसदृशोऽस्मि न संशयोऽत्र ॥ ५७ ॥
एवं स्तुत्वा तु पुलहस्तूष्णीमास तदा खग ।
तदनन्तरजः स्तोतुं क्रतुः समुपचक्रमे ॥ ५८ ॥

क्रतुरुवाच

प्राणप्रयाणसमये भगवंस्तवैव नामानि संसृतिजदुःखविनाशकानि ।
येनैकजन्मशमलं सहसैव हित्वा संयाति मुक्तिममलां तमहं प्रपद्ये ॥ ५९ ॥
ये भक्त्या विवशा विष्णोर्नाममात्रैकजल्पकाः ।
तेपि मुक्तिं प्रयान्त्याशु किमुत ध्यायिनः सदा ॥ ६० ॥
एवं स्तुत्वा क्रतुरपि तूष्णीमास खगेश्वर ।
तदनन्तरजः स्तोतुं मनुर्वैवस्वतोऽब्रवीत् ॥ ६१ ॥

मनुरुवाच

सोऽहं ह्यकर्मकरणे निरतः सदैव स्त्रीणां च भोगनिरतश्च गुदे प्रमत्तः ।
जिह्वेन्द्रिये च निरतस्तव दर्शने च सम्यग्विरागसहितः परमादरेण ॥ ६२ ॥
मज्जास्थिमांसरुधिरैः सहिते च देहे रक्तः सदैव तव भक्तजने विरक्तः ।
गुर्वग्निब्राह्मणगवादिषु सत्सु दुःखात्सम्यग्विरक्तिमुपयामि सहस्व नित्यम् ॥ ६३ ॥
लोकानुवादश्रवणे परमा च शक्तिर्नारायणस्य नमने न च मेऽस्ति शक्तिः ।
लोकानुयानकरणे परमा च शक्तिः क्षेत्रादिमार्गगमने परमा ह्यशक्तिः ॥ ६४ ॥
वैश्यादिकेषु धनिकेषु परा च शक्तिः सद्ब्राह्मणेष्वपि न शक्तिरहो मुरारे ॥ ६५ ॥
वैवस्वतमनुर्देवं स्तुत्वा तूष्णीं बभूव ह ।
तदनन्तरजः स्तोतुं विश्वामित्रोपचक्रमे ॥ ६६ ॥

विश्वामित्र उवाच

न ध्याते चरणाम्बुजे भगवतो सन्ध्यापि नानुष्ठिता
ज्ञानद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
अन्तर्व्याप्तमलाभिघातकरणे पद्वी श्रुता ते कथा
नो देव श्रवणेन पाहि भगवान् मामत्रिततुल्यं सदा ॥ ६७ ॥
विश्वामित्रऋषिस्त्वेवं स्तुत्वा तूष्णीं बभूव ह ।
भृगुनारददक्षांश्च विहाय ब्रह्मपुत्रकाः ॥ ६८ ॥
सप्तसंख्या वशिष्ठाद्या विश्वामित्रस्तथैव च ।
वैवस्वतमनुस्त्वेते परस्परसमाः स्मृताः ॥ ६९ ॥
वह्नेरप्यवरा नित्यं किंचिन्मात्रागुणाधिकाः ।
तदनन्तरजस्तोत्रं वक्ष्ये श्रुणु खगेश्वर ॥ ७० ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे
देवादिस्तुतितत्तत्तारतम्यनिरूपणं
नाम सप्तमोऽध्यायः ॥ ७ ॥

॥ अष्टमोऽध्यायः ॥

क्रतोरनन्तरं जातो मित्रो नाम खगेश्वर ।
नारायणं जगद्योनिं स्तोतुं समुपचक्रमे ॥ १ ॥

मित्र उवाच

नतोऽस्म्यहं त्वच्चरणारविन्दं भवच्छिदं स्वस्त्ययनं भवच्छिदे ।
वेद स्वयं भगवान्वासुदेवो नाहं नाग्निर्नात्रिदेवा मुनीन्द्राः ॥ २ ॥

अथापरे भागवतप्रधाना यदा न जानीयुरथापरे कुतः ।
मां पाहि नित्यं परतोऽप्यधीश विश्वामित्रान्न्यून एवेति नित्यम् ॥ ३ ॥

अहं पर्जन्याद्द्विगुणाधमाश्च अतो मम स्तवने नास्ति शक्तिः ।
एवं स्तुत्वा हरिं मित्रस्तूष्णीमास तदा खग ।
तदनन्तरजा तारा स्तोतुं समुपचक्रमे ॥ ४ ॥

तारोवाच

अनन्येन तु भावेन भक्तिं कुर्वन्ति ये दृढाम् ।
त्वत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः ॥ ५ ॥

त्वदाश्रयां कथां श्रुत्वा श्रुण्वन्ति च रमन्ति च । (कथयन्ति च)
त एव साधवो विष्णो सर्वसंगविवर्जिताः ॥ ६ ॥

तन्मध्ये पतितां पाहि सदा मित्रसमां प्रभो ।
तारानन्तरजः प्राह निर्ऋतिश्च खगेश्वर[1] ॥ ७ ॥

निर्ऋतिरुवाच

योगेन त्वर्य्यपितया च भक्त्या संयान्ति लोकाः परमां गतिं च ।
आसेवया सर्वगुणाधिकानां ज्ञानेन वैराग्ययुतेन देवे ॥ ८ ॥

---

१. निर्ऋती राक्षसेश्वरः ।

चित्तस्य निग्रहेणैव विष्णोर्यान्ति परं पदम् ।
अतो मां पाहि दयया सदा तारासमं प्रभो ॥ ९ ॥

तदनन्तरजा स्तोतुं प्रावही तं प्रचक्रमे ।

प्रावह्युवाच

सतां प्रसंगेन भवन्ति वीर्यात्तव प्रसादात्परमाः संपदश्च[1] ।
या ह्युत्तमश्लोकरसायनाः कथास्तत्सेवनादाश्वपवर्गवर्त्मनि ॥ १० ॥

भक्तिर्भवेत्सर्वदा देवदेव सदाप्यहं निर्ऋतेः साम्यमेव ।
राहुयुग्भीष्मको मित्रः कृपी तारा प्रकीर्तिता ॥ ११ ॥

कोणाधिपो निर्ऋतिश्च प्रावही प्रवहप्रिया ।
चत्वार एते पर्जन्यात्त्रिगुणाः परिकीर्तिताः ॥ १२ ॥

तदनन्तरजान् वक्ष्ये ताञ्छ्रुणु त्वं खगेश्वर ।
प्रवहभार्यानन्तरजो विष्वक्सेनोऽथ पार्षदः ॥ १३ ॥

वायुपुत्रो महाभागः हरिं स्तोतुं प्रचक्रमे ।

विष्वक्सेन उवाच

भगवान्मोक्षदः कृष्णः पूर्णानन्दः सदा यदि ।
यदि स्यात्परमा भक्तिः ह्यपरोक्षत्वसाधना ॥ १४ ॥

तथा स्वगुरुमारभ्य ब्रह्मान्तेषु च साधुषु ।
[2]तद्योग्यतानुसारेण भक्तिर्निष्कपटा यदि ॥ १५ ॥

तुलस्यादिषु जीवेषु स्यात्प्रीतिर्यदि सर्वदा ।
संसृतेश्च तदा नाशो भूयादेव न संशयः ॥ १६ ॥

एवं स्तुत्वा महाभागो विष्वक्सेनो महाप्रभो ।
तूर्ष्णीं बभूव गरुड प्रांजलिर्नम्रकन्धरः ॥ १७ ॥

---

१. परमाश्च सम्पदः २. तत्तद्योग्यानुसारेण

मित्रादहं न्यून एव नात्र कार्या विचारणा ।
तदनन्तरजौ सम्यगूचतुर्ह्यश्विनौ प्रभो ।

अश्विनावूचतुः

भगवत्सङ्गिनां सङ्गमावयोर्देहि सर्वदा ॥
यत्र नारायणो देव ईड्यते सत्कथादिभिः ।
निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ॥
प्रसूयते सत्कथासु मुक्तसङ्गैः कदा पुनः ।
अतश्चैव महाभाग विष्वक्सेनसमौ स्मृतौ ॥
तयोरनन्तरोत्पन्नो गणपो वाक्यमब्रवीत् ।

गणपतिरुवाच

न कामयेऽन्यं तव पादमूलादन्यच्च सर्वं सृतिमूलं वदन्ति ॥
महत्तमान्तर्हृदयान्मुखच्युतं विधत्स्व कर्णामृतमेव वीर ।
नैवास्ति शक्तिः स्तवने देवदेव मित्रादहं न्यून एवं सदाऽपि ॥
तदनन्तरजः स्तोतुं कुबेरस्तूपचक्रमे ।

कुबेर उवाच

अहं वै बालिशो विष्णो अधर्मे धर्ममान्यहम् ॥
ये वृत्तिदं हरिं हित्वा अन्यदेवमुपासते ।
नावजानन्ति त्वां मूढाः संसारार्णवतारकम् ॥
नानुविन्दामि भद्रं च इहलोके परत्र च ।
एतादृशं च मां पाहि मित्राद्वै बाह्यमंजसा ॥
एवं स्तुत्वा कुबेरस्तु तूष्णीमेव खगेश्वर ।
तदनन्तरजाः सप्त वसवो ह्यग्निवर्जिताः ॥

सप्तदश(१७)श्लोकानन्तरं अध्यायसमाप्तिपर्यन्तं परिदृश्यमानाः श्लोकाः ''**नाग पब्लिकेशन्स्**'' पुस्तके न सन्ति, **रामतत्त्वप्रकाशनस्य** पुस्तके विद्यन्ते ।

अग्निव्यतिरिक्तसप्तवसव ऊचुः

नारायण त्वं ह्यभिमानहीनो वयं तु सर्वे अभिमानवन्तः ।
त्वच्चेष्टितं नैव विदाम सर्वे ह्यस्मान्पाहि सर्वदा ह्यश्वितुल्यान् ॥

एवं स्तुत्वा हि वसवस्तूष्णीमासन् खगेश्वर ।
तेषांमन्तरजाः प्रोचुर्मूलरुद्रादृते दश ।

मूलरुद्रादृते दशरुद्रा ऊचुः

अयं नो मनःक्लेशदावाग्निदग्धस्तृषार्तोऽवगाह्यो कथामृष्टपीयूषनद्यां ।
न सस्मार दावं सुखदुःखरूपं न निष्क्रामति प्रभो ब्रह्म संपन्न एव ।

अतस्तव कथां दिव्यां दत्वास्मान्पाहि सर्वदा ।
वयं तु वित्तपेन तुल्या नात्र विचारणा ॥

तदनन्तरजाः सप्तचत्वारिंशन्मरुद्गणाः ।
अहंकारिकप्रवाहाभ्यां व्यतिरिक्ता तदाऽस्तुवन् ।

चत्वारिंशन्मरुद्गणाः ऊचुः

अच्युतानन्त गोविन्द दृश्यमानमिदं वपुः ।
जगदुत्पादकं तद्धि तथानन्दकरं दृशाम् ।
वयं तु सर्वदा ब्रह्मन् विवक्सेनसमाः स्मृताः ॥
तदनन्तरजा ऊचुर्विश्वदेवा महाबलाः ।

दशविश्वेदेवाः ऊचुः

प्रसीदेश महादेव ध्यायेम च सदा तव ।
मुखाख्यमण्डलं चन्द्रं सर्वदैव सुखप्रदम् ॥
देवानां चैव साधूनां दैत्यानामनुवर्तिनाम् ।
अतः पाहि दयालोऽस्मान् विष्वक्सेनसमान्सदा ॥
तदनन्तरजा ऊचुर्ऋभवश्चैव एव तु ।

ऋभव ऊचुः

ध्यायेम नित्यमखिलं तव सुस्वरूपं श्रीब्रह्मरुद्रमरुदादिगणैः सुलालितम् ।
श्यामं हिरण्यवसनं च किरीटजुष्टं नीलालकभ्रमरमण्डित कुण्डलास्यम् ॥
अतः पाहि महाविष्णो वित्तपस्य समाः सदा ।

तदनन्तरजा ऊचुः पितरस्त्रय एव तु ॥

पितर ऊचुः

तव स्वरूपं न तु वेद कश्चन सनत्कुमारो न तु देवलो मुनिः ।
न ब्रह्मपुत्रा मुनयः सुरेशा वयं विदामो न किमत्र चित्रम् ॥

अतोऽस्मान्पाहि देवेश विष्वक्सेनसमा स्मृताः ।
एवं मिलित्वा षडशीतिदेवास्तथाऽश्विनौ वायुजो वित्तपश्च ॥

सख्येन युक्तश्च परस्परं ते च समाः स्मृताः ।
विष्वक्सेनप्रभृतयो देवा नवतिसंख्यकाः ॥

तदनन्तरजान् देवांच्छृणु पक्षीन्द्रसत्तम ।
तदनन्तरजाः सर्वे जयाद्या विष्णुपार्षदाः ॥
हरिं नारायणं स्तोतुं ऊचुः प्रांजलयश्च ते ॥

जयाद्या ऊचुः

वयं च ब्रह्मेशवृषप्रधानाः प्रजेश भूतेश सुरेश मुख्याः ।
सर्वे वयं यन्नियमप्रपन्ना मूर्ध्नार्पितं लोकहितं वहामः ॥

वर्ये गणपतेश्चापि ह्यवराः परिकीर्तिताः ।
कर्मजेभ्यः सदा श्रेष्ठा इति विज्ञापनं प्रभो ॥

जयाद्यनन्तरजो यस्तु पावकाख्योऽग्निपुत्रकः ।
हरिं तुष्टाव परया भक्त्या परमया मुदा ।

प्रधानपुत्रपावक उवाच

जयतु जयतु देवो देवकीनन्दनोऽसौ जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥

अहं तु वह्नेर्ह्यधमः सदा शतगुणेन वै ।
विघ्नेशादधमः प्रोक्तः पर्जन्यादुत्तमो मतः ॥

तदनन्तरजा ऊचुरेकादशविधा प्रभो ।
मनवश्च तथा स्तोतुं हरिं समुपचक्रमुः ॥

एकादशमनव ऊचुः

विस्तीर्णनेत्रं परिपूर्णगात्रं लक्ष्मीकलत्रं सुरवैरिशत्रुम् ।
वायोश्च मित्रं जगतः पवित्रं श्रीविष्णुरत्नं प्रणताः स्म नित्यम् ॥

वयं हरे पावकस्य समाश्चैव न संशयः ।
अतोऽस्मान्पाहि देवेश दत्वा ह्यायतनं विभो ॥

तदनन्तरजाः प्रोचुः पितरः सप्तसंख्यकाः ।

सप्तपितर ऊचुः

गोकोटिदानं ग्रहणेषु दद्यात्प्रयागगङ्गोदककल्पवासः ।
यज्ञायुतं मेरुसुवर्णदानं गोविन्दकीर्तनसमं न शतांशतुल्यम् ॥

त्वन्नामस्मरणं नित्यं कुर्वतोऽस्मांश्च भो प्रभो ।
पाहि पाहि जगन्नाथ पावकस्य समान्सदा ॥

तदनन्तरजः स्तोतुं च्यवनो नाम भार्गवः ।

च्यवन उवाच

हरेर्हि मङ्गलं नाम यस्य वाचि प्रवर्तते ।
भस्मीभवन्ति देवेश महापातककोटयः ॥

हरेर्नामैव नामैव नामैव मम जीवनम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ।।

अतः पाहि महाभाग पितृणां च समं सदा ।
तदनन्तरजः स्तोतुं हरिं समुपचक्रमे ।।

उतथ्य उवाच

गोविन्देति सदा स्नानं गोविन्देति सदा जपः ।
गोविन्देति सदा ध्यानं सदा गोविन्दकीर्तनम् ।।

सारं भागीरथीतोयं सारं जाप्यं च वैष्णवम् ।
ब्रह्मचर्यं तपः सारं सारं माधवचिन्तनम् ।।

नाम्नोऽस्ति यावती शक्तिः पापनिर्हरणे हरेः ।
तावत्कर्तुं न शक्नोति पातकं पातकीजनः ।।

अतस्त्वन्नाम्नि भक्तं मां पाहि च्यवनसमं प्रभो ।
तदनन्तरजा ऊचुर्बल्याद्याः कर्मदेवताः ।।

बल्याद्या ऊचुः

जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः ।
नराणां क्षीणपापानां हरौ भक्तिः प्रजायते ।।

कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ।।

एतावदेव जानीमो ह्यतोऽस्मान्पाहि माधव ।
उतथ्यस्य समाः सर्वे नात्र कार्या विचारणा ।।

तदनन्तरजा ऊचुर्गन्धर्वेष्वष्टकाः खग ।

गन्धर्वाष्टका ऊचुः

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।

त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ।।

वासुदेवस्य ये भक्ताः शान्तास्तद्गतमानसाः ।
तेषां दासस्य दासोऽहं भवे जन्मनि जन्मनि ।।

अतोऽस्मान्पाहि गोविन्द बल्यादिनां सदा समान् ।
तदनन्तरजश्चैव प्रह्लादः सूक्ष्मरूपकः ।

प्रह्लाद उवाच

मज्जन्मनः फलमिदं मधुकैठभारे मत्प्रार्थनीयमदनुग्रह एष एव ।
त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्यभृत्यस्य भृत्य इति मां स्मर लोकनाथ ।।

मां पाहि भक्तं गोविन्द बल्यादेश्च समं च मां ।
विघ्नेशादधमश्चाहं वह्नेः शतगुणाधमः ।।

पर्जन्यादुत्तमं विष्णो पाहि मां भवसागरात्
अग्निपुत्रानन्तरजा गङ्गा स्तोतुं प्रचक्रमे ।।

गङ्गोवाच

कृष्णे रताः कृष्णमनुस्मरन्ति रात्रौ च कृष्णं पुनरुत्थिता ये ।
ते भिन्नदेहाः प्रविशन्ति कृष्णे हविर्यथा मन्त्रहुतं हुताशे ।।

सदा त्वत्स्मरणे बुद्धिं दत्वा पाहि महाप्रभो ।
पावकादधमा नित्यं संसारे मोक्ष एव च ।

तदनन्तरजः स्तोतुं पर्जन्य उपचक्रमे ।

पर्जन्य उवाच

गोविन्द केशव जनार्दन वासुदेव विश्वेश विश्व मधुसूदन विश्वमूर्ते ।
श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष नारायणाच्युत जनार्दन ते नमोऽस्तु ।।

त्वद्भक्तभूतं मां पाहि सदा गङ्गासमः स्मृतः ।
तदनन्तरजा प्राह यमभार्या तु शामला ।।

शामलोवाच

कृष्णे रताः कृष्णमनुस्मरन्ति रात्रौ च नित्यं पुनरुत्थिता ये।
तेभिन्नदेहाः प्रविशन्ति कृष्णं हविर्यथा मन्त्रहुतं हुताशे ॥

त्वत्स्मारकां सदा पाहि गङ्गातुल्यां न संशयः।
तदनन्तरजा प्राह चन्द्रभार्या च रोहिणी ॥

रोहिण्युवाच

कीटेषु पक्षिषु मृगेषु सरीसृपेषु रक्षःपिशाचमनुजेष्वपि यत्र यत्र।
जातस्य मे भवतु केशव त्वत्प्रसादात्त्वय्येकभक्तिरचलाऽव्यभिचारिणी च ॥

अहं च सर्वदा नित्यं गङ्गायाश्च समा स्मृता।
तदनन्तरजा प्राह सूर्यभार्या च संज्ञका ॥

संज्ञोवाच

स्वकर्मफलनिर्दिष्टं यां यां योनिं व्रजाम्यहम्।
तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढाऽस्तु मे।

सदा मां पाहि देवेश गङ्गायाश्च समां प्रभो।
तदनन्तरजा प्राह ह्यनिरुद्धप्रिया विराट् ॥

विराडुवाच

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथां श्रोत्रद्वय त्वं श्रुणु।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मर्धन्नमाधोक्षजम् ॥

पाहि मां देवदेवेश संज्ञायाश्च समा स्मृता।
वरुणस्य भार्या गङ्गा तु यमभार्या तु शामला ॥

आदित्येष्वेव गणितः पर्जन्यो हि महामतिः।

आदित्यभार्या संज्ञा तु चन्द्रभार्या तु रोहिणी ॥
अनिरुद्धभार्या तु उषा तथा ब्रह्माण्डमानिनी ।
एता गङ्गादिषट्संज्ञाः परस्परसमा स्मृताः ।
पावकादधमा ज्ञेया मुक्तौ संसार एव च ॥
गङ्गानन्तरजा स्वाहा स्तोतुं समुपचक्रमे ।
अग्निभार्या सुविज्ञेया नारायणमनामयम् ।

स्वाहोवाच

मैवं विमोहति भवान् भवदुःखरूपं दातुं त्वमीश्वर हरे तव पादमूले ।
भक्तिं प्रदेहि च गुरौ हरिदासदासभृत्येषु देहि सदा परमं च सख्यम् ।
स्तोतुं गुणांस्तव विभो मम क्वास्ति शक्तिर्गङ्गादहं द्विगुणतो ह्यधमा च नित्यम् ।
तस्मात्त्वमेव हि च मां कृपयार्द्रदृष्ट्या सम्यक्प्रपाहि भगवन्जगतामधीश ॥
स्वाहानन्तरजो यस्तु बुधो नाम जलात्मकः ।

बुध उवाच

नमो नमस्तेऽखिलकारणाय नमो नमस्तेऽखिलपालकाय ।
नमो नमस्तेऽमरनायकाय नमो नमो दैत्यविमर्दनाय ॥
स्वहाधमोऽहं च सदा मुरारे क नाम शक्तिः स्तवने ममास्ति ।
स्वाहानन्तरजा प्राह अश्विभार्या उषा स्मृता ।
नामाभिमानिनी देवी स्तोतुं समुपचक्रमे ॥

उषोवाच

नमो नमो भक्तजनप्रियाय नमोनमः सज्जनरक्षकाय ।
नमो नमो दुर्जननाशनाय नमोऽस्तु तस्मै जगदीश्वराय ॥
बुधादहं सर्वदा न्यूनभूता स्वाहायाश्च दशगुणैर्न्यूनभूता ।
तस्मान्मम स्तवने क्वास्ति शक्तिर्दत्वा ह्यायतनं पाहि मां देवदेव ॥

अश्विभार्यानन्तरजो शनिः प्राह भुवात्मकः ।।

शनिरुवाच

नमो नमः कारणवामनाय नारायणायामितविक्रमाय ।
उषादहं न्यूनभूतो मुरारे दत्वा ह्यायतनं पाहि मां नित्यदेव ।
तदनन्तरजः प्राह कर्ममानी तु पुष्करः ।

पुष्कर उवाच

नमः पयोराशिविनाशनाय नमोऽस्तु सद्भक्तमनःस्थिताय ।
नमोऽस्तु यज्ञाङ्गविराजिताय नमोऽस्तु ते सज्जनवल्लभाय ।।
कर्माभिमानी पुष्कराख्याभिधोऽहं शनैश्चरात्सर्वदा न्यूनयुक्तः ।
एवंभूतस्य स्तवने नास्ति शक्तिर्दत्वा ह्यायतनं पाहि मां देवदेव ।।
पुष्करानन्तरजाः प्रोचुर्देवा आजानजाः प्रभो ।

आजानजा ऊचुः

नमो नमः कारणकारणाय नमोऽस्तु शब्दादिविवर्जिताय ।
नमोऽस्तु ते दिव्यसुखप्रदाय नमो नमो भक्तजनप्रियाय ।
न ह्यस्माकं स्तवने क्वास्ति शक्तिः सदा वयं पुष्करान्न्यूनभूताः ।

इति श्रीगरुडपुराणे ब्रह्मकाण्डे
विष्णुस्तुतिदेवतातारतम्यनिरूपणं
नाम अष्टमोऽध्यायः ।। ८ ।।

॥ नवमोऽध्यायः ॥

गरुड उवाच

आजानजस्वरूपं च ब्रूहि कृष्ण महामते ।
तदन्यांश्च क्रमेणैव वक्तुं कृष्ण त्वमर्हसि ॥ १ ॥

कृष्ण उवाच

आजानाख्या देवतास्तु तत्तद्देवकुले भवाः ।
आजानदेवतास्ता हि ताभ्योऽग्र्याः कर्मदेवताः ॥ २ ॥

विराधश्चारुदेष्णश्च तदा चित्ररथस्तथा ।
धृतराष्ट्रः किशोरश्च हूहूर्हाहास्तथैव च ॥ ३ ॥

विद्याधराश्चोग्रसेनो विश्वावसुपरावसू ।
चित्रसेनश्च गोपालो बलः पंचदश स्मृताः ॥ ४ ॥

एवमाद्याश्च गन्धर्वाः शतसंख्याः खगेश्वर ।
आजानजसमा ज्ञेया मुक्तौ संसार एव च ॥ ५ ॥

आजानजास्तु ये देवाः [१]कर्मजेभ्यः शतावराः ।
घृताची मेनका रम्भा उर्वशी च तिलोत्तमा ॥ ६ ॥

सुकेशा शबरी चैव मञ्जुघोषा च पिङ्गला ।
इत्यादिकं ह्यप्सरसां सहस्रं परिकीर्तितम् ॥ ७ ॥

आजानजसमा ह्येते कर्मजेभ्यः शतावराः ।
विश्वामित्रो वसिष्ठश्च नारदश्च्यवनस्तथा ॥ ८ ॥

उतथ्यश्च मुनिश्चैतान् वर्जयित्वा खगेश्वर ।
ऋषयश्च महात्मानो ह्याजानजसमाः स्मृताः ॥ ९ ॥

---

१. कर्मजाच्च शतंवराः ।

शतर्चिः कश्यपो ज्ञेयो मध्यमश्च पराशरः ।
पावमान्यः प्रगाथश्च क्षुद्रसूक्तश्च देवलः ॥ १० ॥

गृत्समदो ह्यासुरिश्च भरद्वाजोऽथ मुद्गलः ।
उद्दालको ऋष्यशृङ्गः शंखः सत्यव्रतस्तथा ॥ ११ ॥

कवषो हरितः कण्वो विरूपो मुसलस्तथा ।
विष्णुवृद्धश्च ह्यात्रेयो श्रीवत्सो वत्सलेत्यपि ॥ १३ ॥

[1]भार्गवश्चाप्नवानश्च मांडूकेयस्तथैव च ।
मंडूकश्चैव जाबालिः वीतिहव्यस्तथैव च ॥ १४ ॥

गृत्समदः शौनकश्चेत्याद्या हि ऋषयः स्मृताः ।
एतेषां श्रवणादेव हरिः प्रीणाति सर्वदा ॥ १५ ॥

ब्रुवे व्यष्टसहस्रं च श्रुणु तार्क्ष्य मम स्त्रियः ।
अग्निपुत्रास्तु यद् व्यष्टसहस्रं (तु) च मम स्त्रियः ॥ १६ ॥

आजानजसमा ह्येता नात्र कार्या विचारणा ।
[2]त्वष्टुः पुत्री कशेरुश्च तासां मध्ये गुणाधिका ॥ १७ ॥

तदनन्तरजान्वक्ष्ये श्रुणु सम्यक् खगेश्वर ।
आजानेभ्यस्तु पितरः सप्तभ्योऽन्ये [3]शतावराः ॥ १८ ॥

शताधिकाः हि पितरः इति वेदविदां मतम् ।
तदनन्तरजान्वक्ष्ये श्रुणु सम्यक् खगेश्वर ॥ १९ ॥

अष्टभ्यो देवगन्धर्वा अष्टोत्तरशतं विना ।
तेभ्यः शतगुणानन्दा देवप्रेष्यास्तु मुख्यतः ॥ २० ॥

स्वमुखेनैव देवैश्च आज्ञाप्या देवतागणाः ।
आख्याता देवगन्धर्वास्तेभ्यस्ते चं [4]शतावराः ॥ २१ ॥

---

१. भार्गवश्चवनो और्वो । २. त्वष्टृपुत्री । ३. शतं वराः । ४. शतं वराः ।

तेभ्यस्तु क्षितिपा ज्ञेया अवराश्च शतैर्गुणैः ।
तेभ्यः शतगुणा ज्ञेया मानुषेषूत्तमा गणाः ॥ २२ ॥

एवं प्रासंगिकानुक्त्वा प्रकृतं (ह्यनुसरामि भोः) ह्यनुसराम्यहम् ।
एवं ब्रह्मादयो देवा लक्ष्म्याद्या अपि सर्वशः ॥ २३ ॥

स्तुत्वा तूर्ष्णीं स्थिताः सर्वे प्रांजलीकृत्य भो द्विज ।
इति स्तुतश्च देवेशो भगवान् हरिरव्ययः ॥ २४ ॥

तेषामायतनं देवो मनसा समचिन्तयन् ।
इदं पवित्रमारोग्यं पुण्यं पापप्रणाशनम् ॥ २५ ॥

हरिप्रसादजनकं स्वरूपसुखसाधनम् ।
इदं तु स्तवनं विप्रा न पठन्तीह मानवाः ॥ २६ ॥

न श्रुण्वन्ति च ये नित्यं ते सर्वे चैव मानिनः ।
न स्मरन्तोऽन्तरं नित्यं ये भुंजन्ति नराधमाः ।
तैर्भुक्तं सततं चैव विष्ठाकृमिशतैर्युतम् ॥ २७ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे
विष्णुस्तुतिदेवतातारतम्यनिरूपणं
नाम नवमोऽध्यायः ॥ ९ ॥

॥ दशमोऽध्यायः ॥

गरुड उवाच

देवैरेवं स्तुतो विष्णुर्भगवान्सात्वतां पतिः ।
कीदृशं ह्याश्रयं तेषां दत्वा स पर्यपालयत् ॥ १ ॥
एतद्वेदितुमिच्छामि कृष्ण कृष्ण महाप्रभो ।
सम्यग् ब्रूहि दयालो त्वं यदि मच्छ्रोत्रमर्हति ॥ २ ॥

कृष्ण उवाच

तेषु तत्वेषु भगावान् स विवेश महाप्रभुः ।
क्षोभयामास भगवान् सम्बन्धविधुरो हरिः ॥ ३ ॥
आदौ ससर्ज भगवान् ब्रह्माण्डं कनकात्मकम् ।
पंचाशत्कोटिविस्तीर्णं योजनानां समन्ततः ॥ ४ ॥
तदूर्ध्वमण्ववयवस्तावान् कनकरूपकः ।
वर्तते तत ऊर्ध्वं तु पंचाशत्कोटिभूतलम् ॥ ५ ॥
एवं कोटिशतं तस्यावयवः परिकीर्तितः ।
ततश्च सप्तावरणैः समन्तात्परिधीकृतम् ॥ ६ ॥
कबन्धावरणं ह्याद्यं कोट्या दशसहस्रकम् ।
द्वितीयावरणं ज्ञेयं पावकस्य महात्मनः ॥ ७ ॥
अपां दशगुणैर्युक्तं समन्तात्परिधीकृतम् ।
तृतीयावरणं ज्ञेयं ईरस्यैव महात्मनः ॥ ८ ॥
दशाधिकं पावकाच्च समन्तात्परिखीकृतम् ।
चतुर्थावरणंज्ञेयं नभसोऽपि महाप्रभो ॥ ९ ॥
ईराद्दशगुणैरेवं समन्तात्परिखीकृतम् ।
पंचमावरणं ज्ञेयं अहंकाराख्यमेव च ॥ १० ॥

व्योम्नो दशगुणैरेवं समन्तात्परिवारितम् ।
षष्ठमावरणं (ज्ञेयं) प्रोक्तं महत्तत्वं खगेश्वर ॥ ११ ॥
अहंकाराद्दशगुणं समन्तात्परिवारितम् ।
सप्तमावरणं प्रोक्तं त्रिगुणावरणं प्रभो ॥ १२ ॥
महत्तत्वाद्दशगुणैरधिकं परिकीर्तितम् ।
महत्तत्वानन्तरं च तमो ह्यावरणं स्मृतम् ॥ १३ ॥
महत्तत्वात्पंचगुणैरधिकं परिकीर्तितम् ।
तस्माच्च द्विगुणं ज्ञेयं रजो ह्यावरणं स्मृतम् ॥ १४ ॥
ततश्च द्विगुणं ज्ञेयं सत्वावरणमुत्तमम् ।
त्रयश्चैव मिलित्वा तु एकावरणमीरितम् ॥ १५ ॥
अव्याकृताख्यमाकाशं तदनन्तरमीरितम् ।
मर्यादारहितं तच्च तत्रास्ते हरिरीश्वरः ॥ १६ ॥
अष्टमावरणव्योम्नोरन्तरा विरजा नदी ।
पंचयोजनविस्तीर्णा समन्तात्परिधीकृता ॥ १७ ॥
अस्ति पुण्यतमा ज्ञेया लोकसंसारनाशिनी ।
ये वै चतुर्मुखेनैव मोक्षं विन्दन्ति मानवाः ॥ १९ ॥
अपरोक्षदृशामेवं ब्रह्मणा सह गामिनाम् ।
विरजातरणं विद्धि नान्येषां विनतासुत ॥ २० ॥
विरिंचेनैव साकं तु कल्पेस्मिन्नधिकारिणां ।
तेषां तु नियमेनैव सर्वप्रारब्धसंक्षयः ॥ २१ ॥
भवत्येवं न सन्देहो नान्येषां सर्वसंक्षयः ।
अतस्तु विरजातरणं तेषामेव भवेत्पटो ॥ २२ ॥
विरजातरणं नास्ति तेषां तत्संगिनां तथा ।
सर्वारब्धक्षयो नास्ति यतस्तेषां खगाधिप ॥ २३ ॥

अतश्च सर्वथा नास्ति विरजातरणं प्रभो ।
प्रलये विरजानद्या लयो नास्ति खगेश्वर ।। २४ ।।
लक्ष्म्यात्मिका तु सा ज्ञेया लिंगदेहविदारिणी ।
ब्रह्मत्वयोग्या ऋजवो नाम देवाः प्रकीर्तिताः ।। २५ ।।
तेऽपि प्रत्येकशः सन्ति ह्यनन्ताश्च पृथग्गणाः
पृथक् पृथक् च तैः सार्धं (साकं) मोक्षयोग्याः खगेश्वर ।। २६ ।।
जीवाः सन्ति ह्यनेके च प्रतिकल्पे सृजन्ति ते ।
द्वात्रिंशल्लक्षणैः सम्यक् युक्ता वायुत्वयोग्यकाः ।। २७ ।।
अष्टाविंशल्लक्षणैश्च गिरीशपदयोगिनः ।
चतुर्विंशतिमारभ्य षोडशाच्च सुराः स्मृताः ।। २८ ।।
आष्टकाद् ऋषयः प्रोक्तास्तदूनाश्चक्रवर्तिनः ।
शतजन्म समारभ्य ब्रह्मणः परमेष्ठिनः ।। २९ ।।
अपरोक्षमिति प्रोक्तं तथा ह्यारब्धसंक्षयः ।
एकोनशतकल्पेन वायुत्वं याति भो द्विज ।। ३० ।।
शतजन्मनि ब्रह्मत्वं याति पश्चाद्धरेः पदं।
चत्वारिंशद्ब्रह्मकल्पं समारभ्य खगेश्वर ।। ३१ ।।
रुद्रस्याप्यापरोक्षं स्यात् तथा प्रारब्धसंक्षयः ।
एकचत्वारिंशकल्पे शेषत्वं याति सुव्रत ।। ३२ ।।
ब्रह्मणा सह मोक्षं च याति सम्यङ् न चान्यथा ।
कल्पविंशतिमारभ्य ब्रह्मणः परमेष्ठिनः ।। ३३ ।।
इन्द्रस्याप्यापरोक्षं स्यात् तथा प्रारब्धसंक्षयः ।
दशकल्पं समारभ्य ब्रह्मणः परमेष्ठिनः ।। ३४ ।।
अर्कादीनामापरोक्ष्यं तथा ह्यारब्धसंशयः ।
ब्रह्मणैव सहायाति हरिं नारायणं परम् ।। ३५ ।।

गरुड उवाच

पंचाशीतिब्रह्मकल्पं समारभ्य महाप्रभो ।
रुद्रस्याप्यपरोक्षं स्यात् तथा प्रारब्धसंक्षयः ॥ ३५ ॥
इति श्रुतं मया ब्रह्मन् ब्रह्मणोक्तं हरेः प्रियात् ।
इत्थं त्वयोक्तं श्रीकृष्ण संशयो बाधते मम ॥ ३६ ॥
अतो मे संशयं छिन्दि यथा न स्यात् तथा पुनः ।
इति तद्वचनं श्रुत्वा कृष्णो वचनमब्रवीत् ॥ ३७ ॥

श्रीकृष्ण उवाच

ब्रह्मोक्तस्य मयोक्तस्य विवादो नास्ति सर्वथा ।
सन्देहस्त्वज्ञदृष्टीनां ज्ञानिनां नास्ति सर्वथा ॥ ३८ ॥
अशीतिर्ह्यष्टकाः प्रोक्ताः अष्टपंच खगेश्वर ।
चत्वारिंशद्ब्रह्मकल्पं एवं प्राह चतुर्मुखः ॥ ३९ ॥
तत्वानां बहुगोप्यत्वात्तथोक्तं ब्रह्मणा पुरा ।
अभिप्रायस्त्वेवमेव ज्ञातव्यो नात्र संशयः ॥ ४० ॥
पंचाशीति ब्रह्मकल्पं ये विजानन्ति (खगेश्वर) भो द्विज ।
तेऽन्धन्तमः प्रविशन्ति सत्यं सत्यं मयोदितम् ॥ ४१ ॥
विरजानन्तरं विप्र तथाव्याकृतमम्बरम् ।
अनन्तपारं तदपि लक्ष्मीस्तस्याभिमानिनी ॥ ४२ ॥
संख्यया गणना नाम यस्य नास्ति महाप्रभो ।
तदानन्त्यमिति प्रोक्तं सर्वदा नात्र संशयः ॥ ४३ ॥
अण्डाभिमानी ब्रह्मा तु विराडाख्यो ह्यभूत्तदा ।
एवमण्डं स निर्माय भगवान् हरिरव्ययः ॥ ४४ ॥
विवेश तत्र गरुडो देवैस्तत्त्वाभिमानिभिः ।
अधश्चोर्ध्वं तदाक्रम्य हरिस्तिष्ठति सर्वदा ॥ ४५ ॥

एवं प्राकृतसर्गोक्तिर्वैकृतं श्रुणु पक्षिराट् ।

गरुड उवाच

सृष्टिरुक्ता त्वया पूर्वं श्रुता सम्यङ्मया हरे ॥ ४६ ॥
किं नाम प्राकृतं ज्ञेयं तथा किं वैकृतं प्रभो ।
एतद्विस्तार्य मे ब्रूहि श्रोतुं कौतूहलं हि मे ॥ ४७ ॥

श्रीकृष्ण उवाच

अव्यक्ताद्याः पृथिव्यन्ताः अण्डाच्च बहिरुद्भवाः ।
ते सर्वे प्राकृताः प्रोक्तास्तेषां ज्ञानाद्विमुच्यते ॥ ४८ ॥
ब्रह्मांण्डं विकृतं ज्ञेयं ब्रह्माण्डान्तः खगेश्वर ।
या सृष्टिरुच्यते सद्भिः सैवोक्ता विकृतेति च ॥ ४९ ॥
सृष्टिश्च प्रलयश्चैव संसारो मुक्तिरेव च ।
देवता ऋषिमुख्याश्च लोका भूरादयस्तथा ॥ ५० ॥
अनाद्यनन्तकालीनाः सर्वदैकप्रकारकाः ।
जगत्प्रवाहः सत्योऽयं नैव मिथ्या कथंचन ॥ ५१ ॥
यत्त्वेतदन्यथा ब्रूयुः सर्वहन्तार एव ते ।
जगत्प्रवाहः सत्योऽयं हरिः सर्वोत्तमस्तथा ॥ ५२ ॥
सत्यं सत्यं पुनः सत्यं उद्धृत्य भुजमुच्यते ।
वेदशास्त्रात्परं नास्ति न देवः केशवात्परः ॥ ५३ ॥
सर्वोत्कृष्टं केशवं च विहायान्यमुपासते
तेषामन्धन्तमो ज्ञेयं पितॄणां गुरुणामपि ॥ ५४ ॥
इदानीं श्रुणु पक्षीन्द्र वैकृतं सर्गमुत्तमम् ।
सम्यग् जानाति यो लोके स याति परमं पदम् ॥ ५५ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे

ब्रह्माण्डादिवैकृतैकदेशप्राकृतसृष्टिनिरूपणं नाम दशमोऽध्यायः ॥ १० ॥

॥ एकादशोऽध्यायः ॥

कृष्ण उवाच

पुरुषाख्यो हरिः साक्षाद् भगवान्पुरुषोत्तमः ।
शिष्ये ह्यण्डोदके विष्णुर्नृणां साहस्रवत्सरम् ॥ १ ॥

लक्ष्मीश्चोदकरूपेण शय्यारूपेण चाण्डज ।
[1]विद्यातरङ्गरूपेण वायुरूपेण भोऽण्डज ॥ २ ॥

तमोरूपेण सैवासीन्नान्यदासीत् कथंचन ।
आसीद्गर्भोदके [2]चैव नान्यदासीत्कथंचन ॥ ३ ॥

लक्ष्मीस्तुष्टाव च हरिं गर्भोदे पक्षिसत्तम ।
लक्ष्मीधराभ्यां रूपाभ्यां प्रकृतिर्हरिणा सह ॥ ४ ॥

शेते श्रुतिस्वरूपेण स्तौति गर्भोदके हरिम् ।
नारायण नमस्तेस्तु श्रुणु विज्ञापनं मम ॥ ५ ॥

अजां जहि महाभाग योग्यानां मुक्तिमावह ।
अजा तु प्रकृतिः प्रोक्ता चापरा प्रकृतिः [3]परा ॥ ६ ॥

ततोऽवरा तु ब्रह्माणी ब्रह्मपत्नी वरानना ।
उमाशचीमुखाः तस्याः अवराः संप्रकीर्तिताः ॥ ७ ॥

एतासां हननं नैव प्रार्थयामि सदा हरे ।
अस्ति प्रतिनृषु ब्रह्म प्रकृती द्वे व्यवस्थिते ॥ ८ ॥

एका तु नित्यसंसारा त्वजशब्दाभिधायिका ।
द्वितीया तु तमोऽपोह्या अजशब्दाभिधायिका ॥ ९ ॥

अत एव त्वजे ज्येष्ठे इति लोके प्रकीर्तिते ।
सुखदुःखप्रदा चैव अपरा दुःखदैव तु ॥ १० ॥

---

१. वीची । २. चेत्थं । ३. श्रीः परा प्रकृतिः स्मृता ।

मोक्षाधिकारिणामेव ज्ञानैश्वर्यादयो गुणाः ।
तेषामाच्छादिका ह्येका तमोगा सा प्रकीर्तिता ॥ ११ ॥
जीवं प्रति महाविष्णुं या त्वाच्छादयति प्रभो ।
सा परा प्रकृतिर्ज्ञेया परमाच्छादिका स्मृता ॥ १२ ॥
एवं सा परमा दुष्टा तमोगा तु प्रकीर्तिता ।
जीववर्गेष्वेव खग ब्रह्मादेर्नास्ति सा क्वचित् ॥ १३ ॥
पिशाचवत्समुद्दिष्टा जीवस्येत्यधिकारिणः ।
प्रेरकाश्च तयोर्देव्योस्त्वहमाद्याः सुखात्मिकाः ।
तत्र विष्णो महाभाग स्वगुणाच्छादिकां जहि ॥ १४ ॥
स्वरूपाच्छादिका यस्मात्तमोगा सा प्रकीर्तिता ।
तस्याश्च हननं युक्तमनित्यत्वाच्च भो द्विज ॥
परमाच्छादिकां दुष्टां व्यामुच्यैव महाप्रभो ॥ १५ ॥
मोक्षं देहि महाभाग त्वद्भक्तानां महाप्रभो ।
परमाच्छादिका ह्यस्मान्नित्यसंसारिणो यतः ॥ १६ ॥
अत एव च नित्यत्वात्तस्मात्तदपसारणम् ।
कुरु देव महाभाग इति विज्ञापनं मम ॥ १७ ॥
एवं स्तुतो हरिः कृष्णः सुप्रबुद्धोऽपि सर्वदा ।
उद्बुद्धवन्महाविष्णुः अभूदज्ञव्यपेक्षया ॥ १८ ॥
तस्य नाभेरभूत्पद्मं सौवर्णं भुवनाश्रयम् ।
तत्प्राकृतं च विज्ञेयं भूदेवी त्वभिमानिनी ॥ १९ ॥
अनन्तसूर्यवच्चैव प्रकाशकमितीरितम् ।
चिदानन्दमयो विष्णुस्तस्माद्भिन्नो न संशयः ॥ २० ॥
विष्णोः स्वरूपभूतं च ये विजानन्ति ते नराः ।
ते याति ह्यधरं लोकं तथा तत्संगिसंगिनः ॥ २१ ॥

किरीटादिकवच्चैव ज्ञातव्यं च खगेश्वर ।
किरीटाद्या अपि हरेर्द्विधा सन्ति न संशयः ॥ २२ ॥

स्वरूपा ह्यस्वरूपाश्च स्वस्वरूपनिदर्शने ।
गृहीता इति विज्ञेया न स्वरूपाः खगेश्वर ॥ २३ ॥

ब्रह्माण्डं ह्यसृजत्तत्र सर्वलोकविधायकं ।
प्रलये सुप्तिहीनश्च सुप्त इत्युच्यते बुधैः ॥ २४ ॥

तस्य सुप्तिं वास्तवं च न ज्ञातव्यं खगेश्वर ।
प्रलयेऽपि महाभाग ब्रह्मवाय्वोर्न चास्ति हि ॥ २५ ॥

वृत्तिरूपं परं ज्ञानं याथार्थ्यं नात्र संशयः ।
इन्द्रियाणामुपरतिः सुप्तिरित्युच्यते बुधैः ॥ २६ ॥

ब्रह्मवाय्वोश्च यत्सुप्तिं वास्तवं स्यात्खगेश्वर ।
कथं तर्हि तयोर्वृत्तेः ह्यविलुप्तत्वमुच्यते ॥ २७ ॥

तस्मात्तद्वास्तवं नास्ति ब्रह्मवाय्वोः खगेश्वर ।
स्वप्नावस्थायाः सदृशी ह्यवस्था सुप्तिसंज्ञिता ॥ २८ ॥

ब्रह्मण्यमुख्यया वृत्त्या ह्यस्तीत्येवं निबोध मे ।
अतो न वास्तवमिदं अंगीकार्यं खगेश्वर ॥ २९ ॥

वास्तवं ये विजानन्ति ते यान्ति ह्यधरं तमः ।

गरुड उवाच

सुप्तिस्त्वज्ञानकार्यत्वात्सुप्तिर्नास्तीत्युदीरिता ।
यदा हि कारणं नास्ति तदा कार्यं किमु प्रभो ॥ ३० ॥

इत्यभिप्रायगर्भेण त्वं समाधीयसे यदि ।
तर्हि तस्य महाभाग कथं ब्रूहि भयादिकं ॥ ३१ ॥

भयादिकं ह्यस्तु नाम का वास्माकं क्षतिर्भवेत् ।
एवमुक्तस्तु गोविन्दोऽब्रवीत्तत्रापि कारणम् ॥ ३२ ॥

भयं त्वज्ञानकार्यं स्यात्कार्यात्कारणमत्र हि ।
मीयते च मया ब्रह्मन् तस्मात्सुप्तिं च तत्र हि ॥ ३३ ॥
अज्ञानादि यदि ब्रह्मन् तस्य न स्यात् कथंचन ।
कथं दुःखी प्रदृश्येत न कथंचित्करिष्यति ॥ ३४ ॥
कथं वा मुक्तिपर्यन्तं ज्ञानव्यक्तिर्वदस्व मे ।
यद्यज्ञानं तस्य सत्यं न स्यात्तर्हि महाप्रभो ॥ ३५ ॥
अत्यादरात् कथं ब्रह्मन् श्रवणं कुरुते वद ।
इति तस्य वचः श्रुत्वा कृष्णो वचनमब्रवीत् ॥ ३६ ॥

कृष्ण उवाच

भयं च वास्तवं तस्य न जानीहि महामते ।
दृश्यते यद्भयं तस्य हरिप्रीत्यर्थमेव च ॥ ३७ ॥
भयादिकं तु भक्त्यैव न तु वास्तवमीरितम् ।
पापप्रारब्धलेशस्तु तस्य नास्ति खगेश्वर ॥ ३८ ॥
दुःखाज्ञानादिकं किंचित्कथं तस्मिन् भविष्यति ।
विष्णोराज्ञानुसारेण भयाद्यनुकरोत्यसौ ॥ ३९ ॥
तेन प्रीणाति च हरिस्तस्य नास्त्यत्र संशयः ।
श्रुणोति सततं ब्रह्मा न चिन्त्यात् तावताज्ञता ॥ ४० ॥
कदाचिद्दृश्यते ब्रह्मा दुःखी न च खगेश्वर ।
यद्ब्रह्म च न जानीयाद्धरिप्रीत्यर्थमेव च ॥ ४१ ॥
दुःखिवद्दृश्यते ब्रह्मा ह्यज्ञानां मोहनाय च ।
योग्यतामनतिक्रम्य यावज्ज्ञानं च तिष्ठति ॥ ४२ ॥
ब्रह्मणस्तावदेवास्ति नात्र कार्या विचारणा ।
ज्ञानस्य व्यक्तता नाम विद्यामानस्य चादरात् ॥ ४३ ॥

ज्ञानस्यासादनं चैव ज्ञानव्यक्तिरिति स्मृता ।
अतोऽज्ञानादिकं नास्ति ब्रह्मणः परमेष्ठिनः ॥ ४४ ॥

पद्माद् हिरण्मयाज्जातो ब्रह्मा तु चतुराननः ।
सर्वदालोचनायुक्तस्तेन ह्यालोचनं कृतम् ॥ ४५ ॥

अज्ञानां मोहनार्थाय हरिप्रीत्यर्थमेव च ।
संकल्पोऽपि तथैवास्ति न ह्यज्ञानात्कृतस्तथा ॥ ४६ ॥

को वा मां सृष्टवानत्र इति ह्यालोच्य स प्रभुः ।
तं विचारयितुं ब्रह्मा पद्मनाडीं विवेश ह ॥ ४७ ॥

इति श्रीगरूडपुराणे ब्रह्मकाण्डे अज्ञानहेतुनिरूपणं
नाम एकादशोऽध्यायः ॥ ११ ॥

॥ द्वादशोऽध्यायः ॥

कृष्ण उवाच

नार्डी समाविश्य महानुभावः श्रीविष्णुभक्तो ह्यथ पुष्करस्थः ।
विचारयामास गुरुं स्वमूलं नारायणं निर्गुणमद्वितीयम् ॥ १ ॥

एतावता हरिभक्तस्य तस्याप्यच्छिन्नभक्तस्य चतुर्मुखस्य ।
विचारकाले च विचिन्तनीयो ह्यज्ञानलेशास्तु खगेश्वरेश्वर ॥ २ ॥

यथैव संकल्पमथास्ति विष्णोः तथैव सोऽपि प्रकरोति नित्यम् ।
आलोचने तस्य सदास्ति भूमन् स्वयोग्यतामनतिक्रम्य चैव ॥ ३ ॥

हरेः स्वरूपे च तथा प्रपञ्चे स्वस्मिन्स्वरूपे च सदास्ति ज्ञानम् ।
तथापि नित्यं परिचारतीव ह्यज्ञानिवद् दृश्यते विष्णुवच्च ॥ ४ ॥

हरिप्रीत्यर्थं कुरुतेऽसौ कदाचित् तथा दैत्यानां वंचयितुं सदैव ।
तत्रापि कश्चिच्च विशेष आस्ते श्रुणुष्व सम्यग्विनतातनूज ॥ ५ ॥

यथा प्रपञ्चं प्रविजानाति देवः सदा ह्यशेषैः प्रविशेषैश्च युक्तम् ।
वेधा यथा वा प्रविजानाति नित्यं स्वस्य स्वरूपं न तथा हरिं च ॥ ६ ॥

स्वयोग्यतामनतिक्रम्य वेधाः हरेः स्वरूपं न विजानाति सर्वम् ।
स्वयोग्यरूपं सर्वदा वेत्ति विष्णोः तत्राज्ञानं नास्ति किंचिद्विजेन्द्र ॥ ७ ॥

यावत्स्वरूपं च तथैव लक्ष्म्या वेधा न जानाति कुतस्तदन्ये ।
तयोः स्वरूपं न विजानाति सर्वं तथापि वेधाश्चैकदेशे च नित्यम् ॥ ८ ॥

जानाति लक्ष्मीर्हरिरूपं च यावत् तावन्न जानाति विधिः खगेन्द्र ।
ज्ञाने विधातुश्च स्वयोग्यभूते न चिन्तनीयं नापि क्षणाधिकं च ॥ ९ ॥

अतो विरिंचस्य न चिन्तनीयो ह्यज्ञानलेशः क्वापि देशे च काले ।
नार्डी समाविश्य तदा विरिंचो न वेद नारायणमेकवच्च ॥ १० ॥

तदाश्रुणोत्तं कमलासनः प्रभुः तपस्तपेति व्यक्षरं सादरेण ।
अभिप्रायं तस्य सम्यग्विदित्वा तपः कुरु त्वं हरितुष्ट्यर्थमेव ॥ ११ ॥
तपोऽकरोद्धरिपादैकनिष्ठो हरेः प्रीत्यर्थं दिव्यसहस्रवर्षम् ।
ततो हरिः प्रादुरासीत्खगेन्द्र वरं दातुं भक्तवरस्य दिव्यम् ॥ १२ ॥
तदा विष्णुं देवदेवं ददर्श चतुर्भुजं तं जलजायताक्षम् ।
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं संपश्यन्तं सुप्रसन्नार्द्रदृष्ट्या ॥ १३ ॥
दृष्ट्वा हरिं ब्रह्म नारायणं च पुरःस्थितं भक्तवश्यं दयालुम् ।
समर्चयामास महाविभूत्या भक्त्या हरेः पादतीर्थं दधार ॥ १४ ॥
अस्तौन्महाभागवतप्रधानो हरिं गुरुं भक्तिविवर्धितात्मा ॥

ब्रह्मोवाच

रमेश लोकेश जगन्निवास तव स्वरूपं न विजानाति देवी ।
तव प्रसादात्सुविजानाति देवी गुणान्वेदोक्तान् तदनुक्तांश्च सर्वान् ॥ १५ ॥
तथापि सा न विजानाति देवी साकल्येनाद्यापि ते सद्गुणांश्च ।
यद्यप्यनुक्तं पंचभिर्नास्ति वेदैः तथापि देवेऽत्र विशेष आस्ते ॥ १६ ॥
तत्त्वेच्छवः प्रविजानन्ति नित्यं वेदेषूक्तान् क्वाप्यनुक्तांश्च सर्वान् ।
आदौ जानीयात्पंचवेदान्मुरारे ऋगादयः सुष्ठु चत्वार एव ॥ १७ ॥
वेदा ह्येते वेदयन्तीति देव तथा पुराणं भारतं पंचरात्रम् ।
एतेषूक्तान्विष्णुगुणान्स्वयोग्यान् सदा विजानाति रमापि देवी ॥ १८ ॥
सामान्यतो ह्युक्तगुणान् ऋगादिषु स्वयोग्यभूतान् संविजानाति देवी ।
सामान्यतः प्रविजानाति देवी हरेर्गुणान्न विशेषाच्च नित्यम् ॥ १९ ॥
अहं विजानामि रमाप्रसादात् तव प्रसादाच्च गुणान्सदैव ।
स्वयोग्यभूतान् श्रुतिषूक्तान् गुणांश्च तथानुक्तान्सविशेषांश्च जाने ॥ २० ॥
तव प्रसादाच्च मम प्रसादात् कालान्तरे तांश्च जानाति शेषः ।
दुष्कर्मलेशाच्च तिरोहितान्गुणान्यानेव पूर्वं विदितान्स्वयोग्यान् ॥ २१ ॥

तानेव ज्ञात्वा पुनरेव शेषस्तिरोहितान् लब्धगुणस्ततः स्मृतः ।
सदा स्वयोग्यांश्च हरेर्गुणांश्च पूर्वं ह्यजानंश्च तव प्रसादात् ॥ २२ ॥
यदा विजानाति हरे मुरारे ह्यप्राप्तलब्धेति तदोच्यते हरः ।
ममापरोक्ष्यं यावदभून्मुरारे रूपं तावत्प्रविजानामि नित्यम् ॥ २३ ॥
गोविन्द नित्याव्यय ज्ञानपूर्ण तव प्रसादान्नास्ति शतेषु तन्मम ।
ये ये हि देवाश्च शरीरधारिणस्ते ज्ञानहीना विषयेषु निष्ठाः ॥ २४ ॥
ये ये हि देवा विषयेषु निष्ठास्त एव देवा बहिरर्थभावाः ।
एते हि देवा बहिरर्थभावा मोक्षादन्ये यत्नवन्तः सदैव ॥ २५ ॥
तव स्वरूपे च जगत्स्वरूपे तवाज्ञानं नास्ति विष्णो सदैव ।
यतस्तव प्राकृतो नास्ति देहो ह्यतोऽज्ञानं नास्ति नास्त्येव विष्णो ॥ २६ ॥
पूर्णानन्दज्ञानदेहोऽपि नित्यं सदा शरीरीत्युच्यसे त्वं मुरारे ।
यतस्तव प्राकृतो नास्ति देहो ह्यतोऽपि नित्यमशरीरीति च स्मृतः ॥ २७ ॥
यतोऽप्यहं सर्वदास्मिन् शरीरेऽहं ममेत्यभिमानेन शून्यः ।
अतोऽप्यहं त्वशरीरी सदैव तथैव नित्यं बहिरर्थशून्यः ॥ २८ ॥
स्वभोगभार्यासत्यलोकादिभोगः स्वयोग्यभोगो वस्त्रमाल्यादिभोगः ।
एते हि सर्वे बहिरर्थसंज्ञकाः नैसर्गकामाः सर्वदा मे हि विष्णोः ॥ २९ ॥
तथाप्यहं कामहीनो हि नित्यं रुद्रादयः कामवन्तो यतोऽतः ।
शरीरिणस्ते बहिरर्थभावा अज्ञानवन्तोऽपि च संस्मृताः खग ॥ ३० ॥
स्वदारभोगे केवलं प्रीतये च हरेरेवं सर्वदाहं करोमि ।
स्रगम्बरादीन् धारयिष्ये सदैव विष्णोः प्रीत्यर्थं नैव गात्रार्थमेव ॥ ३१ ॥
नित्यानन्दादन्यकामो न चास्ति ह्यतः सदा बहिरर्थैश्च शून्यः ।
ममापि भार्या बहिरर्थशून्या ह्यमूढभूता मोहवतीव दृश्यते ॥ ३२ ॥
अमूढभूता ज्ञानिनां सर्वदैव तथाज्ञानां ज्ञानहीनेव भाति ।

यावज्ज्ञानं वायुदेवस्य चास्ति तावज्ज्ञानं ज्ञानवतामृजूनाम् ।
क्रमेणैषां ज्ञानवतामृजूनां स्पष्टत्वरूपो ज्ञानगतो विशेषः ॥ ३३ ॥

सौरिप्रकाशे च यथैव दर्शनं तथा मम ज्ञानगतो विशेषः ।
दीपप्रकाशे च यथैव दर्शनं तथा ज्ञानं वायुदेवस्य चास्ति ॥ ३४ ॥

अस्पष्टरूपा न्यूनता ह्यस्ति वायौ तथाऽज्ञानं नैव संचिन्तनीयम् ।
एतादृशी ज्ञानशक्तिर्मुरारेर्वाय्वादीनां मोक्षपर्यन्तमस्ति ॥ ३५ ॥

ज्ञानं ऋजूनां मोक्षकालेऽव्ययं च वाय्वादीनां मोक्षकाले नाशहीनम् ।
वायोर्मम प्रलये सृष्टिकाले तथा गायत्र्या नास्ति नास्त्येव मोहः ॥ ३६ ॥

गायत्रीवद्भारती देवदेव ज्ञातव्यैवं हरितत्त्ववेदिभिः ।
ममाज्ञानं दृश्यते यत्र कुत्र दैत्यादीनां मोहनार्थं सदैव ॥ ३७ ॥

तेन प्रीतिर्देवदेवस्य विष्णोः भविष्यतीत्येव विनिश्चितात्मा ।
प्रश्नादिकं त्वज्ञवत्सर्वदैव करिष्येहं मोहनायाधमानाम् ॥ ३८ ॥

सूर्योदये नास्ति यथा तमश्च तथाऽज्ञानं नास्ति नास्त्येव देव ।
करोम्यहं श्रवणं सर्वदैव हरिप्रीत्यर्थं निश्चयार्थं सदा हि ॥ ३९ ॥

शतजन्मगतानां तु ऋजूनां पूर्वमेव च ।
अपरोक्षाभाव एव ह्यज्ञानं समुदीरितम् ॥ ४० ॥

अपरोक्षानन्तरं तु नास्त्यज्ञानं न संशयः ।
शतजन्मसु देवेश ह्यपरोक्षेण सर्वदा ॥ ४१ ॥

पूर्णज्ञानं ममास्त्येव नात्र कार्या विचारणा ।
शतजन्मसु पूर्वं तु परोक्षेण मम प्रभो ॥ ४२ ॥

पूर्णं ज्ञानं सदाप्यस्तीत्येवमाहुर्मनीषिणः ।
शतजन्मगतायाश्च सरस्वत्या महाप्रभो ॥ ४३ ॥

नाज्ञानं चिन्तनीयं हि ब्रह्मवायुवदेव हि ।
अत्र कश्चिद्विशेषोऽस्ति ज्ञातव्यस्तत्त्ववेदिभिः ॥ ४४ ॥

अवतारेषु भारत्याः कदाचिज्ज्ञानवर्जनम् ।
सर्वदा ज्ञानरूपा सा [१]सर्वदुःखविवर्जिता ॥ ४५ ॥
दैत्यानां मोहनार्थाय ह्यंशे दुःखीव दृश्यते ।
तस्या दुःखादिकं किंचिन्नास्ति नास्त्येव सर्वथा ॥ ४६ ॥
अपरोक्षतिरोभाव [२]ईषत्काले प्रदृश्यते ।
तावन्मात्रेण चाज्ञानं तस्यां नैव हि चिन्तयेत् ॥ ४७ ॥
मूलरूपे तु नास्त्येव भारत्या ज्ञानविस्मृतिः ।
भारत्यास्तु यदा नास्ति सरस्वत्यास्तु किं पुनः ॥ ४८ ॥
अंशावतारणं नास्ति सरस्वत्याः कदाचन ।
अंशावतरणं नास्ति ममापि मधुसूदन ॥ ४९ ॥
यथैवाज्ञा ममास्त्येव हरेर्नारायणस्य च ।
वायोरंशावतारोऽस्ति यथा मूले तथैव च ॥ ५० ॥
बलज्ञानादिकं सर्वं चिन्तनीयं न संशयः ।
तथापि वायौ दृश्यन्ते बलज्ञानादिव्यक्तयः ॥ ५१ ॥
अवतारेषु वायोस्तु सम्यक् शक्त्यात्मनास्ति हि ।
अपरोक्षतिरोभावो नांशावतरणेष्वपि ॥ ५२ ॥
बलज्ञानादिकं यावन्मूलरूपे प्रदृश्यते ।
त्रेतायुगस्वरूपे च न दर्शयति तादृशम् ॥ ५३ ॥
त्रेतायुगस्थरूपे च यादृग्दर्शयति प्रभो ।
द्वापरस्थे स्वरूपे तन्न दर्शयति तादृशम् ॥ ५४ ॥
द्वापरस्थे वायुरूपे यादृग् दर्शयति प्रभुः ।
वायुः कलियुगे रूपे न दर्शयति मारुतिः ॥ ५५ ॥

---

१. सर्वदा दुःखवर्जिता । २. कलिकाले ।

तथा वायुर्दर्शयति दैत्यानां मोहनाय च ।
अवतारेषु वायोश्च ह्यन्तरं ये विदुः प्रभो ॥ ५६ ॥

तेऽन्धन्तमः प्रविशन्ति ते दैत्या न च ते सुराः ।
वायोमर्मान्तरं नास्ति हरितत्त्वविनिर्णये ॥ ५७ ॥

निन्दां कुर्वन्ति ये विष्णोर्जिह्वाच्छेदं करोम्यहम् ।
तदर्थमेव वायोश्च ह्यवतारः सदा भुवि ॥ ५८ ॥

गुणपूर्णस्य विष्णोस्तु निर्गुत्वविचिन्तनम् ।
ज्ञानानन्दादिपूर्णस्य सोऽहमित्यादिचिन्तनम् ॥ ५९ ॥

चिदानन्दात्मके देहे उत्पत्त्यादिविचिन्तनम् ।
अच्छेद्याभेद्यगात्रस्य च्छेदभेदादिचिन्तनम् ॥ ६० ॥

देव्या नित्यावियोगिन्या वियोगादिविचिन्तनम् ।
क्लेशशोकादिहीनस्य हरेः क्लेशादिचिन्तनम् ॥ ६१ ॥

व्यासरामादिरूपेषु ऋषिविप्रत्वचिन्तनम् ।
कृष्णरामादिरूपेषु ह्यन्तरस्य विचिन्तनम् ॥ ६२ ॥

रामकृष्णादिरूपेषु पारावर्यविचिन्तनम् ।
सन्तानार्थं तु कृष्णेन शिवपूजादिचिन्तनम् ॥ ६३ ॥

रामेण दुःखयुक्तेन लिङ्गस्य स्थापनं कृतम् ।
पंचधातुमये कृष्णे हरिरूपविचिन्तनम् ॥ ६४ ॥

स्वयंव्यक्तस्थले चापि चिदानन्दत्वकल्पनम् ।
पितृमातृद्विजातीनां हरिरूपत्वचिन्तनम् ॥ ६५ ॥

अस्वतन्त्रेण रुद्रेण हरेरैक्यादिचिन्तनम् ।
विष्णोः सूर्येण साकं च ह्यभेदादिविचिन्तनम् ॥ ६६ ॥

सर्वोत्तमः सूर्य एव विष्ण्वाद्यास्तस्य किङ्कराः ।
इत्यादिचिन्तनं दोषो हरिनिन्देति चोच्यते ॥ ६७ ॥
स्वयंव्यक्तेषु लिंगेषु ह्यश्वत्थतुलसीषु च ।
शालग्रामं विहायैव नमनं ये प्रकुर्वते ॥ ६८ ॥
ते सर्वे हरिनिन्दायामधिकारिण एव हि ।
मोक्षाधिकारिणो ये तु ह्यज्ञानात्परमेश्वरम् ॥ ६९ ॥
पार्थक्यनमनं ये तु कुर्वन्ति यदि वा प्रभो ।
तर्हि तेऽपि हि लोकेषु दुःखं यान्ति न संशयः ॥ ७० ॥
अतः पार्थक्यनमनं ये कुर्वन्त्येषु सर्वदा ।
ते सर्वे ह्यसुरा ज्ञेया नात्र कार्या विचारणा ॥ ७१ ॥
विवाहशून्यमश्वत्थं पूजयन्ति नमन्ति च ।
द्विमासहीनां तुलसीं अप्रसूतां च गां नवाम् ॥ ७२ ॥
ते सर्वे ह्यसुरा ज्ञेया नात्र कार्या विचारणा ।
ये कल्याद्या मनुष्यांतास्ते ज्ञेया ब्रह्मवद्गणाः ॥ ७३ ॥
अस्मच्छतायुःपर्यन्तमेक एक कलिः स्मृतः ।
कलिसंज्ञकनामानः कलेरन्याश्च सन्ति हि ॥ ७४ ॥
एकस्मिन् मद्दिने ब्रह्मन् ते गच्छन्ति तमोऽन्तिकम् ।
तत्र स्थित्वा कलेर्मार्गं प्रतीक्षन्ते न संशयः ॥ ७५ ॥
साधकैर्विष्णुकार्याणां वायुदासैः प्रपीडिताः ।
शतवर्षानन्तरं च सर्वेषां कलिना सह ॥ ७६ ॥
वायोर्गदाप्रहारेण लिंगभंगो भविष्यति ।
तमोऽन्धं प्रविशन्त्येव तारतम्येन सर्वशः ॥ ७७ ॥
तमस्यन्धेपि संसारे नात्र कार्या विचारणा ।
सर्वेषामुत्तमोऽन्ते यः कलिरेव न संशयः ॥ ७८ ॥

दूषणे विष्णुभक्तानां तत्समो नास्ति सर्वदा ।
संसारे चान्धतमसि सर्वत्र हरिदूषकः ॥ ७९ ॥

मिथ्याज्ञाने ज्ञानबुद्धिर्दुःखे च सुखबुद्धिमान् ।
तस्मात्कलिसमो लोके शिवभक्तो न कुत्रचित् ॥ ८० ॥

दुर्योधनः स एवोक्तो दुःखानन्त्यस्वरूपवान् ।
तस्माच्छतगुणांशोना कलिभार्या तु सर्वदा ॥ ८१ ॥

अलक्ष्मीरिति विख्याता सा लोके मन्थरा स्मृता ।
तस्माद्दशगुणांशोनो विप्रचित्तिस्तु सर्वदा ॥ ८२ ॥

जरासन्धः स एवोक्तः कालनेमिस्ततः परम् ।
तस्माच्छतगुणांशोनः सतु कंसेति विश्रुतः ॥ ८३ ॥

तस्मात्पंचगुणैर्हीनौ मधुकैटभसंज्ञकौ ।
तावेव हंसडिभिकौ ज्ञेयौ तौ च जनार्दन ॥ ८४ ॥

विप्रचित्तिसमो ज्ञेयो भौमो वै भूतले स्मृतः ।
तस्मादष्टगुणैरुच्चो हिरण्यकशिपुः स्मृतः ॥ ८५ ॥

तस्माच्च त्रिगुणैर्हीनो हिरण्याक्षो महासुरः ।
मणिमांस्तत्समो ज्ञेयः किंचिदूनो बकः स्मृतः ॥ ८६ ॥

तस्माद्विंशद्गुणैर्हीनः तारकाख्यो महासुरः ।
तस्मात् षड्गुणतो हीनः शम्बरो लोककण्टकः ॥ ८७ ॥

शम्बरस्य समो ज्ञेयः शाल्वो दैत्येषु चाधमः ।
शम्बरात्तु द्विगुणतो हिडिम्बो न्यून उच्यते ॥ ८८ ॥

बाणस्ततोऽधमो ज्ञेयः सतु कीचकनामकः ।
द्वापराख्यो महादैत्यो बाणासुरसमः स्मृतः ॥ ८९ ॥

तस्माद्दशगुणैर्हीनो नमुचिर्दैत्यसत्तमः ।
नमुचेस्तु समौ ज्ञेयौ पाक इल्वल इत्युभौ ॥ ९० ॥

तस्माच्चतुर्गुणैर्हीनो वातापिर्दानवाधमः ।
तस्मात्सार्धगुणैर्हीनो धेनुको नाम दैत्यराट् ॥ ९१ ॥
धेनुकादर्धगुणतः केशी दैत्यस्तु चावरः ।
केशिदैत्यसमो ज्ञेयः तृणावर्तो महासुरः ॥ ९२ ॥
तस्माद्दशगुणैर्हीनो लवणो दैत्यसत्तमः ।
तस्मात्पंचगुणैर्हीनो धुन्धुमारो महासुरः ॥ ९३ ॥
वेनः स एव विज्ञेयः पूर्वजन्मनि सत्तम ।
तस्मादेकगुणैर्हीनौ कुम्भाण्डककुपर्णकौ ॥ ९४ ॥
दुःशासनस्तु विज्ञेयो जरासन्धसमः प्रभो ।
कंसेन तुल्यो विज्ञेयो विकर्णो दैत्यसत्तमः ॥ ९५ ॥
कूपकर्णाच्छतगुणैर्हीनो रुक्मस्तु विश्रुतः ।
तस्माच्छतगुणैर्हीनः शतधन्वा महासुरः ॥ ९६ ॥
समानस्तस्य विज्ञेयः किर्मीरो दैत्यसत्तमः ।
कालकेयस्तु विज्ञेयः सदा वेनसमो मतः ॥ ९७ ॥
अधमानां तु देवानामुत्तमैः साम्यमुच्यते ।
तत्रावेशाच्च देवानां विज्ञेयं नात्र संशयः ॥ ९८ ॥
तस्माच्छतगुणैर्हीनश्चित्तमान्यसुरो महान् ।
शरीरस्याभिमानी तु तस्माच्छतगुणैर्वरः ॥ ९९ ॥
तस्माच्छतगुणैर्हीनो हस्तमान्यसुरो महान् ।
तस्माच्छतगुणैहीनः पादमान्यसुरो महान् ॥ १०० ॥
श्रोत्रेन्द्रियाभिमानी तु तस्माच्छतगुणावरः ।
चक्षुरिन्द्रियमानी तु तस्माच्छतगुणावरः ॥ १०१ ॥
तस्माच्छतगुणैहीह्नः स्पर्शमान्यसुरो महान् ।
तस्माच्छतगुणैर्हीनो वाङ्मानी ह्यसुरो महान् ॥ १०२ ॥

तस्माच्छतगुणैर्हीनः शिश्नमान्यसुरो महान् ।
तस्माच्छतगुणैर्हीनः कर्ममान्यसुरो महान् ॥ १०३ ॥
कल्याद्यैः प्रेरिताः सर्वे रुद्राद्या अधिकारिणः ।
कदाचित्सुविरुद्धं च कुर्वन्ति तव सत्तम ॥ १०४ ॥
कदाप्यहं च वायुश्च विरुद्धं नाचरेव भोः ।
मूलेष्वांशावतारेषु रुद्रादीनां महाप्रभो ॥ १०५ ॥
बुद्धिर्विनश्यते यस्मात्तस्माच्छिन्ना हि तेखिलाः ।
न हीयते च मद्बुद्धिः तस्मादच्छिन्नसंज्ञकः ॥ १०६ ॥
एतादृशोऽप्यहं देव न च शक्तः स्तुतौ तव ।
मह्यमच्छिन्नभक्ताय दयां कुरु महाप्रभो ॥ १०७ ॥

इति श्रीगरूडपुराणे ब्रह्मकाण्डे ब्रह्मस्तुतिवर्णनं
नाम द्वादशोऽध्यायः ॥ १२ ॥

॥ त्रयोदशोऽध्यायः ॥

कृष्ण उवाच

इति स्तुतः स भगवान् स्वपुत्रेण दयानिधिः ।
मेघगम्भीरया वाचा प्रोवाच मधुसूदनः ॥ १ ॥

सृज ब्रह्मन्निमान् देवान् मत्प्रसादात्क्रमेण च ।
तथा दैत्यान् क्रमेणैव सृज सर्वं महाप्रभो ॥ २ ॥

नास्ति प्रयोजनं तेन तव मत्प्रीतये सृज ।
एवमुक्तस्तु हरिणा ब्रह्मा स्तुत्वा हरिं परम् ॥ ३ ॥

सृष्टिं कर्तुं मनो दध्रे प्रीणयन्नेव माधवम् ।
महत्तत्वात्मको ब्रह्मा वायुं जीवाभिमानिनम् ॥ ४ ॥

आदौ ससर्ज गरुड पुरुषात्मा स एव च ।
ततो दक्षिणहस्तात्तु ब्रह्माणीं भारतीं तथा ॥ ५ ॥

असृजत्ते महाभागे अव्यक्तस्य नियामिके ।
वामहस्तात्समुत्पन्नो महत्तत्वात्मकोऽनिलः ॥ ६ ॥

ब्रह्मणो दक्षिणाद्धस्तादहंकारात्मको हरः ।
आदौ शेषस्ततो जज्ञे गरुडस्तदनन्तरम् ॥ ७ ॥

तदनन्तरजो रुद्रः स एवं सृष्टवान् प्रभुः ।
स्वोत्पत्त्यनन्तरं ब्रह्मा दशवर्षो महाप्रभुः ॥ ८ ॥

वायुमुत्पादयामास वत्सरानन्तरं प्रभुः ।
गायत्रीं जनयामास वायोरुत्पत्त्यनन्तरम् ॥ ९ ॥

संवत्सरानन्तरं तु भारतीमसृजत्प्रभुः ।
भारत्यनन्तरं शेषो दिव्यसाहस्रवत्सरात् ॥ १० ॥

अनन्तरं सम्बभूव गरुडात्तु ततः परम् ।
दिव्यसाह्वषात्तु तथा रुद्रं च सृष्टवान् ॥ ११ ॥

शेषस्यानन्तरं देवीं वारुणीं च महाप्रभुः ।
दशवर्षानन्तरं तु ह्यसृजत्कमलासनः ॥ १२ ॥

गरुडानन्तरं देवीं सौपर्णीमसृजत्प्रभुः ।
दशवर्षानन्तरं च पार्वतीं च तथैव सः ॥ १३ ॥

पार्वत्यनन्तरं चेन्द्रं मनस्तत्त्वनियामकम् ।
दशवर्षानन्तरं तु ह्यसृजद्वायुमूलतः ॥ १४ ॥

अभिमानी दक्षिणस्य बाह्वोश्च परमेष्ठिनः ।
दशवर्षानन्तरं तु शचीं तामसृजत्प्रभुः ॥ १५ ॥

इन्द्रस्यानन्तरं कामं त्रिंशद्वर्षादनन्तरम् ।
असृजद्वामबाह्वोश्च मनस्तत्त्वाभिमानिनम् ॥ १६ ॥

तदनन्तरजां देवीं दशवर्षादनन्तरम् ।
रतिं स जनयामास कामभार्यां महाप्रभुः ॥ १७ ॥

कामस्याप्यभिमानी तु स एव परिकीर्तितः ।
ब्रह्माऽहंकारिकं प्राणं कामोत्पत्तेरनन्तरम् ॥ १८ ॥

दशवर्षानन्तरं तु निर्ममे नासिकं ततः ।
तस्य भार्यां नासिकस्य पंचवर्षादनन्तरम् ॥ १९ ॥

निर्ममे नासिकां वामां ब्रह्मा लोकपितामहः ।
अहंकारादनु ब्रह्मा स्वज्ञानाच्च बृहस्पतिम् ॥ २० ॥

निर्ममे वर्षपूगाच्च पंचविंशादनन्तरम् ।
पंचवषानन्तरं च तारां भार्यां विनिर्ममे ॥ २१ ॥

गुरोरनन्तरं ब्रह्मा पंचविंशादनन्तरम् ।
स्वायंभुवं मनुं चैव निर्ममे मनसा विभुः ॥ २२ ॥

पंचवर्षानन्तरं तु शतरूपां विनिर्ममे ।
शतरूपानन्तरं तु विंशद्वर्षादनन्तरम् ॥ २३ ॥

दक्षः शिश्नात्मको जज्ञे दक्षिणांगुष्ठतः प्रभो ।
पंचवर्षानन्तरं तु वामांगुष्ठाच्चतुर्मुखः ॥ २४ ॥

प्रसूतिमसृजद्ब्रह्मा सृष्ट्यर्थं परमादरात् ।
दक्षस्यानन्तरं ब्रह्मा पंचविंशादनन्तरम् ॥ २५ ॥

निर्ममे ह्यनिरुद्धं च मध्यमांगुलिपर्वतः ।
पंचवर्षानन्तरं तु ससर्ज भगवानजः ॥ २६ ॥

विराजसंज्ञकां भार्यां मध्यमांगुलिपर्वतः ।
अनिरुद्धानन्तरं तु शतवर्षादनन्तरम् ॥ २७ ॥

निर्ममे प्रवहं वायुं कनिष्ठांगुलिपर्वतः ।
दशवर्षानन्तरं तु प्रावहीं निर्ममे प्रभुः ॥ २८ ॥

कनिष्ठांगुलिपर्वाच्च वामदेवं न संशयः ।
प्रवहानन्तरं ब्रह्मा शतवर्षादनन्तरम् ॥ २९ ॥

यमं विनिर्ममे पृष्ठादष्टवर्षादनन्तरम् ।
तद्भार्यां श्यामलां देवीं तस्मादेव महाप्रभुः ॥ ३० ॥

यमस्यानन्तरं चन्द्रं त्रिंशद्वर्षादनन्तरम् ।
असृजद्दक्षिणाच्छ्रोत्रात् श्रोत्रतत्वनियामकम् ॥ ३१ ॥

नववर्षनन्तरं तु रोहिणीमसृजत्प्रभुः ।
वामश्रोत्राच्च गरुड वामश्रोत्राभिमानिनम् ॥ ३२ ॥

चन्द्रस्यानन्तरं सूर्यं विंशद्वर्षादनन्तरम् ।
सम्यग्विनिर्ममे ब्रह्मा दक्षिणाक्ष्णोश्च देवताम् ॥ ३३ ॥

वामाक्ष्णो निर्ममे संज्ञां षड्वर्षानन्तरं प्रभुः ।
सूर्यस्यानन्तरं ब्रह्मा शतवर्षादनन्तरम् ॥ ३४ ॥

रसनेन्द्रियाच्च वरुणं निर्ममे तस्य मानिनम् ।
विंशद्वर्षानन्तरं तु तस्मादेवेन्द्रियात्प्रभुः ॥ ३५ ॥

गङ्गां विनिर्ममे ब्रह्मा रसनेन्द्रियदेवताम् ।
वरुणस्यानन्तरं तु दशवर्षादनन्तरम् ॥ ३६ ॥

उत्संगान्निर्ममे ब्रह्मा नारदं भगवत्प्रियम् ।
नारदस्यानन्तरं तु षष्ठिवर्षादनन्तरम् ॥ ३७ ॥

अग्निं विनिर्ममे ब्रह्मा स्ववागिन्द्रियतः प्रभुः ।
अतो वागभिमानी च पंचवर्षादनन्तरम् ॥ ३८ ॥

स्वाहां विनिर्ममे ब्रह्मा तामाहुर्मन्त्रदेवताम् ।
अग्नेरनन्तरं वीन्द्र भृगुं ब्रह्मर्षिसत्तमम् ॥ ३९ ॥

दशवर्षानन्तरं तु भ्रुवोर्मध्याद्विनिर्ममे ।
संवत्सरानन्तरं तु भृगुभार्यां विनिर्ममे ॥ ४० ॥

भृगोरनन्तरं ब्रह्मा शतवर्षादनन्तरम् ।
कश्यपं जनयामास मनसा च स्वयं प्रभुः ॥ ४१ ॥

संवत्सरानन्तरं तु ह्यदितिं निर्ममे प्रभुः ।
कश्यपानन्तरं चात्रिं दशवर्षादनन्तरम् ।

अत्रेरनन्तरं ब्रह्मा दशवर्षादनन्तरम् ।
अजीजनद्भरद्वाजं वसिष्ठं तदनन्तरम् ॥ ४३ ॥

दशवर्षानन्तरं तु तेषां भार्याः क्रमेण तु ।
संवत्सरानन्तरेण चासृजत्कमलासनः ॥ ४४ ॥
वसिष्ठस्यानन्तरं तु गौतमं ह्यसृजत्प्रभुः ।
दशवर्षानन्तरेण जमदग्निं ततोऽसृजत् ॥ ४५ ॥
दशवर्षानन्तरेण मनुर्वैवस्वतोऽभवत् ।
मनोरनन्तरं जज्ञे शतवर्षादनन्तरम् ॥ ४६ ॥
विष्वक्सेनो महाभागो वायुपुत्रो महाबलः ।
तस्माच्चतुर्दशे वर्षे गणपो ह्यभवद्विभोः ॥ ४७ ॥
तदनन्तरजो वीन्द्र चाष्टवर्षादनन्तरम् ।
धनपो ह्यभवत्तत्र तद्भार्या वत्सरे परे ॥ ४८ ॥
विष्वक्सेनानन्तरं तु दशवर्षादनन्तरम् ।
जयादीन् भगवद्भक्तान् सृष्टवान् कमलासनः ॥ ४९ ॥
जयाद्यनन्तरं ब्रह्मा बल्यादीन् कर्मदेवताः ।
शतवर्षानन्तरं तु सृष्टवान् [1]शिववाहनम् ॥ ५० ॥
कर्मदेवानन्तरं तु त्रिंशद्वर्षादनन्तरम् ।
पर्जन्यमसृजद्ब्रह्मा मन्त्रतत्त्वाभिमानिनम् ॥ ५१ ॥
पर्जन्यानन्तरं ब्रह्मा दशवर्षादनन्तरम् ।
पुष्करं जनयामास कर्मतत्त्वाभिमानिनम् ॥ ५२ ॥
एवं विनिर्ममे ब्रह्मा मत्प्रसादात्खगेश्वर ।
एवं ज्ञात्वा मोक्षमेति नान्यथा तु कथंचन ॥ ५३ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे देवोत्पत्तिनिरूपणं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

पा-१.शिखिवाहनः ।

॥ चतुर्दशोऽध्यायः ॥

श्रीगरुड उवाच

अवतारान् हरे ब्रूहि तथा लक्ष्म्या दिवौकसाम् ।
गुणानामन्तरं ब्रूहि शिष्यस्य मम सुव्रत ॥ १ ॥

श्रीकृष्ण उवाच

यो मूलरूपी भगवाननन्तो ब्रह्मादिभिः पूर्णगुणः स्वतन्त्रः
पुरातनः पूर्णतनुर्महात्मा न तादृशो नास्ति कदाऽपि वीन्द्र ॥ २ ॥
पादश्च पूर्णः पादतलं च पूर्णं नखाश्च पूर्णाः कटिकण्ठौ च पूर्णौ ।
ऊरू च पूर्णौ उदरं च पूर्णं त्वचश्च पूर्णाः पूर्णवक्षो हरेश्च ॥ ३ ॥
स्कन्धाश्च पूर्णाः सकलाश्च बाहवः पूर्णाः केशाः श्मश्रुदन्ताश्च पूर्णाः ।
लोमानि पूर्णानि तथैव रोमकूपाश्च पूर्णास्तु तथैव शिश्नः ॥ ४ ॥
अण्डाश्च पूर्णो ह्यण्डरोमाणि कक्षाश्चक्षुश्च श्रोत्रे सर्व एते च पूर्णाः ।
किं वर्णये मूलरूपं हरेश्च यावद्बलं पूर्णसमग्रदेहे ॥ ५ ॥
तावद्बलं ह्येकरोमादिकेषु संचिन्तनीयं हि यतः स देवः ।
स एव पूर्णः स तु सर्वस्य कर्ता स एव कर्ता सर्वसारांशभोक्ता ॥ ६ ॥
असारांशं नैव भोक्ता हरिस्तु सारान्वक्ष्ये श्रुणु पक्षीन्द्र सम्यक् ।
द्राक्षेक्षुसारं नारिकेलस्य सारं चूतस्य सारं पनसस्यापि सारम् ॥ ७ ॥
नारंगसारं क्रमुकस्यापि सारं खर्जूरसारं कदलीफलस्य ।
नारायणीबीजरूपस्य सारं गृह्णाति नित्यं भक्तवर्गे दयालुः ॥ ८ ॥
ताम्बूलसारं खदिरस्य सारं पुष्पस्य सारं चन्दनस्यापि सारम् ।
कर्पूरसारं मृगनाभेश्च सारं प्रियंगुसारं तण्डुलस्यापि सारम् ॥ ९ ॥
गोधूमसारं चणकस्य सारं मुद्गस्य सारं च तथा यवस्य ।
माषस्य सारं तुवरेश्च सारं लंकाहरिद्रस्य च सत्प्रियोक्ताः ॥ १० ॥

शुद्धं तथा व्रीहिनीवारसारं श्यामाकसारं शुद्धधान्यस्य सारम् ।
तथाऽनिषिद्धान्सर्वशाकस्य सारान्तथाऽनिषिद्धान् लवणस्याऽपि सारान् ॥ ११ ॥

गृह्णाति विष्णुः परमादरेण ह्यन्नस्थसारं भक्ष्यभोज्यस्य सारम् ।
सूपान्नसारं परमान्नस्य सारं दुग्धस्य सारं दधितक्रस्य सारम् ॥ १२ ॥

घृतस्य सारं रामठस्यापि सारं गृह्णाति विष्णुः सर्षपस्यापि सारम् ।
मरीचिसारं जीरकस्यापि सारं तथा हरिर्घृतपक्वस्य सारम् ॥ १३ ॥

तैलेषु पक्वस्य च भर्जितस्य गुडस्य सारं नवनीतस्य सारम् ।
लवंगसारं शर्करायाश्च सारं इत्यादिसारान् वासुदेवस्तु भुंक्ते ॥ १४ ॥

तस्याज्ञया वायुदेवोऽपि नित्यं तच्छेषसारान् भुंक्त एवेति सत्यम् ।
वक्ष्ये ह्यसारान् श्रृणु शिष्यवर्य एते ह्यसारा यदि विष्णोर्महात्मन् ॥ १५ ॥

समर्पितं न भवेत्सारभूतं विष्णुर्न गृह्णाति तथैव वायुः ।
ते वै ह्यभक्ता वायुदेवस्य नित्यं किं वक्तव्यं विष्णुभक्ता हि लोके ॥ १६ ॥

वक्ष्ये विशेषं वैश्वदेवे खगेन्द्र श्रुत्वा गोप्यं नो वदान्यत्र विद्वान् ।
सूर्यादीनां येऽवदानं च दद्युः विना वायोरन्तरस्थं हरिं च ॥ १७ ॥

ते वै सदाऽसारभोक्तार एव ज्ञेयास्त्वतो विष्णुरेको महात्मा ।
सारांशभोक्ता न तु सर्वस्य भोक्ता भुक्ते हि सर्वं ह्यविरुद्धशक्तिः ॥ १८ ॥

वक्ष्ये ह्यसारान् पुनरन्यान् खगेन्द्र श्रृणुष्व गुह्यं परमादरेण ।
द्रक्षादयः सर्व एव त्वसाराः कालादिदुष्टाः भावदुष्टा पदार्थाः ॥ १९ ॥

अथ पक्वानन्तरं तु तथा दिनचतुष्टये
असारा कदली ज्ञेया तथा जम्बूफलं स्मृतम् ॥ २० ॥

मासस्यानन्तरं वीन्द्र त्वसारं पनसं स्मृतम् ।
षण्मासानन्तरं वीन्द्र खर्जूरं पूतिवत्स्मृतम् ॥ २१ ॥

आर्द्रं पूतं नारिकेलं स्फोटनानन्तरं प्रभो ।
अहोरात्रानन्तरं तु ह्यसारं परिकीर्तितम् ।। २२ ।।

शुष्कभूतं नारिकेलं खर्जूरं तु यथा तथा ।
पक्षस्यानन्तरं तच्च ह्यसारं परिकीर्तितम् ।। २३ ।।

वर्षस्यानन्तरं वीन्द्र पूगीफलमुदाहृतम् ।
घटिकानन्तरं वीन्द्र ताम्बूलं परिकीर्तितम् ।। २४ ।।

यामस्यानन्तरं चान्नं सूपान्नं पायसं तथा ।
भक्ष्यं च कथितं वीन्द्र ह्यसारं परिकीर्तितम् ।। २५ ।।

त्रियामानन्तरं वीन्द्र तैलपक्कं तथा स्मृतम् ।
चतुर्यामानन्तरं च त्वसारं घृतपाचितम् ।। २६ ।।

त्रियामानन्तरं शाका निःसाराः परिकीर्तिताः ।
रुचिपक्कं चारुफलं उर्वारुकफलं तथा ।। २७ ।।

पक्षस्यानन्तरं वीन्द्र निःसारं परिकीर्तितम् ।
जम्बीरं श्रृंगबेरं च धात्री चूतं कचूलकम् ।। २८ ।।

वत्सरानन्तरं वीन्द्र निःसारं परिकीर्तितम् ।
पर्पटः पक्षमात्रेण निःसारः परिकीर्तितः ।। २९ ।।

तुलसी सर्वदा सारं एकादश्यामपि द्विज ।
आर्द्रा वाप्यथवा शुष्का सर्वदा सारमुच्यते ।। ३० ।।

एकादश्यां तु तलसी सारा ग्राह्या मनीषिभिः ।
त्वचा नासिकया वापि नतु जिह्वेन्द्रियेण च ।। ३१ ।।

एकादश्यां हरेरन्नं निःसारं परिकीर्तितम् ।
एकादश्यां हरेस्तीर्थं मनुष्याणां खगेश्वर ।। ३२ ।।

एकवारे च सारं स्याद्विवारेऽसारमुच्यते ।
एकादश्यां महाभाग तीर्थं गन्धादिमिश्रितम् ॥ ३३ ॥
असारमिति संप्रोक्तं तथा स्वादूदमिश्रितम् ।
एकादश्यां हरेः सारं क्षीरं सर्पिमर्धूदकम् ॥ ३४ ॥
निःसारं मनुजेन्द्राणामिति वेदविदां मतम् ।
आषाढमासे गरुड शाको निःसार उच्यते ॥ ३५ ॥
मासि भाद्रपदे वीन्द्र ह्यसारं दधि चोच्यते ।
क्षीरं तु ह्याश्विने मासे नि-सारं परिकीर्तितम् ॥ ३६ ॥
द्विदलं कार्तिके मासे निःसारं परिकीर्तितम् ।
तुलसीमणिहीनं च गात्रं निःसारमुच्यते ॥ ३७ ॥
धात्रीविरहितं पाकं निःसारं परिकीर्तितम् ।
ऊर्ध्वपुण्ड्रगदाहीना [1]नारी निःसारमुच्यते ॥ ३८ ॥
हरिभक्तिविहीना ये निःसाराः परिकीर्तिताः ।
हरिनामविहीनं तु मुखं निःसारमुच्यते ॥ ३९ ॥
हरिनैवेद्यहीनस्तु पाको निःसार उच्यते ।
त्रिदिनैश्चातसीपुष्पं निःसारं परिकीर्तितम् ॥ ४० ॥
प्रहरं मल्लिका सारं जाती तु प्रहरार्धरकम् ।
त्रियामं शतपत्रं तु करवीरमहर्निशम् ॥ ४१ ॥
घटिकावधि सारं स्यात्पारिजातं खगेश्वर ।
त्रिवर्षं केसरं पुष्पं सारमित्युच्यते बुधैः ॥ ४२ ॥
कस्तूरी दशवर्षं तु कर्पूरं वर्षमात्रकम् ।
ससारमिति संप्रोक्तं चन्दनं सर्वदा स्मृतम् ॥ ४३ ॥

---

१. नार्यसारेति कीर्तिता ।

सदा निःसारभूताश्च वक्ष्ये श्रुणु खगेश्वर ।
तुषामद्यं आरनालं पुण्यकं भिःसटा तथा ॥ ४४ ॥
उपोतकी अलाबूश्च घृतकोशातकी तथा ।
वृन्ताकं शिग्रुशाकं च बिल्वमौदुम्बरं तथा ॥ ४५ ॥
पलाण्डुर्लशुनं गृञ्जं कलंजं च तथा द्विज ।
एतत्सर्वत्र काले च निःसारं परिकीर्तितम् ॥ ४६ ॥
एकादश्यां वैश्वदेवं श्राद्धं तर्पणमेव च ।
मन्त्रेण प्रेतदहनमसारं परिकीर्तितम् ॥ ४७ ॥
हरिर्नारायणो देवो एतांश्च ह्यशुभान् रसान् ।
न गृह्णाति न गृह्णाति न गृह्णाति स्वयं प्रभुः ॥ ४८ ॥
तथापि सर्वं जानाति जीवानां पापकर्मणाम् ।
आस्वादनं कारयति स्वयं नास्वादते हरिः ॥ ४९ ॥
असारभोजनं चैवं जीवानां कर्मजं फलम् ।
अमुख्यभोजिनो जीवाः कल्याद्या मुख्यभोजिनः ॥ ५० ॥
शुभानि च पिबेद्विष्णुरशुभं नो पिबेद्विभुः ।
को वदेत्तस्य चेष्टां तु पूर्णानन्दो हरिः स्वयम् ॥ ५१ ॥
न तेन सदृशः कोऽपि देशे काले च विद्यते ।
तस्यावतारान् वक्ष्येहं श्रुणु पक्षीन्द्रसत्तम ॥ ५२ ॥

इति श्रीगरूडपुराणे ब्रह्मकाण्डे सारासारवस्तुविवेको नाम चतुर्दशोऽध्यायः ॥ १४ ॥

॥ पंचदशोऽध्यायः ॥

आद्यावतारे पुरुषो हरिश्च तमःपानं कर्तुमीशोऽव्ययात्मा ।
प्रादुर्बभूवाखिलसद्गुणात्मा स एव विष्णुः स च बीजभूतः ॥ १ ॥
यो बीजभूतः पुरुषाख्यविष्णुः स एवाभूद्वासुदेवो महात्मा ।
सृष्टिं कर्तुं पुरुषाख्यं विरिंचं मायाख्यायां मूलरूपी यथाऽस ॥ २ ॥
यो वासुदेवस्तु स एव जातः संकर्षणाख्योऽखिलसद्गुणात्मा ।
सृष्टिं कर्तुं सूत्रभूतस्य वायोर्जयाख्यायां पूर्णसंविद्बलात्मा ॥ ३ ॥
स एव संकर्षणनामधेयः प्रद्युम्ननामा च स एव विश्रुतः ।
सरस्वतीभारतीसर्जनार्थं स एव देव्या मूलरूपी बभूव ॥ ४ ॥
सृष्ट्वा युक्तं षोडशभिः कलाभिर्महत्तत्वं सूक्ष्मरूपं स एव ।
साहंकारं क्रीडयामास देवः श्रुणु त्वं वै षोडषाख्याः कलाश्च ॥ ५ ॥
भूतानि पंच पंचकर्मेन्द्रियाणि ज्ञानेन्द्रियाणीह तथा मनश्च ।
ततो बभूव ह्यनिरुद्धसंज्ञको जीवांश्च संगृह्य सुपूर्णशक्तिः ॥ ६ ॥
शान्त्यां विरिंच्यादिसमस्तदेवान् स्थूलेन देहेन ससर्ज नाथः ।
तथा स विष्णुः पुरुषाभिधस्तु सनत्कुमारत्वमवाप वीन्द्र ॥ ७ ॥
अनन्यसाध्यं ब्रह्मचर्यं च कर्तुं देहेन्द्रियाणां शोषणार्थं सदैव ।
सनन्दनादौ पठितः कुमारः तस्मान्नान्यो नात्र विचार्यमस्ति ॥ ८ ॥
स एव विष्णुः सूकरत्वं ह्यवाप क्षोणीमुद्धर्तुं दैत्यवर्यं निहन्तुम् ।
हिरण्याक्षं सज्जनानां खगेन्द्र तथा भूमेः स्थापनार्थं च देवः ॥ ९ ॥
ततो हरिर्महिदासत्वमाप ऋषेर्भार्यायां इतरायां स्वयम्भूः ।
तत्रावतारे पंचरात्रं समग्रमुपादेष्टुं नारदाय स्वतन्त्रः ॥ १० ॥
स एव विष्णुः समभूद्धर्यां नारायणाह्वः शामलायां यमाच्च ।
तपस्तप्तुं शिक्षयितुं त्वृषीणां तिरस्कर्तुं ह्यप्सरसां सहस्रम् ॥ ११ ॥

ततो हरिः कपिलत्वं ह्यवाप्य तिरोहितान् कालबलेन *तत्त्वान् ।
चतुर्विंशत्संख्यकानुद्धरिष्यन् चरिष्यन् वै आसुरये प्रवक्तुम् ॥ १२ ॥
स एव दत्तः समभूद्रमेशोऽनसूयायामत्रिऋषेः सकाशात् ।
आन्विक्षिकीं नाम सुतर्कविद्यां अलर्कनाम्ने प्राददत्तां महात्मा ॥ १३ ॥
स एव यज्ञोऽप्यभवद्रुचेश्च ह्याकूत्यां यः सच्चिदानन्दरूपः ।
स्वायम्भुवं यस्तु मन्वन्तरं च देवैः साकं पालयामास वीन्द्र ॥ १४ ॥
य एव विष्णुः स उरुक्रमोऽभूदाग्नीध्रपुत्रान्मेरुदेव्यां च नाभेः।
विद्यारतानां ज्ञानिनां सर्वदैव यत्याश्रमं दर्शयितुं च वीन्द्र ॥ १५ ॥
ततो हरिर्जगृहे मत्स्यरूपं मन्वन्तरे चाक्षुषे नाशकाले ।
नाव्यां समारोप्य महीं चरन्तं पातुं मनुं श्राद्धदेवं लयोदे ॥ १६ ॥
ततो हरिर्जगृहे कूर्मरूपं सुरासुराणामुदधिं विमथ्नताम् ।
पृष्ठे धर्तुं मन्दरं पर्वतं च ब्रह्मांडं वा धर्तुमीशो महात्मा ॥ १७ ॥
ततो हरिः प्रादुरभून्महात्मा धन्वन्तरिर्नाम हरिन्मणिद्युतिः ।
अपथ्यदोषान्परिहर्तुमेव हस्ते गृहीत्वा पूर्णकुम्भं सुधाभिः ॥ १८ ॥
ततो हरिर्जगृहे स्त्रीवपुश्च यन्मोहिनीति प्रवदन्ति लोके ।
उद्धृत्तानां दितिजानां महात्मा सम्यक्तेषां वंचयितुं हरिः स्वयम् ॥ १९ ॥
ततो हरिः प्रादुरभून्महात्मा नृसिंहनामा भगवाननन्तः ।
दैत्यं हिरण्यकशिपुं स्व ऊरुदेशे संस्थाप्य तं करजैः सन्ददार ॥ २० ॥
ततो हरिर्भगवान्वामनोऽभूददित्यां वै कश्यपाद्देवदेवः ।
इन्द्रायेमं दातुकामः स्वलोकं तदर्थं वै याचयितुं बलिं च ॥ २१ ॥
ततो हरिर्जमदग्नेः सुतोऽभूल्लोके सर्वे भार्गवं यं वदन्ति ।
ब्रह्मद्विषां क्षत्रियाणां च वीन्द्र भूमिं निःक्षत्रां कर्तुकामो महेशः ॥ २२ ॥

तत्त्वानिति आर्षप्रयोगः ।

ततोऽभवद्व्यासरूपी स विष्णुः चतुर्वारं दाशरथेश्च पूर्वम् ।
पराशरात्सत्यवत्यां बभूव पैलादिभिर्वेदभागांश्च कर्तुम् ।। २३ ।।

ततो हरी रघुवंशेऽवतीर्णः कौसल्यायां राघवः सूर्यवंशे ।
समुद्रादेर्निग्रहं कर्तुमीशो हन्तुं भूम्यां रावणादींश्च वीन्द्र ।। २४ ।।

ततो हरिर्व्यासरूपी बभूव ह्यष्टाविंशे द्वापरे ज्ञानरूपी
पराशरात्सत्यवत्यां महात्मा स्वयं वेदान् संविभक्तुं च देवः ।। २५ ।।

ततो हरिः कृष्णरूपी बभूव देवक्यां वै वसुदेवात्स विष्णुः ।
कंसादीन् वै नितरां हन्तुकामः सम्यक्पातुं पाण्डवांश्चापि वीन्द्र ।। २६ ।।

ततः कलौ संप्रवृत्ते हरिस्तु सम्मोहनार्थं चासुराणां खगेन्द्र ।
नाम्ना बुद्धो कीकटेषु प्रजातो वेदप्रामाण्यं निराकर्तुमेव ।। २७ ।।

ततो हरिः कल्किसंज्ञश्च वीन्द्र ह्युत्पत्स्यते युगयोर्मध्यसंधौ ।
दस्युप्रायान् भमिपान्वै निहन्तुं नाम्ना हरिर्विष्णुगुप्तस्य गेहे ।। २८ ।।

केशवाद्याश्च कृष्णान्ताः शतं नारायणादयः ।
विश्वादयः सहस्रं च पराद्या अमिताः स्मृताः ।। २९ ।।

अवतारा ह्यसंख्येया विष्णोर्नारायणस्य च ।
स्वयं नारायणास्त्वेते नाणुमात्रविमेदिनः ।। ३० ।।

बलतो रूपतश्चापि गुणतश्च कथंचन ।
अनन्तानन्तगुणतः पूर्णो विष्णुर्न चान्यथा ।। ३१ ।।

इति श्रीगरूडपुराणे ब्रह्मकाण्डे विष्णोरवतारनिरूपणं नाम पंचदशोऽध्यायः ।। १५ ।।

॥ षोडशोऽध्यायः ॥

कृष्ण उवाच

महालक्ष्म्याः स्वरूपं च ह्यवतारान् खगेश्वर ।
श्रुणु सम्यङ् महाभाग सम्यग् ज्ञातुं च निर्णयम् ॥ १ ॥
ईशादन्यत्र जगति ह्यनालोचन एव तु ।
विषयीकरोति यस्यास्तु ज्ञानं लक्ष्म्याः प्रकीर्तितम् ॥ २ ॥
नित्यावियोगिनी देवी हरिपादैकसंश्रया ।
नित्यमुक्ता नित्यबुद्धा महालक्ष्मीः प्रकीर्तिता ॥ ३ ॥
मूलरूपस्य तु हरेर्भार्या वै संप्रकीर्तिता ।
पुंसो हि भार्या प्रकृतिः प्रकृतेश्चाभिमानिनी ॥ ४ ॥
सृष्टिं कर्तुं गुणान्वीन्द्र पुरुषेण महाप्रभो ।
तमः पानं तथा कर्तुं प्रकृत्याख्या तदाऽभवत् ॥ ५ ॥
वासुदेवस्य भार्या तु मायानाम्नी प्रकीर्तिता ।
संकर्षणस्य भार्या तु जयेति परिकीर्तिता ॥ ६ ॥
अनिरुद्धस्य भार्या तु शान्तीनाम्नी प्रकीर्तिता ।
कृतिः प्रद्युम्नभार्या च सृष्टिं कर्तुं बभूव ह ॥ ७ ॥
विष्णुपत्नी कीर्तिता च श्रीदेवी सत्वमानिनी ।
तमोभिमानिनी दुर्गा कन्यकेति प्रकीर्तिता ॥ ८ ॥
कृष्णावतारे कन्यैव नन्दपुत्रानुजा हि सा ।
रजोऽभिमानिभूदेवी भार्या सा सूकरस्य च ॥ ९ ॥
वेदाभिमानिनी वीन्द्र अंभृणी परिकीर्तिता ।
नारायणस्य भार्या तु लक्ष्मीर्वरुणजा स्मृता ॥ १० ॥
यज्ञाख्यस्य हरेर्भार्या दक्षिणा संप्रकीर्तिता ।
जयन्ती ऋषभस्यैव पत्नी संपरिकीर्तिता ॥ ११ ॥

विदेहपुत्री सीता तु रामभार्या प्रकीर्तिता ।
रुक्मिणी सत्यभामा च भार्ये कृष्णस्य कीर्तिते ॥ १२ ॥
इत्यादिका ह्यनन्ताश्चाप्यवताराः पृथग्विधाः ।
रमायाः सन्ति विप्रेन्द्र भेदहीनाः परस्परम् ॥ १३ ॥
अनन्तानन्तगुणकाद्विष्णोर्न्यूनाः प्रकीर्तिताः ।
अथ ब्रह्मा च वायुश्च श्रियः कोटिगुणाधमौ ॥ १४ ॥
वक्ष्ये च ब्रह्मणो रूपं श्रुणु पक्षीन्द्रसत्तम ।
वासुदेवात्समुत्पन्नो मायायां च खगेश्वर ॥ १५ ॥
स एव पुरुषो नाम विरिंच इति कीर्तितः ।
अनिरुद्धात्तु शान्त्याख्यां महत्तत्वतनुस्त्वभूत् ॥ १६ ॥
तदा महाविरिंचेति संज्ञामाप खगेश्वर ।
रजसाऽत्र समुत्पन्नो मायायां वासुदेवतः ॥ १७ ॥
विधिसंज्ञो विरिंचः स ज्ञातव्यः पक्षिसत्तम ।
ब्रह्माण्डान्तः पद्मनाभाद्यो जातः कमलासनः ॥ १८ ॥
स चतुर्मुखसंज्ञां चाप्यवाप खगसत्तम ।
एवं चत्वारि रूपाणि ब्रह्मणः कीर्तितनि च ॥ १९ ॥
वायोर्नामानि वक्ष्येऽहं श्रुणु पक्षीन्द्रसत्तम ।
संकर्षणाच्च गरुड यो जयायां बभूव ह ॥ २० ॥
स वायुः प्रथमो ज्ञेयः प्रधानेति च कीर्तितः ।
लोकचेष्टाप्रदत्वात्स सूत्रनाम्नापि कीर्तितः ॥ २१ ॥
बदरीस्थस्य विष्णोश्च धैर्येण स्तवनाय सः ।
धृतिरूपं ययौ वायुस्तस्माद् धृतिरिति स्मृतः ॥ २२ ॥
योग्यानां हरिभक्तानां धृतिरूपेण संस्थितः ।
यतो हृदि स्थितो वायुस्ततो वै धृतिसंज्ञकः ॥ २३ ॥

सर्वेषां च हृदि स्थित्वा स्मरते सर्वदा हरिम् ।
अतो वायुः स्मृतिर्नाम बभूव खगसत्तम ॥ २४ ॥

अथवा वायुरेवैकः श्वेतद्वीपगतं हरिम् ।
सदा स्मरति वै वीन्द्र ह्यतोऽसौ स्मृतिनामकः ॥ २५ ॥

सर्वेषां च हृदि स्थित्वा ज्ञातो विष्णोरुदीरणात् ।
अतो मेधेति नामाभूद्वायुरेव न संशयः ॥ २६ ॥

ज्ञानद्वारेण भक्तानां मुक्तिदो मदनुज्ञया ।
यतोऽसौ वायुरेवैको मुक्तिनामा बभूव ह ॥ २७ ॥

विष्णौ भक्तिं वर्धयति भक्तानां हृदि संस्थितः ।
अतोऽसौ विष्णुभक्तेति कीर्तितो नात्र संशयः ॥ २८ ॥

यतोऽसौ सर्वजीवानां चित्तसंज्ञानमेव च ।
चित्तरूपो यतो वायुरतश्चित्तमिति स्मृतः ॥ २९ ॥

प्रभुः प्रभूणां गरुड सोदराणां च सर्वशः ।
अतस्तु वायुरेवैको महाप्रभुरिति स्मृतः ॥ ३० ॥

सर्वेषां च हृदि स्थित्वा बलं पश्यति सत्तम ।
अतो बलमिति ह्याख्यामवाप विनतासुत ॥ ३१ ॥

सर्वेषां च हृदि स्थित्वा पुत्रपौत्रादिकैर्जनैः ।
याजनं कुरुते नित्यमतोसौ यष्टृनामकः ॥ ३२ ॥

अनादिकालमारभ्य वायुपर्यन्तमेव च ।
वक्रत्वं नास्ति योगस्य ऋजुयोगी च स स्मृतः ॥ ३३ ॥

योगस्य वक्रता नाम काम्यया हरिपूजनम् ।
ईशरुद्रादिकानां च काम्येन हरिपूजनम् ॥ ३४ ॥

कदाचिदस्ति पक्षीन्द्र ह्यतस्त्वनृजवः स्मृताः ।
ऋष्यादीनां च मध्येऽपि काम्येन हरिपूजनम् ॥ ३५ ॥

अतो न ऋजवो ज्ञेया मनुष्याणां च का कथा ।
यावत्काम्यसपर्यां वै न जहाति नरोत्तमः ॥ ३६ ॥

तथा ऋष्यादयश्चैवु मोक्षस्य परिपन्थिनी ।
अनादिकालमारभ्य कर्मजन्या च वासना ॥ ३७ ॥

मोक्षाधिकारिणः सर्वे कुर्वते काम्यपूजनम् ।
नष्टप्रायं च तत्सर्वं गुरुणा ज्ञानबोधने ॥ ३८ ॥

सम्यग्योगं समाचर्य एते मोक्षमवाप्नुयुः ।
काम्येन पूजनं विष्णोरैश्वर्यं प्रददाति च ॥ ३९ ॥

ज्ञानं च विपरीतं स्यात्तेन यात्यधरं तमः ।
तदेव विपरीतं चेज्ज्ञानाय परिकीर्तितम् ॥ ४० ॥

शिलायां विष्णुबुद्धिस्तु विष्णुबुद्धिर्द्विजे तथा ।
सलिले तीर्थबुद्धिस्तु रेणुकायां तथैव च ॥ ४१ ॥

शिवे सूर्ये षण्मुखे च विष्णुबुद्धिः खगेश्वर ।
इत्याद्यमखिलं ज्ञानं विपरीतमिति स्मृतम् ॥ ४२ ॥

शिलाद्येषु च सर्वेषु चैक्येनैव विचिन्तनम् ।
विष्णुबुद्धिरिति प्रोक्तं न तु तत्रस्थवेदनम् ॥ ४३ ॥

अनाद्यनन्तकालेऽपि काम्येन हरिपूजनम् ।
यतो नास्ति ततो वायुर्ऋजुयोग्यः प्रकीर्तितः ॥ ४४ ॥

अन्येषां सर्वदा नास्ति ह्यतो न ऋजवः स्मृताः ।
वायुर्हरिं दर्शयति ह्यपरोक्षेण सर्वदा ॥ ४५ ॥

मोक्षाधिकारिणां काले ह्यतः प्रज्ञेति कथ्यते ।
परोक्षेणापि सर्वेषां हरिं दर्शयते सदा ॥ ४६ ॥

अतो वायुः सदा वीन्द्र ज्ञानमित्येव कीर्तितः ।
हिताहितोपदेष्टृत्वात् भक्तानां हृदये स्थितः ॥ ४७ ॥

ततश्च गुरुसंज्ञां चाप्यवाप स च मारुतः ।
योगिनां हृदये स्थित्वा स ध्यायति हरिं परम् ॥ ४८ ॥

पार्थक्येनापि तं ध्यायन् महाध्यातेति स स्मृतः ।
यद्योग्यतानुसारेण विजानाति परं हरिम् ॥ ४९ ॥

रुद्रादौ विद्यमानांश्च गुणान् जानाति सर्वदा ।
अतो विज्ञाननामाऽसौ प्रोक्तो हि खगसत्तम ॥ ५० ॥

काम्यानां कर्मणां त्यागाद्विराग इति स स्मृतः ।
अथवा योगिनां नित्यं हृदि स्थित्वा स मारुतः ॥ ५१ ॥

वैराग्यं संजनयति विराग इति स स्मृतः ।
देवानां पुण्यपापाभ्यां सुखमेवोत्तरोत्तरम् ॥ ५२ ॥

तत्सुखं तूत्तरेषां च वायुपर्यन्तमेव च ।
देवानां च ऋषीणामप्युत्तमानां नृणां तथा ॥ ५३ ॥

सुखांशं जनयेद्वायुर्यतोऽतः सुखसंज्ञकः ।
भुंजंति सर्वदा वीन्द्र तत्र मुख्यस्तु मारुतः ॥ ५४ ॥

दुःखशोकादिकं किंचिद्देवानां भवति प्रभो ।
तच्चासुरावेशवशादित्यवेहि न संशयः ॥ ५५ ॥

तज्जीवस्य भवेत्किंचिद्दैत्यानां क्रमशो भवेत् ।
यतः कलेश्चाधिकः स्यादतो दुःखीति स स्मृतः ॥ ५६ ॥

दैत्यानां पापपुण्याभ्यां दुःखमेवोत्तरोत्तरम् ।
तद्दुःखमुत्तरेषां तु कलिपर्यन्तमेव च ॥ ५७ ॥

भुंजन्ति सर्वदा वीन्द्र तत्र मुख्यः कलिः स्मृतः ।
सुखहर्षादिकं किंचिद्दैत्यानां भवति प्रभो ॥ ५८ ॥

देवावेशो भवेत्तस्य नात्र कार्या विचारणा ।
देवानां निरयो नास्ति दैत्यानां विनतासुत ॥ ५९ ॥

सुखस्वरूपं तन्नास्ति विषयोत्थमपि द्विज ।
विषयोत्थं किंचिदपि देवावेशादुदीरितम् ॥ ६० ॥
तमो नास्त्येव देवानां दुःखं नास्ति स्वरूपतः ।
विषयोत्थं महादुःखं देवानां नास्ति सर्वदा ॥ ६१ ॥
दुःखशोकादिकं किंचिदसुरावेशतो भवेत् ।
अतः कलिः सदा दुःखी सुखी वायुस्तु सर्वदा ॥ ६२ ॥
मनुष्याणां ऋषीणां च सुखं दुःखं खगेश्वर ।
भवेत्तत्पुण्यपापाभ्यां पुण्यभोगी च मारुतः ॥ ६३ ॥
पापभोगी कलिर्ज्ञेयो नात्र कार्या विचारणा ।
प्राणादिसुखपर्यन्ता अंशा एकोनविंशतिः ॥ ६४ ॥
प्रविष्टाः सन्ति लोकेषु पृथक्सन्ति खगेश्वर ।
मारुतेरवतारांश्च श्रुणु पक्षीन्द्रसत्तम ॥ ६५ ॥
चतुर्दशसु चेन्द्रेषु द्वितीयो यस्तु रोचनः ।
स वायुरिति संप्रोक्त इन्द्रादीनां खगेश्वर ॥ ६६ ॥
हरितत्वेषु सर्वेषु रुचिमुत्पादयति नः ।
अतो रोचननामाऽसौ मरुदंशः प्रकीर्तितः ॥ ६७ ॥
रामावतारे हनूमान् रामकार्यार्थसाधकः ।
स एव भीमसेनस्तु जातो भूम्यां महाबलः ॥ ६८ ॥
कृष्णावतारे विज्ञेयो मरुदंशः प्रकीर्तितः ।
मणिमान्नाम दैत्यस्तु संकराख्यो भविष्यति ॥ ६९ ॥
सर्वेषां संकरं यस्तु करिष्यति न संशयः ।
तेन संकरनामाऽसौ भविष्यति खगेश्वर ॥ ७० ॥
धर्मान् भागवतान् सर्वान् विनाशयति सर्वथा ।
तदा भूमौ वायुदेवो भविष्यति न संशयः ॥ ७१ ॥

प्रज्ञया सदृशो यस्य नास्ति लोके चतुर्दशे ।
अतः स प्रज्ञया पूर्णो भविष्यति न संशयः ॥ ७२ ॥

अवतारत्रये वायोर्मतं भागवताभिधम् ।
स्थापनं दुष्टदमनं द्वयमेव प्रयोजनम् ॥ ७३ ॥

नान्यत्प्रयोजनं वायोस्तथा वैरोचनात्मके ।
अवतारत्रये वीन्द्र दुःखं गर्भादिसम्भवम् ॥ ७४ ॥

नास्ति नास्त्येव वायोस्तु तथा रोचनजन्मनि ।
शुक्लशोणितसंबन्धो ह्यवतारचतुष्टये ॥ ७५ ॥

नास्ति नास्त्येव पक्षीन्द्र यतो नास्त्यशुभं ततः ।
पूर्वं गर्भं समाशोष्य समये प्रसवस्य च ॥ ७६ ॥

प्रादुर्भवति देवेशो ह्यवतारचतुष्टये ।
त्रयोविंशतिरूपाणां वायोश्चैव खगेश्वर ॥ ७७ ॥

रूपैर्ऋजुस्वरूपैश्च ब्रह्मणः परमेष्ठिनः ।
साम्यमेव न सन्देहो ज्ञानानन्दसुखादिषु ॥ ७८ ॥

एवमेव विजानीयान्नान्यथा तु कथंचन ।
एतस्य श्रवणादेव मोक्षं याति न संशयः ॥ ७९ ॥

तदनन्तरजान्वक्ष्ये श्रुणु पक्षीन्द्रसत्तम ।
कृतौ प्रद्युम्नतश्चैव समुत्पन्ने खगेश्वर ॥ ८० ॥

स्त्रियौ द्वे यमले मध्ये यद्येका या तयोः स्मृता ।
वाणीति संज्ञका वीन्द्र ब्रह्माणीति च कीर्तिता ॥ ८१ ॥

पुरुषाख्यविरिंचस्य भार्या ह्याद्यस्य वै स्मृता ।
द्वितीया भारती नाम श्रीरित्याख्या च सैव हि ॥ ८२ ॥

सूत्राख्यमुख्यवायोश्च भार्या वै परिकीर्तिता ।
महाविरिंचिभार्या तु गायत्री परिकीर्तिता ॥ ८३ ॥

विधिसंज्ञविरिंचस्य भार्या सावित्रिनामका ॥
चतुर्मुखस्य भार्या तु सरस्वत्येव कीर्तिता ॥ ८४ ॥
एवं त्रिरूपं विज्ञेयं वाण्याश्च खगसत्तम ।
वक्ष्येऽवतारान् भारत्याः समाहितमनाः श्रुणु ॥ ८५ ॥
सर्व्ववेदाभिमानित्वात् सर्व्ववेदात्मिका स्मृता ।
महाध्यातुश्च वायोस्तु भार्या सा परिकीर्तिता ॥ ८६ ॥
सुबुद्धिजनकत्वात्सा सज्जनानां खगेश्वर ।
अतः सा बुद्धिनाम्नीति भारती परिकीर्तिता ॥ ८७ ॥
यथानुभूतं च हरिं स्मयक् दर्शयतीति च ।
अतोऽनुभूतिसंज्ञा सा भारती परिकीर्तिता ॥ ८८ ॥
ज्ञानरूपस्य वायोस्तु भार्या सा परिकीर्तिता ।
सदा सुखस्वरूपत्वात् भारती तु सुखात्मिका ॥ ८९ ॥
सुखस्वरूपवायोस्तु भार्या सा परिकीर्तिता ।
गुरुस्तु वायुरेवोक्तस्तस्मिन् भक्तियुता सती ॥ ९० ॥
ततस्तु भारती नित्यं गुरुभक्तिरिति स्मृता ।
धृतिरूपस्य वायोस्तु भार्या वै परिकीर्तिता ॥ ९१ ॥
हरौ स्नेहयुतत्वाच्च हरिप्रीतिरिति स्मृता ।
धृतिरूपस्य वायोस्तु भार्या वै परिकीर्तिता ॥ ९२ ॥
सर्वमन्त्राभिमानित्वात्सर्वमन्त्रात्मिका स्मृता ।
महाप्रभोश्च वायोश्च भार्या वै सा प्रकीर्तिता ॥ ९३ ॥
भुङ्क्ते सा सर्वभोगांस्तु हरिप्रीत्यर्थमेव च ।
अतस्तु भारती ज्ञेया भुजिनाम्ना प्रकीर्तिता ॥ ९४ ॥
चित्तरूपस्य वायोस्तु भार्या सा परिकीर्तिता ।
रोचनेन्द्रस्य भार्या च श्रद्धाख्या परिकीर्तिता ॥ ९५ ॥

हनूमांश्च तदा जज्ञे त्रेतायां पक्षिसत्तम ।
तदा शिवाख्यविप्राच्च जज्ञे सा भारती स्मृता ॥ ९६ ॥

न केवलं भारती सा शच्याद्यैश्चैव संयुता ।
तस्मिन् जन्मनि ताः सर्वा नापुर्योगं स्वभर्तृभिः ॥ ९७ ॥

अन्यगात्वं च नैवापुः कन्याजन्मनि ताः स्थिताः ।
त्रेतान्ते सैव पक्षीन्द्र शच्याद्यैश्चैव संयुता ॥ ९७ ॥

दमयन्त्यां नलाज्जाता चेन्द्रसेनेति चोच्यते ।
नलं नन्दयते यस्मात् तस्माच्च नलनन्दिनी ॥ ९८ ॥

तत्र स्वभर्तृसंयोगं नैव चाप खगेश्वर ।
तत्रान्यगात्वं विज्ञेयं मुद्गलस्थेन वायुना ॥ ९९ ॥

कंचित्कालं तथा स्थित्वा कन्यैव मृतिमाप सा ।
शच्यादिसंयुता सैव द्रुपदस्य महात्मनः ॥ १०० ॥

वेदिमध्यात्समुद्भूता भीमसेनार्थमेव च ।
तत्रान्यगात्वं नास्त्येव योगश्च सह भर्तृभिः ॥ १०१ ॥

केवला भारती ज्ञेया काशिराजस्य कन्यका ।
कालीनाम्ना तु सा ज्ञेया भीमसेनप्रिया सदा ॥ १०२ ॥

शच्यादिभिः संयुतैव द्रौपदी द्रुपदात्मजा ।
देहं त्यक्त्वा विशिष्टैव कारडीग्रामसंज्ञके ॥ १०३ ॥

संकरस्य गृहे वीन्द्र भविष्यति कलौ युगे ।
वायोस्तृतीयरूपार्थं सा कन्यैव मृतिं गता ॥ १०४ ॥

इत्याद्या वायुभार्याश्च ब्रह्मभार्याश्च सत्तम ।
स्वभर्तृभ्यां च पक्षीन्द्र गुणैश्चैव शताधमाः ॥ १०५ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे महालक्ष्म्याद्यवतारनिरूपणं नाम षोडशोऽध्यायः ॥ १६ ॥

॥ सप्तदशोऽध्यायः ॥

कृष्ण उवाच

चतुर्जन्मसु वै कृष्ण शच्याद्यैः सह भारती ।
एकदेहविशिष्टैव भुवि जातेति चोक्तवान् ॥ १ ॥

कारणं ब्रूहि मे ब्रह्मन् शिष्याय तव सुव्रत ।
गरुडेनैवमुक्तस्तमुवाच मधुसूदनः ॥ २ ॥

श्रीकृष्ण उवाच

विशिष्टदेहसंप्राप्तौ भारत्याः पक्षिसत्तम ।
वक्ष्यामि कारणं वीन्द्र सावधानमनाः श्रुणु ॥ ३ ॥

पुरा कृतयुगे वीन्द्र रुद्रभार्या च पार्वती
इन्द्रभार्या शची देवी यमभार्या च शामला ॥ ४ ॥

अश्विभार्या ह्युषादेवी भर्तृभिः सहिताः खग ।
ब्रह्मलोकं ययुस्तत्र ब्रह्माणं ददृशुस्तदा ॥ ५ ॥

हावभावं विलासं च दर्शयामासुरञ्जसा ।
दृष्ट्वा ता उद्धता ब्रह्मा शशाप खगसत्तम ॥ ६ ॥

उद्धताश्च यतो यूयं मानुषीं योनिमाप्स्यथ ।
तत्र स्वभर्तृसंयोगं नावाप्स्यथ खगेश्वर ॥ ७ ॥

एवं शप्तास्तु ताः सर्वाः आजग्मुर्मेरुपर्वतम् ।
तत्रोपविष्टं ब्रह्माणं वंचयामासुरंजसा ॥ ८ ॥

तूष्णीमेव स्थिते वीन्द्र वंचयन्त्यः स्थिताः पुनः ।
ततस्तूष्णीं स्थितं वीन्द्रं वंचयामासुरंजसा ॥ ९ ॥

त्रिवारानन्तरं ब्रह्मा शप्तवांस्ता महाप्रभुः ।
त्रिवारं वंचनं यस्मादेकवारं च दर्शनम् ॥ १० ॥

विलासं च ततः सर्वाश्चतुर्जन्मसु भूतले ।
एकदेहान्मानुषत्वं भविष्यति न संशयः ॥ ११ ॥
द्वितीये जन्मनि तथा चान्यगात्वमवाप्स्यथ ।
तृतीये जन्मनि तथा भर्तृसंयोगमाप्स्यथ ॥ १२ ॥
जन्मन्याद्ये चतुर्थे च नान्यगात्वमवाप्स्यथ ।
तथा स्वभर्तृसंयोगं नावाप्स्यथ न संशयः ॥ १३ ॥
एवं शप्तास्तु ताः सर्वा ब्रह्मणा पक्षिसत्तम ।
तदा विचारयामासुर्मिलित्वा मेरुमूर्धनि ॥ १४ ॥
ब्रह्मशापश्चानिवार्य उपायैः शतशोऽपि च ।
नीचैः समागमो निन्द्यस्तथैव च विपत्तिदः ॥ १५ ॥
उत्तमेन च देवेन संगो नानर्थदो भवेत् ।
देवानामुत्तमो वायुस्तदर्थं यत्नमाचरेत् ॥ १६ ॥
विचार्यैवमुमाद्यास्ता सेवां चक्रुश्च भारतीं ।
सहस्रवत्सरान्ते सा भारती तोषिताऽब्रवीत् ॥ १७ ॥
मत्सेवां च किमर्थं वै ह्याचरिष्यथ सुव्रताः ।
तस्यां रक्ताश्च ता देव्यस्त्वब्रुवन् स्वचिकीर्षितम् ॥ १८ ॥
पुरा वयं तु शप्ताः स्मो ब्रह्मणा क्रोधरूपिणा ।
एकदेहान्मानुषत्वं अवाप्स्यथ वरांगनाः ॥ १९ ॥
चतुर्जन्मसु चाप्येवं द्वितीये जन्मनि प्रभुः ।
समाप्स्यथान्यगात्वं चेत्येवं शप्ता ह भामिनि ॥ २० ॥
अस्माकं वायुना देवेनान्यगात्वं न दोषभाक् ।
अतस्त्वयैकदेहत्वमिच्छामो देवि जन्मसु ॥ २१ ॥
इत्युक्ता ताभिरथ च तथेत्युक्त्वा द्विजोत्तम ।
सा पार्वत्यादिभिर्युक्ता भारतीत्यभवद्भुवि ॥ २२ ॥

शिवनाम्नो द्विजस्यैव गृहे सा तु कुमारिका ।
कर्मैक्यार्थं तपश्चक्रुः विष्णोश्च शिवसंज्ञिनः ॥ २३ ॥

तपसा तोषितो विष्णुः शिवसंस्थो महाप्रभुः ।
वरं प्रादात्तृतीयेऽस्मिन् कृष्णजन्मनि भोः स्त्रियः ॥ २४ ॥

सम्यक् स्वभर्तृसंयोगो भविष्यति विना भवम् ।
यतोऽनया च पार्वत्या प्रेरिता एव सर्वशः ॥ २५ ॥

विलासं दर्शयामासुर्ब्रह्मणः परमेष्ठिनः ।
अतः सा पार्वती श्रेष्ठा ब्रह्मदेहे न संशयः ॥ २६ ॥

कृष्णादेहेऽपि तस्यास्तु न भविष्यति संगमः ।
अन्यगात्वं द्वितीयेऽस्मिन् भविष्यति न संशयः ॥ २७ ॥

रुद्रान्तस्थो हरिश्चैव वरं दत्वा स्त्रियां प्रभुः ।
अन्तर्धानं ययौ श्रीमान् स्वलोकं गतवानभूत् ॥ २८ ॥

विसृज्य ताश्च तं देहं बभूवुर्नलकन्यकाः ।
इन्द्रसेनेति संज्ञां च लब्ध्वा ताश्च तपोवनम् ॥ २९ ॥

ययुस्तत्र चरन्त्यस्ता ददृशुर्मुद्गलं त्वृषिम् ।
तस्य दर्शनमात्रेण बभूवुः काममोहिताः ॥ ३० ॥

मुद्गलस्याभिमानं च नाशयित्वा च मारुतिः ।
रमयामास तत्रस्था भारत्यादिवराङ्गनाः ॥ ३१ ॥

तद्देहं ता विसृष्टाश्च बभूवुर्द्रौपदीति च ।
यस्मात्सा द्रुपदाज्जाता तस्मात्सा द्रौपदी स्मृता ॥ ३२ ॥

वेदिमध्यात्समुद्भूता तस्मात्साऽयोनिजा स्मृता ।
कृष्णवर्णा यतस्तस्मात्सा कृष्णा भूतले स्मृता ॥ ३३ ॥

कृष्णादेहेऽपि भारत्या अभिमानः सदा स्मृतः ।
शच्यादेरभिमानस्तु तस्मिन् देहे कदाचन ॥ ३४ ॥

यस्याः स्वभर्तृसंयोगकाले च खगसत्तम ।
अभिमानस्तदैव स्यात् तस्या एव न चान्यथा ॥ ३५ ॥
एतासां रमणे काले उमायाः पक्षिसत्तम ।
अभिमानश्च नास्त्येव स्वाप एव रता सदा ॥ ३६ ॥
पार्थस्य रमणे काले द्रौपद्याश्च कलेवरे ।
भारत्याश्च तथा शच्या अभिमानद्वयं स्मृतम् ॥ ३७ ॥
उमायाः शामलायाश्च ह्यभिमानक्षतिस्तदा ।
सर्वासां स्वाप एव स्यान्नात्र कार्या विचारणा ॥ ३८ ॥
अर्जुने वीररूपेण प्रविष्टो वायुरेव च ।
भारतीं रमते नित्यं अर्जुनस्तु शचीं खग ॥ ३९ ॥
युधिष्ठिरे च सौम्येन प्रविष्टो वायुरेव च ।
रमते भारतीं नित्यं श्यामलां च युधिष्ठिरः ॥
सुन्दरेण च रूपेण प्रविष्टो नकुले मरुत् ।
रमते भारतीं नित्यं नकुलश्चाप्युषां खग ॥ ४० ॥
नीतिरूपेण चाविष्टो सहदेवे च मारुतः ।
द्रौपदीं रमते नित्यं सहदेवोऽप्युषां खग ॥ ४१ ॥
शच्याद्या द्रौपदीदेहे नापुः सङ्गं च मारुतेः ।
तासामतोऽन्यगामित्वं कृष्णादेहे न चिन्तयेत् ॥ ४२ ॥
धर्मादिदेहसङ्गं च भारत्या नैव चिन्तयेत् ।
मुद्गलस्य च देहस्य तासां सङ्गं न चिन्तयेत् ॥ ४३ ॥
अपरोक्षवतीनां तु तासां लेपो न सर्वथा ।
अथवा मुद्गलस्येव रतिकाले खगेश्वर ॥ ४४ ॥
अयं तु वायुरेवेति रमणं चक्रुरंजसा ।
कृष्णादेहेऽपि ताः सर्वा अस्माकं पतयश्च ते ॥

रमणं चक्रुरेवं ता अतो दोषो न विद्यते ।
एकस्मिन् दिवसे वीन्द्र धर्मो वायुश्च तावुभौ ॥ ४५ ॥
रमणं चक्रतुः सम्यक् कृष्णादेहेऽपि मानद ।
तथापि नान्यगामित्वं चिन्तनीयं न संशयः ॥ ४६ ॥
सुराणां सुरभोग्यानां भोगं जानन्ति देवताः ।
न जानन्त्येव मर्त्यास्तु दोषदेहयुता यतः ॥ ४७ ॥
नीरक्षीरविवेकं च हंसो वेत्ति न चापरः ।
अतः स्वभर्तृसंयोगं कृष्णादेहे विचिन्तयेत् ॥ ४८ ॥
कृष्णादेहेऽन्यगामित्वं नैव चिन्त्यं खगेश्वर ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे भारत्या विशिष्टदेहसंप्राप्त्यै कारणनिरूपणं नाम सप्तदशोऽध्यायः ॥ १७ ॥

॥ अष्टादशोऽध्यायः ॥

अथानन्तरजान्वक्ष्ये श्रुणु पक्षीन्द्रसत्तम ।
श्रुणु तान्सावधानेन श्रुत्वा तानवधारय ॥ १ ॥
पुरुषाख्यविरिंचात्तु सरस्वत्यां खगेश्वर ।
प्रधानसंज्ञकायां वै जातः शेषो महाबलः ॥
हरे रमाद्याश्रयस्य स्वस्मिन्निद्रां प्रकुर्वतः ॥ २ ॥
शयनार्थमभूदेषस्तेन कृत्यं हरेर्नतु ।
सर्वदा हरिदासोऽहं सर्वदा हरिपूजकः ॥ ३ ॥
हरे सदा नमामि त्वां बहुजन्मनि जन्मनि ।
एवं बुध्द्या तु गरुड ह्यभूच्च शयनं हरेः ॥ ४ ॥
सूत्रनाम्नस्तथा वायोः श्रद्धायां विनतासुत ।
कालनामा च गरुडो वाहनार्थं हरेरभूत् ॥ ५ ॥
ततो महत्तत्वतनोर्विरिंचात्तु खगेश्वर ।
अहंकारात्मको रुद्रः समभूत्सेवितुं हरिम् ॥ ६ ॥
त्रय एते महाभाग परस्परसमाः स्मृताः ।
गायत्रीभारतीभ्यां ते त्रयः शतगुणावराः ।
शेषावतारान् वक्ष्येऽहं श्रुणु पक्षीन्द्रसत्तम ॥ ७ ॥
शामलायां च धर्माच्च नरो जातस्तु भूतले ।
शेषः स एव विज्ञेयो भक्तो नारायणस्य च ।
विष्णोर्वायोरनन्तस्य त्रिभिरंशैर्युतः सदा ॥ ८ ॥
सुमित्रायां दशरथाज्जातो यो लक्ष्मणः खग ।
सोऽपि शेषस्तु विज्ञेयो वाय्वनन्तांशसंयुतः ॥ ९ ॥
रामस्य सेवां कर्तुं स जातो भूम्यां खगाधिप ।
बलभद्रस्तु रोहिण्यां वसुदेवादभूत् खग ॥ १० ॥

सोऽपि शेषस्तु विज्ञेयो वाय्वनन्तांशसंयुतः ।
आविष्टः शुक्लकेशेन हरिणा रोहिणीसुतः ॥ ११ ॥
त्रय एते महाभाग ह्यवताराः *फणेः स्मृताः ।
न वीन्द्रस्यावतारोऽस्ति भूम्यां चाज्ञा तथा हरेः ॥ १२ ॥
न वीन्द्रस्यावतारोऽस्ति भूम्यां चाज्ञा तथा हरेः ।
रुद्रावतारान् वक्ष्येऽहं तान् श्रुणु त्वं समाहितः ।
योऽहंकारात्मको रुद्रः स एवाभूत् खगेश्वर ॥ १३ ॥
सदाशिव इति त्वाख्यामवाप स विनाशकः ।
तमोऽभिमानी स ज्ञेयस्त्वशिवत्वात्सदाशिवः ॥ १४ ॥
कपालमालामशिवां सदा धारयते यतः ।
अतः सदाशिवो ज्ञेयो न त्वभागवतः शिवः ॥ १५ ॥
गजाजिनं चापवित्रं यतो धारयते हरः ।
लोकानमंगलान्सर्वान् हरते च सदा हरः ॥ १६ ॥
हर्याज्ञया सदा लोकान् विषयासक्तचेतसः ।
विमुखान्कुरुते यस्मात् विष्णौ तस्मात्सदाशिवः ॥ १७ ॥
कदाचिदसुरावेशाद्धिरुद्धं कुरुते हरः ।
अतः सदाशिवो ज्ञेयो न त्वभागवतः शिवः ॥ १८ ॥
सोऽयं श्मशानवसतिं कर्तुमैच्छद्यतो हरः ।
अतः सदाशिवो ज्ञेयो न त्वभागवतः शिवः ॥ १९ ॥
दशकल्पं तपः कर्तुं विवेश लवणाम्भसि ।
अतो रुद्रस्तपः संज्ञामवाप च खगोत्तम ॥ २० ॥
व्यासपुत्रः शुकः प्रोक्तो वायोरावेशसंयुतः ।
रुद्रावतारो विज्ञेयो ज्ञानार्थमभवद्भुवि ॥ २१ ॥

---

* फणिनः इत्यर्थः फणेः इत्यार्षप्रयोगः ।

अत्रिपत्न्यनुसूयायां जज्ञे रुद्रो महातपाः ।
दूर्वासास्तु स विज्ञेयो मानभङ्गाय भूभृताम् ॥ २२ ॥
द्रोणाज्जातो द्रौणिसंज्ञो रुद्र एव प्रकीर्तितः ।
प्रारब्धं भोक्तुकामोऽसौ परपक्षप्रकाशकः ॥ २३ ॥
ईशान्यकोणे संस्थितो यस्तु रुद्रो ह्यवाप वै वामदेवेति संज्ञाम् ।
स्ववामभागे संस्थितं वासुदेवं स्वयोग्यभक्त्या पूज्यते यः सदैव ॥ २४ ॥
अतो रुद्रो वामदेवेति संज्ञामवाप ज्येष्ठत्वमथोत्तमत्वं ।
कालात्मकत्वं च बलात्मकत्वं अवाप रुद्रो न तु सुन्दरत्वतः ॥ २५ ॥
यदा रुद्रो त्रिपुरस्थांश्च दैत्यान् विष्णुद्रुहो हन्तुकामो महात्मा ।
अघोररूपं धृतवान् रुद्र एव ततस्त्वघोरेति स आप संज्ञाम् ॥ २६ ॥
सेवां कर्तुं त्विच्छतो दैत्यसंघान् कंचित्कालं तपसा क्लिश्यामानान् ।
वरान् दातुं सद्य एवाभिजातः सद्योजातेत्येव संज्ञामवाप ॥ २७ ॥
ऊरोः पुत्रस्तु चौर्वस्तु रुद्र एव प्रकीर्तितः ।
ऊ इत्युत्कृष्टवाचित्वात् रुस्तु रोदनवाचकः ॥ २८ ॥
ऊरू रुद्र इति प्रोक्तस्तत्पुत्रश्चौर्वसंज्ञकः ।
रुद्मुर्वरितं कर्तुं औवोऽभूद्रुद्र एव सः ॥ २९ ॥

गरुड उवाच

रोदनं कुरुते कस्मादुरुसंज्ञो हरो हरे ।
रुद्मुर्वरितं कस्मात्कुरुते और्वसंज्ञकः ॥ ३० ॥
एतद्विस्तार्य मे ब्रूहि पौत्राय तव सुव्रत ।
इत्युक्तस्तेन नृहरिरुवाच करुणानिधिः ॥ ३१ ॥

कृष्ण उवाच

दृष्ट्वा स्वबिम्बं सुगुणैस्तु पूर्णं सङ्कर्षणाख्यं लालितपादपद्मम् ।
श्रीब्रह्मशेषेन्द्रकामैस्तथान्यैर्भारत्याद्यैः सस्त्रियैश्चापि नित्यम् ॥ ३२ ॥

दृष्ट्वा हरिं पुलकाङ्गस्तु रुद्धः स बाष्पचक्षू रुद्धकण्ठश्च हृष्टः ।
अनाद्यनन्तं ब्रह्मकल्पेषु नैव कृतं मया स्मरणं सर्वदैव ॥ ३३ ॥
पदारविन्दं सुनखैर्विभूषितं दृष्ट्वाऽहं ते केन पुण्येन देव ।
दृष्ट्वा दृष्ट्वा पादपद्मं मुरारेः पुनः पुना रुद्धकण्ठो बभूव ॥ ३४ ॥
रुरोद रुद्रो भयकम्पिताङ्गः कथं पुनर्दर्शनं मे यदा स्यात् ।
मुकुन्द नारायण विश्वमूर्ते वागिन्द्रियेण स्तवनं कथं स्यात् ॥ ३५ ॥
मद्दर्शनं सर्वदा पापयुक्तं तथा मद्वाक् सर्वदा पापयुक्ता ।
मद्दर्शनं सर्वदा स्त्रीषु सक्तमभूच्च ते दर्शनं मे ह्यसक्तम् ॥ ३६ ॥
मद्वाक् सदा पुत्रदारादिकानां सम्यक् शक्तिः स्तवने नास्ति विष्णोः ।
विष्णुस्तुतौ नावकाशोऽस्ति वाचो दृष्टोऽहं त्वं केन पुण्येन देव* ॥ ३७ ॥
अनन्तकर्णेश सुचन्द्रसंज्ञ श्रोत्रेण नित्यं न कथा श्रुता ते ।
श्रुता मया बहुधा लोकवार्ता दृष्टो मया त्वं केन पुण्येन देव ॥ ३८ ॥
श्रुत्वा स्मृत्वा पादपीठं हरेश्च पुनः पुना रुद्धकण्ठो बभूव ।
रुरोद रुद्रो भयकम्पिताङ्गः कथं पुनः श्रवणं स्यात्कथायाः ॥ ३९ ॥
त्वमीश वैकुण्ठ सुवायुसंज्ञ त्वदर्पितं गन्धपुष्पादिकं च ।
सदा न लिप्तं भुजगैर्विलिप्तं तद्विष्ठमूत्रैश्च तथा च स्वेदैः ॥ ४० ॥
स्त्रीणां कुचोदैश्च कचोदकैश्च कक्षोदकैर्गात्रजलैर्मुकुन्द ।
अनर्पितैर्वस्त्रगन्धादिकैश्च दृष्टो मया केन पुण्येन देव ॥ ४१ ॥
स्पृष्ट्वा स्पृष्ट्वा हरिनिर्माल्यगन्धं पुनः पुना रुद्धकण्ठो बभूव ।
रुरोद रुद्रो भयकम्पिताङ्गो कथं पुनः स्पर्शनं स्यात्सदा मे ॥ ४२ ॥
नृसिंह नासास्थित नासिकेश मन्नासया क्वापि सुपद्मसौरभम् ।
नाघ्रातमित्थं पुनराघ्रातमेव ह्यनर्पितं गन्धपुष्पादिकं च ॥ ४३ ॥
सुनासिकं सुष्ठुदन्तं मुरारे दृष्टं मुखं केन पुण्येन देव ।
घ्रात्वा घ्रात्वा विष्णुनिर्माल्यगन्धं पुनः पुना रुद्धकण्ठो बभूव ॥ ४४ ॥

*दृष्टस्त्वं मे केन पुण्येन देव इति पाठो युक्त इति भाति ।

रुरोद रुद्रो भयकम्पिताङ्गः जिघ्रामि निर्माल्यमिदं कथं ते ।
जिह्वास्थितो जिह्वसंज्ञो हि नित्यं जिह्वेन्द्रियेणापि तथार्पितं च ॥ ४५ ॥
नैवेद्यशेषं तुलसीविमिश्रितं विशेषतः पादजलेन सिक्तं ।
योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥ ४६ ॥
एतादृशं तव नैवेद्यशेषं न भुक्तं वै सर्वदा दिव्यरूपम् ।
अनर्पितं तव देवस्य विष्णोर्भुक्तं मया बहुवारं मुकुन्द ॥ ४७ ॥
पदारविन्दे ह्यर्पितं भक्ष्यभोज्यं दृष्टं मया केन पुण्येन देव ।
भुक्त्वा भुक्त्वा हरिनैवेद्यजातं पुनः पुनः कण्ठसंरुद्ध एव ॥ ४८ ॥
रुरोद रुद्रो भयकम्पिताङ्गः कथं मम स्याद्धरिनैवेद्यजातम् ।
मुखं त्वदीयं रमया सुलालितं किरीटयुक्तं कुण्डलैः कुन्तलैश्च ॥ ४९ ॥
अनेकजन्मार्जितपुण्यसंचयैर्दृष्टं मया सज्जनसंगमाच्च ।
अनेकजन्मार्जितपापसंयचयैरदर्शनं यास्यसि देवदेव ॥ ५० ॥
एवं सुभक्त्या च रुरोद रुद्रो दृष्ट्वा हरिं सर्वगुणैः सुपूर्णम् ।
पदारविन्दं तव विश्वमूर्ते योगीश्वरैर्हृदये संगृहीतम् ॥ ५१ ॥
दृष्टं मया दयया वासुदेव द्रक्ष्ये कथं पुनरित्थं रुरोद ।
दृष्टं मया त्वरिबले भविनाशिशंखचक्रादिकैस्त्रिजगताऽपि च देव पूर्णम् ॥ ५२ ॥
एतादृशं त्वदुदरं च कथं रमेश द्रक्ष्ये पुनः पुनरहं त्विति संरुरोद ।
आनन्दपूर्ण नखपूर्ण सुकेशपूर्ण लोमादिपूर्ण गुणपूर्ण सुजंघपूर्ण ॥ ५३ ॥
वक्षःस्थलं तव विभोस्तु विशालभूतं सद्भूषणं विमलकौस्तुभशोभिलक्ष्म्या ।
सुकोमलं श्रीतुलस्यास्तथैव सुपुष्पितं चन्दनैश्चार्चितं च ।
एतादृशं तव वक्षःस्थलं च दृष्टं मया तव कारुण्यदृष्ट्या ॥ ५४ ।
पुनःपुनर्दर्शनं मे कथं स्यादेवं रुद्रः स चभक्त्या रुरोद ।
अतस्तूरुर्नाम संप्राप्य रुद्रस्तत्पुत्रोऽभूदौर्वसंज्ञः स एव ॥ ५५ ॥
यस्माद्रुद्रं चोर्वरिंत चकार तस्मात्स रुद्रस्त्वौर्वसंज्ञो बभूव ।
और्वस्तु लोकान्मोक्षयोग्यांश्च दृष्ट्वा ह्यत्यन्तं वै विषयेष्वेव निष्ठान् ॥ ५६ ॥

रुराव चौर्वो विष्णपदारविन्दं स्मृत्वा स्मृत्वा रुद्धकण्ठो बभूव ।
ते पापिष्ठा पापरूपान् भजन्तो दिने दिने दुर्विषयान् कदिन्द्रियैः ॥ ५७ ॥
कदा चैतान् हेयबुध्या विमुंचे न जानेऽहं चेति सम्यग्रुरोद ।
एते हि मूर्खा : विषयानर्थलब्ध्यै कुर्वन्ति यत्नं परमादरेण ॥ ५८ ॥
कदिन्दियार्थे च धनादिकं च त्यजन्ति सर्वे विषयेषु निष्ठाः ।
त्वन्मायया मोहितान्नष्टबुद्धीन् कदा चैतान् मुंचये विश्वमूर्ते ॥ ५९ ॥
स्मृत्वा स्मृत्वा वासुदेवस्य मायां रुरोद चोर्वो भयकम्पिताङ्गः ।
अतीवकष्टेन च लोकवृत्त्या श्रित्वा दैन्यं स्वीयकार्यं विहाय ॥ ६० ॥
अतीव दैन्येन धनादिकं च संपाद्य सर्वेऽपि सुपापशीलाः ।
कष्टार्जितं द्रव्यधनादिकं च त्यजन्ति सर्वे पशवो व्यर्थमेव ॥ ६१ ॥
सत्पात्रभूते विष्णुबुध्या कदापि त्यजन्ति नैते मायया वै मुरारेः ।
एषामायुर्व्यर्थमाहुर्महान्तः कथं नष्टा इति सम्यग्रुरोद ॥ ६२ ॥
एषामायुर्व्यर्थमेवं गतं च ह्येषां तृष्णा यौवनत्वं ह्यवाप ।
स्कन्धस्थमृत्युर्हसते कृष्ण विष्णो तं वै न जानन्ति विमूढचेतसः ॥ ६३ ॥
गृहं मदीयं शतवर्षं च जीवेत्पुत्रो मदीयः शतवर्षं च जीवेत् ।
अहं च जीवे शतवर्षं सुखेन मदीयभार्याऽपि सुलक्षणाऽस्ति ॥ ६४ ॥
गावश्च मे सन्ति सुदुग्धपूर्णा मित्राणि मे सन्ति मुदा हि युक्ताः ।
दास्ये सुतं वरणार्थं तु वध्वै पुत्रीं विवाहार्थमहं ददामि ॥ ६५ ॥
दास्ये चाहं सत्सु पुत्री धनं वा दास्ये चाहं धनिकेष्वेव नित्यम् ।
अदृष्टरूपी भगवान्वासुदेवो दृष्ट्वा दृष्ट्वा हसते सर्वदैव ॥ ६६ ॥
नाहं करिष्ये श्रवणं कथाया मद्भाग्यनाशश्च भविष्यतीति ।
नाहं हरिं पूजयिष्ये सदैव पुत्रादिनाशश्च भविष्यतीति ॥ ६७ ॥
काले काले दिष्टनामा हरिस्तु फलप्रदो वासुदेवोऽखिलस्य ।
एतादृशान् मूर्खजनांश्च दृष्ट्वा रुरोद चौर्वो वासुदेवैकनिष्ठः ॥ ६८ ॥

अस्त्वौर्वो रुद्ररूपी खगेन्द्र जानीहि नित्यं कृष्ण संशिक्षितार्थः ।
यदा सती दक्षपुत्री खगेन्द्र दक्षाध्वरे स्वशरीरं विसृज्य ॥ ६९ ॥
जज्ञे पुनर्मेनकायां हिमाद्रेस्तदा रुद्रस्त्वौर्वसंज्ञामवाप ।
ऊर्ध्वरेता भवेत्युक्त्या ऊर्ध्वरेता बभूव ह ॥ ७० ॥
पाणिग्राहं रुद्रदेवो महात्मा यदा हिमाद्रेः कन्यकायाश्चकार ।
तस्यां परं लम्पटः सम्बभूव ह्यतो रुद्रो लम्पटसंज्ञामवाप ॥ ७१ ॥
सदाशिवाद्या दशरुद्रभ्रातरः सौमित्रेयो रौहिणेयस्त्रयश्च ।
समा एते मोक्षकाले सृतौ च शतैर्गुणैर्न्यूनभूताश्च ताभ्याम् ॥ ७२ ॥

गरुड उवाच

आनन्द निर्णयं ब्रूहि कृष्ण पूर्णदयानिधे ।
निर्णेतुं ज्ञानिनां यद्वज्ज्ञापनार्थं तथा मम ॥ ७३ ॥
ब्रूहि शिष्याय दयया चोद्धर्तुं मां च सर्वदा ।
पूर्णकामस्य ते कृष्ण का स्पृहा विद्यते प्रभो ॥ ७४ ॥
एवमुक्तो हृषीकेशः पक्षीशेन महात्मना ।
उवाच कृपया कृष्णः प्रसन्नः कमलेक्षणः ॥ ७५ ॥

कृष्ण उवाच

गायत्र्याश्च शतानन्द एकानन्दस्तु वेधसः ।
एतादृशः शतानन्दो ब्रह्मणः परिकीर्तितः ॥ ७६ ॥
शेषादेश्च शतानन्दः सरस्वत्याः खगोत्तम ।
एकानन्दस्तु विज्ञेयो भारत्या विनतासुत ॥ ७७ ॥
एवं तु निर्णयो ज्ञेय आनन्दस्य सदा खग ।
एवमुक्तं मया सर्वं किमन्यच्छ्रोतुमिच्छसि ॥ ७८ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे रुद्ररोदनहेत्वानन्दतारतम्यादिनिरूपणं नाम अष्टादशोऽध्यायः ॥ १८ ॥

॥ एकोनविंशोऽध्यायः ॥

गरुड उवाच

त्वयोक्तं कृष्ण गोविन्द रुद्राच्छतगुणैरपि ।
ब्रह्माणी भारती चोभे ह्यधिके देवसत्तम ॥ १ ॥

मया श्रुतं विरिंचेन ह्युमापर्यन्तमेव च ।
अनन्तांशैर्विहीनत्वं विरिंचोक्तं सुराधिप ॥ २ ॥

सहस्रांशैर्विहीनत्वं त्वयोक्तं कृष्ण माधव ।
सर्वेषां चैव पूर्वेषामवेक्ष्यैव हरे प्रभो ॥ ३ ॥

ज्ञानानन्दबलादीनां वायुपर्यन्तमेव च ।
सहस्रांशैर्विहीनत्वं ज्ञानादीनां महेश्वर ॥ ४ ॥

निर्णयं ब्रूहि गोविन्द सर्वज्ञोऽसि न संशयः ।
गरुडेनैवमुक्तस्तु वासुदेवोऽब्रवीद्वचः ॥ ५ ॥

कृष्ण उवाच

अनन्तांशैर्विहीनत्वं विरिंचोक्तं खगाधिप ।
सहस्रांशैर्विहीनत्वं वायूक्तं च खगाधिप ॥ ६ ॥

पूर्वेषां चैव पूर्वेषां ह्यपेक्ष्यैव खगाधिप ।
उत्तरेषामुत्तरेषां गुणा एवमतिस्फुटम् ॥ ७ ॥

परिमाणे शतगुणेऽप्यानन्दस्फुटतावशात् ।
अनन्तगुणितत्वं च ब्रह्मणा समुदीरितम् ॥ ८ ॥

सहस्रगुणितत्वं च मारुतेनाप्युदीरितम् ।
यथाऽनन्दे तथा ज्ञाने विष्णुभक्तौ बलाधिके ॥ ९ ॥

सर्वैर्गुणैः शतगुणाः क्रमेणोक्तं न तेऽखिलाः ।
भारत्याश्च शतं ज्ञानं बहुलं समुदाहृतम् ॥ १० ॥

एक एव च वायोश्च ज्ञानं चैवमिति स्फुटम् ।
यथा दीपाच्छतगुणाप्यग्निज्वाला न दीपवत् ॥ ११ ॥
स्फुटीभवेद्यथैवाग्निर्बहुलोऽपि न सूर्यवत् ।
यथैव सूर्याद्द्विगुणः चन्द्रो नैव स्फुटीभवेत् ॥ १२ ॥
आनन्दतारतम्यं च यथोक्तं तु मया तव ।
तथैव जानीहि खग नान्यथा तु कथंचन ॥ १३ ॥
अहं विजानामि मयि स्थितान् गुणान् सर्वैर्विशैषैश्च खगेन्द्र संयुतान् ।
सुसूक्ष्मरूपांश्च सदा खगेन्द्र मयाप्यदृष्टो नास्ति नास्त्येव कश्चित् ॥ १४ ॥
सर्वावतारेष्वपि विद्यमानं हरिं विजानाति रमाऽपि देवी ।
हरेर्गुणान्सर्वविशेषसंयुतान् अशेषु रूपान्न विजानाति देवी ॥ १५ ॥
सुसूक्ष्मरूपान्सा विजानाति देवी ब्रह्मादिभ्यो मत्प्रसादात्सर्वदैव ।
स्वात्मस्वरूपं प्रविजानाति देवी सुसूक्ष्मरूपं सुविशेषैश्च युक्तम् ॥ १६ ॥
स्वान्यं प्रपंचं प्रविजानाति लक्ष्मीस्तथाप्येशेषैः सुविशेषैश्च युक्तम् ।
ब्रह्माऽपि पश्येत्सर्वगं वासुदेवं वाण्यादिभ्यो ह्यधिकान्सद्गुणांश्च ॥ १७ ॥
श्रीवन्न जानाति हरेर्गुणांश्च सुसूक्ष्मरूपांश्च विशेषसंयुतान् ।
स्पष्टत्वरूपेण यथा विदुः सदा मुक्तब्रह्माणो न तथान्येऽप्यमुक्ताः ॥ १८ ॥
स्वात्मानमन्यच्च सदा विशेषयुक्तं विजानाति विधिश्च मारुतिः ।
वाणी विजानाति हेरर्गुणांश्च स्वयंभुवन्नैव तावद्विशेषान् ॥ १९ ॥
त्रैगुण्यरूपात्परतः सदैव पश्येद्विष्णुं कृष्णरूपं खगेन्द्र ।
शेषो रुद्रो वीन्द्र एते त्रयश्च तमोमात्रे प्रविजानन्ति संस्थम् ॥ २० ॥
वाणीदृष्टान् सविशेषान् गुणांस्ते जानन्ति नो सत्यमेवोक्तमंग ।
उमा सुपर्णी वारुणी चेति तिस्रः महत्तत्वे प्रविजानन्ति संस्थम् ॥ २१ ॥
हरेर्विशेषान् रुद्रदृष्टान् खगेन्द्र जानन्ति नैताः कापि देशे च काले ।
इन्द्रादयः प्रविजानन्ति वीन्द्र ह्यहंकारे व्याप्तरूपं हरिं च ॥ २२ ॥

दक्षाद्या वै बुद्धितत्त्वे स्थितं तं जानन्ति ते सोमसूर्यादयश्च ।
विष्णुं हरिं भूततत्त्वे स्थितं च ये चान्ये च प्रविजानन्ति नित्यम् ॥ २३ ॥

अन्ये च पश्यन्ति यथा स्वयोग्यमण्डान्तरस्थं हरिरूपं खगेन्द्र ।
केचित्प्रपश्यन्ति हरेश्च रूपं श्वेतद्वीपस्थं हृदि केचित्सदैव ॥ २४ ॥

एवं प्रकारं प्रविजानीहि वीन्द्र ह्यतो श्रुणु त्वं मम भार्याः षडेताः ।
नीळा तु या मम भार्या खगेन्द्र सर्गे पूर्वस्मिन् कव्यवाहस्य पुत्री ॥ २५ ॥

कन्यैव सा कृष्णपत्नीत्वकामा नान्यं भर्तारं मनसाऽपि ह्यवाप ।
अतीव यत्नं कव्यवाहः खगेन्द्र पितृष्वेकः सर्वदा वै चकार ॥ २६ ॥

तथाऽपि सा नैव भर्तारमाप यतस्तु सा कृष्णनिष्ठैकचित्ता ।
तमब्रवीत्कव्यवाहश्च पुत्रीं पतिं किमर्थं नेच्छसि मूढबुद्धे ॥ २७ ॥

तदाऽब्रवीत्कव्यवाहं च पुत्री हरिं विना सर्वगुणोपपन्नम् ।
जन्मन्यस्मिन् भर्तृता नास्ति देव यतो भर्ता हरिरेवैक एव ॥ २८ ॥

यतो लोके सुस्त्रियः सर्व एव सदा ज्ञेया विधवास्ते हि नित्यम् ।
अनादिनित्यं भुवनैकसारं सुसुन्दरं मोक्षदं कामदं च ॥ २९ ॥

एतादृशं न विजानन्ति यास्तु सर्वास्ता वै विधवाः सर्वदैव ।
निमित्तभूतं भर्तृरूपं च जीवं दैन्योपेतं हरिभक्त्या विहीनम् ॥ ३० ॥

सुकश्मलं नवरन्ध्रैः स्रवन्तं दुर्गन्धयुक्तं सर्वदा कुत्सितं च ।
एतादृशे भर्तृजीवे नु तात प्रयोजनं नास्ति कृष्णं विहाय ॥ ३१ ॥

देवस्त्रियो निजभर्तॄन् विवाह्य तत्र स्थितं प्रीणयन्त्येव नित्यम् ।
अतश्च ताः सधवाः सर्वदैव लोकैर्वन्द्या नात्र विचार्यमस्ति ॥ ३२ ॥

लोके भर्तारो हरिभक्ताः यदि स्युस्तासां स्त्रीणां जन्मसाफल्यमेव ।
अनेकजन्मार्जितपुण्यसंचयैस्तद्भर्तारो हरिभक्ता भवेयुः ॥ ३३ ॥

यद्भर्तारो हरिभक्ता न सन्ति ताभिस्त्याज्यं स्वीयगात्रं भृशं हि ।
स्वभर्तृभूतं कृष्णरूपं हरिं च स्मृत्वा सम्यग् यदि गात्रं त्यजेयुः ॥ ३४ ॥

तदा नैव ह्यात्महत्यादिदोषाः स्त्रीणामेवं निर्णयोऽयं हि शास्त्रे ।
यद्भर्तारो न विजानन्ति विष्णुं तासां संगो नैव कार्यः कदाऽपि ।। ३५ ।।

अनेकजन्मार्जितपुण्यसंचयाद् तद्भर्तारो विष्णुभक्ता भवेयुः ।
कलौ युगे दुर्लभा विष्णुभक्ता हरेर्भक्तिः दुर्लभा सर्वदैव ।। ३६ ।।

हरेः कथा दुर्लभा मर्त्यलोके हरेर्दीक्षा दुर्लभा दुर्लभा च ।
हरेस्तत्त्वे निर्णयो दुर्लभो हि हरेर्दासैः संगमो दुर्लभश्च ।। ३७ ।।

प्रदक्षिणं दुर्लभो वै मुरारेर्नमस्कारो दुर्लभो वै कलौ च ।
तद्भक्तानां पालनं दुर्लभं च सद्वैष्णवानां भाषणं दुर्लभं च ।। ३८ ।।

तन्त्रोक्तपूजा दुर्लभा वै मुरारेर्नामग्रहो दुर्लभश्चैव विष्णोः ।
सुवैष्णवानां पूजनं दुर्लभं हि सद्वैष्णवानां भाषणं दुर्लभं च ।। ३९ ।।

शालग्रामस्पर्शनं दुर्लभं च सद्वैष्णवानां दर्शनं दुर्लभं हि ।
गोस्पर्शनं दुर्लभं मर्त्यलोके सद्गायनं दुर्लभं सद्गुरोश्च ।। ४० ।।

सद्भार्याः सत्पुत्रकाः दुर्लभा हि शेषाचलस्थस्य हरेश्च दर्शनम् ।
सुदुर्लभं रङ्गनाथस्य तीरे कावेर्या वै दर्शनं विष्णुपद्याः ।। ४१ ।।

काञ्चीक्षेत्रे वरदराजस्य सेवा सुदुर्लभा दर्शनं चैव लोके ।
सुदुर्लभं दर्शनं रामसेतो- सुदुर्लभा मध्वशास्त्रे च सक्तिः ।। ४२ ।।

भीमातीरे संस्थितस्यापि विष्णोः सुदुर्लभं दर्शनं चाहुरार्याः ।
रेवातीरे संस्थितस्यापि विष्णोः गयाक्षेत्रे विष्णुपादस्य चैव ।। ४३ ।।

तथा बदर्यां संस्थिस्यापि विष्णोः सुदुर्लभं मर्त्यलोके स्थितानाम् ।
शेषाचले श्रीनिवासाश्रमे च तपस्विनो दुर्लभा मर्त्यलोके ।। ४४ ।।

प्रयागाख्ये माधवस्यापि नित्यं सुदर्शनं दुर्लभं वै नृणां हि ।। ४५ ।।
अतो नेच्छामि भर्तारं कृष्णादन्यं कदाचन ।।
एवमुक्त्वा स्वपितरं ययौ शेषाचलं प्रति ।। ४६ ।।

कपिलाख्यमहातीर्थे स्नात्वा चारोहताचलं ।
तत्रस्थं श्रीनिवासं च दृष्ट्वा नत्वा महासती ॥ ४७ ॥
त्रिदिवं समुपोष्याथ गत्वा पापविनाशनीम् ।
तत्र स्नात्वा विवाहार्थमेकान्तं प्रययावथ ॥ ४८ ॥
तस्या उत्तरदिग्भागे क्रोशयुग्मे महातले ।
गर्तभूते हि चैकान्ते चचार तप उत्तमम् ॥ ४९ ॥
ध्यात्वा नारायणं देवं तत्रासीच्च कुमारिका ।
दिव्यवर्षसहस्रान्ते स्तोतुं समुपचक्रमे ॥ ५० ॥

कुमार्युवाच

त्वमेव माता च पिता त्वमेव त्वमेव भर्ता च सखा त्वमेव ।
त्वमेव पुत्रश्च गुरुर्गरीयान् मित्रं सखा त्वं मम वल्लभश्च ॥ ५१ ॥
अनाद्यनन्तेष्वपि जन्मसु प्रभो विचार्यमाणा न विजानेऽप्यहं च ।
एते हि सर्वे च निमित्तमात्रतः पित्रादयस्त्वं ह्यनिमित्तमात्रतः ॥ ५२ ॥
अतो मुरारेश्च तवैव भार्या भूयासमित्येव सदा व्रतं मे ।
दुःसंगमात्रादिसमागमं न संसिद्धिरित्येव वदान्यमूर्ते ॥ ५३ ॥
त्वद्दूषकाणां तव दासवर्य विदूषकाणां दर्शनं छिन्दि देव ।
गुरुद्रुहां दर्शनं छिन्दि विष्णो भक्तद्रुहां मित्रतां छिन्दि कृष्ण ॥ ५४ ॥
तव ध्रुग्भिर्भाषणं छिन्दि देव त्वसंगं देहि पदारविन्दे ।
श्रीशैलवासाय नमो नमस्ते नमो नमः श्रीनिवासाय तुभ्यम् ॥ ५५ ॥
स्वामिन् परावर रमेश निदानमूर्ते कालो महानपि गतश्च न दर्शनं ते ।
अनन्तजन्मार्जितसाधनैश्च त्वद्दर्शनं स्यात् च चतुर्भुजस्य ॥ ५६ ॥
कथं मम स्यात्तव दर्शनं प्रभो सर्वैश्च दोषैश्च सुसङ्गतायाः ।
दास्यास्पदायाः तव दासदास्याः प्रसीद देवेश जगन्निवास ॥ ५७ ॥

एवं स्तुतस्तदा विष्णुः श्रीनिवासो दयानिधिः।
प्रादुरासीद्वरदराट् भक्त्या तस्या जनार्दनः॥ ५८॥

वरं वरय भद्रं ते वरदोऽहमिहागतः।
हरिणोदीरितं वाक्यं श्रुत्वा प्राह स्मितानना॥ ५९॥

उवाच परया भक्त्या श्रीनिवासं जगत्प्रभुम्।
अहं हि भार्या भूयासं तव माधव सुन्दर॥ ६०॥

इति तस्या वचः श्रुत्वा श्रीनिवासोऽब्रवीद्वचः।

भगवानुवाच

अहं कुमारि सुभगे कृष्णजन्मनि भूतले॥ ६१॥

भवामि तव भर्ताऽहं नात्र कार्या विचारणा।
एवमुक्ता तु साकन्या पुण्यराशिं हरिं परम्॥ ६२॥
उवाच परमप्रीता हर्षगद्गदया गिरा।

कन्योवाच

कृष्णजन्मन्यहं पत्नी भूयासं प्रथमैव हि ॥ ६३॥

संस्कारात्प्रथमं चाहं अंगनाभ्यः समावृणे।
ओमित्युक्तः पुनर्वाक्यमुवाच मधुसूदनः॥ ६४॥

भगवानुवाच

कुमार्या विधृतत्वाच्च मत्प्रसादाच्च भामिनि।
कुमारिधारि भविता चेति तस्यै वरं ददौ॥ ६५॥

यत्र स्नानादिकं सर्वं कुर्वन्ति मनुजा भुवि।
तेषां मनोऽभीष्टसिद्धिर्भविष्यति न संशयः॥ ६६॥

इति तस्यै वरं दत्वा तत्रैवान्तरधीयत।
देहं तत्रैव संत्यज्य कुमारी चैव पुत्रिका॥॥ ६७॥

कुम्भकस्य गृहे जाता नीला नाम्ना तु सा स्मृता ।
कुम्भकस्तु महाभाग नन्दगोपस्य शालकः ।। ६८ ।।

कव्यवाहः स विज्ञेयः पितृणां प्रथमः स्मृतः ।
तस्य गत्वा गृहमहं वृषभाचलवासिनः ।। ६९ ।।

शिवस्य वरतश्चैव त्वजेयः खगसत्तम ।
दितिजान्विनिहत्यैव नीलामाप खगेश्वर ।। ७० ।।

ततो नाग्निजितो राज्ञो गृहे जाता कुमारिका ।
नाग्निजित्कव्यवाहोऽभूत् कन्या नीलाह्वयाऽभवत् ।। ७१ ।।

तस्याः स्वयंवरे चाहं गोवृषान् सप्तसंख्यकान् ।
शिवस्य वरतश्चैवाप्यवध्यान् देवमानुषैः ।। ७२ ।।

बद्ध्वा वृषान्नृपान्जित्वा प्राप्ता नीला मया खग ।
कुम्भकस्य सुता नीला देहेऽस्याः प्राविशं भृशम् ।। ७३ ।।

एक एव यतो यस्मात् तस्मात्तत्रैव साऽविशत् ।
भूमौ द्विधा संप्रजाता कुमार्येव न संशयः ।
भद्राजन्म प्रवक्ष्यामि श्रुणु पक्षीन्द्रसत्तम ।। ७४ ।।

इति श्रीगरुडपुराणे ब्रह्मकाण्डे नीलाविवाहनिर्णयो नाम एकोनविंशोऽध्यायः ।। १९ ।।

॥ विंशोऽध्यायः ॥

कृष्ण उवाच

या पूर्वसर्गे नलसंज्ञस्य वीन्द्र पुत्री भूत्वा विष्णुपत्नी सकामा ।
प्रदक्षिणं भ्रमणं वै चकार गुणेन भद्रा भद्रसंज्ञा बभूव ॥ १ ॥

कन्याभावे संस्थितां भद्रसंज्ञां पिता नलस्त्वब्रवीत्तां स पश्यन् ।
भद्रे किमर्थं गात्रपीडां करोषि फलं ब्रूहि नमनादेः पितुर्मे ॥ २ ॥

भद्रोवाच

श्रुणु त्वं मे तात नमस्क्रियादेः फलं वक्तुं कः समर्थो भवेच्च ।
तथाऽप्यहं तव वक्ष्यामि तात यथाशक्त्या श्रुणु सम्यग्घिताय ॥ ३ ॥

सदा हरिर्मम नाथो दयालुरहं हरेस्तव दासानुदासी ।
मां पाहि विष्णोस्तव वन्दे पदे इत्युक्त्वा प्रणामं चाकरोद्दण्डरूपम् ॥ ४ ॥

हरेः प्रणामं त्विति कर्तव्यशून्यं व्यर्थं तमाहुर्ज्ञानिनस्तच्छ्रुणु त्वम् ।
रमेश मध्वेश सरस्वतीशेत्येवं वदन् प्रणमेद्विष्णुदेवम् ॥ ५ ॥

यथा प्रसन्नाद्देवदेवस्तथा न तुष्टः पूजनात्कर्मतश्च ।
यथानामस्मरणाद्वन्दनाद्वा पापं गच्छेन्न तथान्येन तात ॥ ६ ॥

देहं तु ये पोषयन्त्येव तात हरेः प्रणामैः शून्यभूतं च पुष्टं ।
तदेवाहुर्व्यर्थमेवेति तात तत्पोषकाणां नरके दुःखमाहुः ॥ ७ ॥

यमोऽपि तद्गात्रमुलूखलेषु निधाय पिष्टं मुसलैः करोति ।
यो वा परं न करोत्येव तात प्रदक्षिणं देवदेवस्य विष्णोः ॥ ८ ॥

तस्यैव पादौ तिलयन्त्रे निधाय यमश्च नित्यं प्रकरोति पिष्टं ।
येषां जिह्वा हरिकृष्णेति नाम न वक्ति नित्यं व्यर्थमेवेति चाहुः ॥ ९ ॥

तेषां जिह्वां यमलोके यमस्तु निष्कास्य पिष्टं प्रकरोति नित्यम् ।
काशीनिवासेन च किं प्रयोजनं किं वा प्रयागे मरणेन तात ॥ १० ॥

किं वा रणाग्रे मरणेन सौख्यं किं वा मखादेः समनुष्ठितेन ।
समस्ततीर्थेष्वटनेन किं किमधीतशास्त्रेण सुतीक्ष्णबुध्द्या ॥ ११ ॥

येषां जिह्वाग्रे हरिनामैव नास्ति येषां गात्रैर्नमनं नापि विष्णोः ।
येषां पद्भ्यां नास्ति हरेः प्रदक्षिणं तेषां सर्वं व्यर्थमाहुर्महान्तः ॥ १२ ॥

हर्यर्पणाद्रहितं नाम कस्मात्प्रदक्षिणं नमनं चाहुरार्याः ।
अतो विष्णोर्नमनं कार्यमेव हरेनार्मस्मरणं तात कार्यम् ॥ १३ ॥

जन्म ह्येतद्दुर्लभं नश्वरं तु यथा जलस्थं बुद्बुदं तत्तथैव ।
नो विश्वासं कुरु गात्रे त्वदीये जीवेष्वपि स्वः परश्चेति तात ॥ १४ ॥

सद्यः कृतं नमनं न त्वदीयं सद्यः कृतं स्मरणं न त्वदीयम् ।
कदा प्राप्स्ये मरणं तन्न जाने न विश्वासं कुरु गात्रे महात्मन् ॥ १५ ॥

एतच्छ्रुत्वा नलो वीन्द्र पुत्रीवाक्यं सुनिर्मलम् ।
नमस्कारं च कृतवान् यथाशक्त्या प्रदक्षिणम् ॥ १६ ॥

साऽपि प्रदक्षिणं चक्रे नमस्कारं सदा हरेः ।
एवं बहुदिनं कृत्वा ध्यात्वा नारायणं परम् ॥ १७ ॥

कलेवरं च तत्याज मरणे हरिचिन्तया ।
मत्पितुर्वसुदेवस्य भगिन्या उदरे खग ॥ १८ ॥

कैकेयीति च नाम्ना सा त्वभवद्भद्रसंज्ञका ।
यस्माद्भद्रगुणैर्युक्ता भद्रा सा भद्रनामिका ॥ १९ ॥

तस्यात्मजैश्च कैकेयैः पंचभिः खगसत्तम ।
भक्त्या दत्तामिमां भद्रां प्राप्तवान् खगसत्तम ॥ २० ॥

वक्ष्येऽहं मित्रविन्दायाः पाणिग्रहणकारणम् ।
सावधानमना भूत्वा श्रुणु पक्षीन्द्रसत्तम ॥ २१ ॥

या पूर्वसर्गे पितृपुत्रिका सती ह्यग्निष्वात्ताख्यस्य मित्रानुविन्दा ।
मित्रं हरिं प्राप्तुकामा सदैव तत्रोपायं चिन्तयामास देवी ॥ २२ ॥

हरिप्राप्तौ साधनाः सन्ति तेषु मुख्यं किंस्विच्चिन्तयामास देवी ।
तेषां मध्ये श्रवणं श्रेष्ठमाहुः पुराणानां सात्विकानां सदाऽपि ॥ २३ ॥

विष्णोरुत्कर्षो वर्तते यत्र वायोस्तथोत्कर्षः सज्जनानां पुराणे ।
श्राव्यं सदा विष्णुबुध्या सदैव नान्यच्छ्राव्यं साधनं तत्र नैव ॥ २४ ॥

यस्मिन् दिने श्रवणं नास्ति विष्णोः तेषां जन्म व्यर्थमाहुः महान्तः ।
स्नानं जपः पञ्चयज्ञं व्रतं वै चेष्टापूर्तं कृच्छ्रचान्द्रे च दत्तम् ॥ २५ ॥

सर्वं व्यर्थं वैष्णवानां च दीक्षा कथां विना सम्यगनुष्ठिता वै ।
यैर्न श्रुतं भागवतं पुराणं ससंप्रदायैर्गुरुभिः संयुतैश्च ॥ २६ ॥

यैर्न श्रुतं भागवतं पुराणं यैर्न श्रुतं ब्रह्मकाण्ड पुराणम् ।
तेषां जन्म व्यर्थमाहुर्महान्तः तस्माच्छ्राव्या हरिवार्ता सदैव ॥ २७ ॥

न यत्र गोविन्दकथामहानदी न यत्र नारायणपादसंश्रयः ।
न यत्र विष्णोः सततं वचोऽस्ति न संवसेत्क्षणमात्रं कथंचित् ॥ २८ ॥

यस्मिन् ग्रामे भागवतं न शास्त्रं न वर्तन्ते भागवता रसज्ञाः ।
यस्मिन् गृहे नास्ति गीतार्थसारः यस्मिन् गृहे नामसहस्रकं च ॥ २९ ॥

तयो रसज्ञा यत्र न सन्ति तत्र न संवसेत्क्षणमात्रं कथंचित् ।
यस्मिन् दिने दिव्यकथा च विष्णोर्न वास्ति जन्तोस्तस्य चायुर्वृथैव ॥ ३० ॥

गतं गतं नात्र विचार्यमस्ति जन्म ह्येतद्दुर्लभं मर्त्यलोके ।
कर्णाकल्पैर्भूषितं सुन्दरं च न सुन्दरं चाहुरार्या रसज्ञाः ॥ ३१ ॥

विष्णोः कथाख्याभरणैश्च युक्तं तदेव कर्णं सुन्दरं चाहुरार्याः ।
तस्मात्सदा भागवतार्थसारं श्रुण्वन्ति ये सततं वाचयन्ति ॥ ३२ ॥

तेषां जन्म स्वस्थमाहुर्महान्तो महत्फलं चास्ति तथैव तेषाम् ।
सर्वेऽपि ते पूजनीया हि लोके न वै शिश्ने चोदरे चैव सक्ताः ॥ ३३ ॥

ये दाक्षिण्यादर्थलोभाद्वदन्ति सदा पुराणं भगवत्तत्वसारम् ।
प्रच्छादयन्ते तत्वगोप्यानि ये तु तेषां गतिः सूर्यसूनुः सदैव ॥ ३४ ॥

ये धर्मकाण्डे कर्मकाण्डे सदैव ह्युत्पादयन्ते सुरुचिं तत्र नित्यम् ।
मौल्येन ये कथयेयुः पुराणं तेषां गतिः सूर्यसूनुः सदैव ॥ ३५ ॥

मौल्येन ये भागवतं पुराणं श्रुण्वन्ति वै हरिशास्त्रार्थतत्त्वम् ।
मौल्येन वेदाध्ययनं प्रकुर्वते तेषां गतिः सूर्यसूनुः सदैव ॥ ३६ ॥

यदृच्छया प्राप्तधनेन ये तु संतुष्टास्ते ह्यत्र योग्याः सदैव ।
धनार्जने ये त्वतितृष्णाभियुक्तास्तेषां न वै भागवतेऽधिकारः ॥ ३७ ॥

मत्वा लोके हरिरेवेति नित्यं अन्तर्यामी नास्ति तदन्य ईशः ।
एवं सदा ये प्रविचिन्तयन्ति योगक्षेमं विभृयाद्विष्णुरेषाम् ॥ ३८ ॥

सद्वैष्णवानामशुभं नास्ति नास्ति प्रदृश्यते संशयज्ञानरूपात् ।
कर्मानुसारेण हरिर्ददाति फलं शुभानामशुभस्य चैव ॥ ३९ ॥

अतस्तदर्थं नैव यत्नं च कुर्याद्धनार्थं वै हरितत्त्वे च कुर्यात् ।
प्रातः स्नात्वा दिव्यमन्त्रश्च जप्त्वा विसृज्य भक्त्या विष्णुनिर्माल्यगन्धम् ॥ ४० ॥

शुचिर्भूत्वा भागवतं पुराणं संश्रावयेत्सर्ववेत्तापि नित्यम् ।
कर्मानुसारेण धनार्जनं च वेदार्जनं शास्त्रसमार्जनं च ॥ ४१ ॥

भविष्यति श्रवणं चापि विष्णोरत्यादरात् श्रवणं दुर्घटं च ।
अत्यादराद् भागवतस्य सारमास्वादयेद्दुर्घटं मर्त्यलोके ॥ ४२ ॥

आस्वाद्य तद्भागवतं पुराणं आनन्दबाष्पैर्युक्तता दुर्घटा च ।
श्रुत्वा तत्त्वानां निर्णयं धारणं च सुदुर्घटं चाहुरार्याः समस्तम् ॥ ४३ ॥

श्रुत्वा तत्त्वानां धारणानन्तरं च कामक्रोधोज्झारणं दुर्घटं च ।
श्रुत्वा तत्त्वानां धारणानन्तरं च तथा योगे दुर्घटं संगतं च ॥ ४४ ॥

श्रुत्वा तत्वानां धारणानन्तरं च सद्वैष्णवानां स्पर्शनं दुर्घटं च ।
एते दोषा ज्ञानपूतानपीह कुर्वन्ति सन्देहयुतान् सदैव ॥ ४५ ॥

अतो ह्यहं श्रवणं सत्कथायाः सदा करिष्ये नात्र विचार्यमस्ति ।
तेनाप्यहं हरिभार्या भवामीत्येवं निश्चित्य श्रवणं संचकार ॥ ४६ ॥

आदेहमेवं श्रवणं च कृत्वा त्यक्त्वा देहं भूतले संप्रजाता ।
मत्पितुर्वसुदेवस्य भगिन्या उदरे खग ।
सुमित्रासंज्ञकायां च जाता वै मित्रविन्दका ।। ४८ ।।

श्रवणेन हरिं मित्रं प्राप्ता सा मित्रविन्दका ।
अतः सा मित्रविन्देति संज्ञया सम्बभूव ह ।। ४९ ।।

स्वयंवरे मित्रविन्दा राज्ञां मध्ये तु भामिनी ।
ममांसे व्यसृजन्मालां तां गृहीत्वा खगेश्वर ।।
विधूय नृपतीन्सर्वान् पुरीं प्राप्तः खगेश्वर ।। ५० ।।

इति श्रीगरुडपुराणे ब्रह्मकाण्डे भद्राकृतभगवत्पतित्व प्रापकतपश्चर्यादिनिरूपणं नाम विंशोऽध्यायः ।। २० ।।

॥ एकविंशोऽध्यायः ॥

कृष्ण उवाच

कालिन्द्या अपि चोत्पत्तिं प्रवक्ष्यामि खगेश्वर ।
विवस्वान्नाम सूर्योऽभूत्तस्य पुत्री व्यजायत ॥ १ ॥
कालिन्दीसंज्ञका वीन्द्र यमुना याऽनुजा स्मृता ।
कृष्णपत्नीत्वकामेन चचार तप उत्तमम् ॥ २ ॥
तप आलोचनं प्रोक्तं चित्तं निग्रह उच्यते ।
पूर्वार्जितानां पापानामनुतापस्तपः स्मृतम् ॥ ३ ॥
प्रायो नाम तपः प्रोक्तं चित्तं निग्रह उच्यते ।
प्रायश्चित्तमिति प्रोक्तं न तु क्षौरं खगेश्वर ॥ ४ ॥
अनुतापयुतं भूतं तच्छृणु त्वं खगेश्वर ।
पूर्वं न तप्तं दिव्यमन्त्रं मुकुन्द तप्तं सदा क्लेशदावानलेन ॥ ५ ॥
न वै स्मृतं हरिनामामृतं च सदा स्मृतं हरिदोषादिकं च ।
न तु स्मृतं हरितत्त्वामृतं च सम्यक् श्रुतं लोकवार्तादिकं च ॥ ६ ॥
न पूजितं हरिपादारविन्दं सुपूजिताः पुत्रमित्रादिकाश्च ।
न वन्दितं हरिपादारविन्दं सुवन्दितो मित्रपादः सुघोरः ॥ ७ ॥
न दृष्टं वै धूपधूम्रैरुपेतं हरेर्वक्त्रं कुन्तलैः संवृतं च ।
पुत्रादिकं लालितं वै मुकुन्द न लालितं तव वक्त्रं मुरारे ॥ ८ ॥
सुलालितं भूषणैः पुत्रमित्रं न लालितं सर्वपापापहारि ।
न भुक्तं वै हरिनैवेद्यशेषं मित्रालये षड्रसान्नं च भुक्तम् ॥ ९ ॥
सुपुष्पगन्धा नार्पितास्ते मुरारे समर्पिताः पुत्रमित्रादिकेभ्यः ।
सन्तप्ताऽहं पुत्रमित्रादिकेषु कदा द्रक्ष्ये तव वक्त्रं मुकुन्द ॥ १० ॥
अवैष्णवान्नैः शिग्रुशाकादिकैश्च ह्यनर्पितान्नैश्च तथाप्यसंस्कृतैः ।
सदाप्यभक्षै रसना च दग्धा कदा द्रक्ष्ये तव वक्त्रं मुकुन्द ॥ ११ ॥

अष्टाक्षरैः पूजया दिव्यतीर्थैः विष्णोः परिभ्रामितैः शङ्खतीर्थैः ।
न पावितं मच्छरीरं मुरारे कदा द्रक्ष्ये तव वक्त्रं मुकुन्द ॥ १२ ॥
अनर्पितैर्गन्धपुष्पादिकैश्च ह्यनर्पितैर्भूषणैर्वस्त्रजालैः ।
अवैष्णवैर्दिग्धगन्धादिदोषैः दग्धं गात्रं ह्युद्धरिष्ये कदाहं ॥ १३ ॥
दग्धौ च हस्तौ मम वासुदेव न पूजितं तव विष्णोः प्रतीकम् ।
नेत्रे च दग्धे मम सर्वदाऽपि नालोकितं तव देव प्रतीकम् ॥ १४ ॥
दग्धौ च पादौ मम वासुदेव न गच्छन्तौ क्षेत्रपथं हरेश्च ।
मया कृतं पापजातं मुरारे कदा द्रक्ष्ये तव वक्त्रं मुकुन्द ॥ १५ ॥
मदीयदोषानगणय्य पूर्णदयां कुरु त्वं शुद्धदास्यान्मुकुन्द ।
यावन्ति लोमानि मदीयगात्रे सन्ति प्रभो सर्वदोषैर्विदूर ॥ १६ ॥
तावन्ति पापानि मदीयगात्रे कदा द्रक्ष्ये तव वक्त्रं मुकुन्द ।
अनन्तदेहैः पतिपुत्रैर्गृहैश्च मित्रैर्धनैः पशुभृत्यादिकैश्च ॥ १७ ॥
सुखं नाप्तं ह्यणुमात्रं मुकुन्द सेवा त्यक्त्वा तव देवस्य विष्णोः ।
इतः परं पुत्रमित्रादिकं च यास्ये नाहं तव दासी भवामि ॥ १८ ॥
ये ये ब्रूयुः पुत्रमित्रादिकैश्च सम्यक् सुखं जायते मर्त्यलोके ।
तेषामास्ये मूत्रविष्ठादिकं च सम्यक्सदा पतितं चेति जाने ॥ १९ ॥
मित्रादीनां यत्कृतं द्रव्यजातं वृथा गतं मलरूपं च जातम् ।
सद्वैष्णवानां यत्कृतं द्रव्यजातं हरिप्राप्तेः कारणं स्यात्सदैव ॥ २० ॥
एतादृशं तत्तुजातं मुकुन्द अलं ह्यलं तेन दुःखं च भुक्तम् ।
संगाद्दत्तात् सज्जनानां सदा त्वं विना च त्वं दुर्जनानां च संगात् ॥ २१ ॥
संगैः सदा दुर्जनानां मुरारे गात्रं दग्धं न विरागेण युक्तम् ।
एतादृशाहं कां गतिं वा मुकुन्द यास्ये न जाने दयया मां च पाहि ॥ २२ ॥
एतादृशो ह्यनुतापः खगेन्द्र प्रायश्चित्तं न च क्षौरादिकं च ।
भानोः कन्या ह्यनुतापं च कृत्वा विचारयामास हरेः सुतत्त्वम् ॥ २३ ॥

सर्वोत्तमो हरिरेकः सदैव यतः पूर्णः सर्वगुणैस्ततश्च ।
सृष्टौ यस्माज्जायते विश्वजातं अतो हरिः सर्वगुणैश्च पूर्णः ।। २४ ।।
यो देवानां नामधा एक एव यतो ब्रह्माद्या नैव पूर्णाः समस्ताः ।
लक्ष्मीप्रसादाच्चिरपुण्येन जातो यथायोग्यं गुणपूर्णो विरिंचः ।। २५ ।।
न लक्ष्मीवद्गुणपूर्णो विरिंचो न विष्णुवद्गुणपूर्णा रमाऽपि ।
न वायुवद्भारती चापि पूर्णा न शेषवद्वारुणी चापि पूर्णा ।। २६ ।।
न रुद्रवत्पार्वती पूर्णरूपो ह्यन्येऽप्येवं नैव पूर्णाः सदैव ।
आलोचनं चैवमेषा हि कृत्वा तपश्चक्रे यमुनायाश्च तीरे ।। २७ ।।
तदा चाहं यमुनायाश्च तीरं पार्थेन साकं मृगयामनश्च ।
दृष्ट्वा च तां तत्र तपश्चरन्तीं तदाऽब्रुवं मत्सखायं च पार्थम् ।। २८ ।।
हे पार्थ शीघ्रं गच्छ कन्यासमीपं त्वं पृच्छ कस्माद्धि तपः करोषि ।
एवं प्रोक्तस्तत्समीपं स गत्वा पृष्ट्वा चैतत्कारणं शीघ्रमेव ।। २९ ।।
आगत्य मामवदत्फाल्गुनोऽयं सर्वं वृत्तान्तं ह्यंजसा मत्समीपे ।
ततस्त्वहं सुमुहूर्ते च तस्याः पाणिग्रहं कृतवांस्तत्र सम्यक् ।। ३० ।।
तस्याश्च तापात्सन्ततं मद्विचारात्प्रसन्नोऽहं सन्ततं सुप्रसन्नः ।
पूर्णानन्दे रममाणस्य नित्यं तया च मे किं सुखं स्यात्खगेन्द्र ।। ३१ ।।
मया विवाहोऽनुग्रहार्थं हि तस्या अंगीकृतो न तु सौख्याय वीन्द्र ।
तथा वक्ष्ये लक्षणायाः स्वरूपं पाणिग्रहे कारणं चापि वीन्द्र ।
श्रुणुष्व तत्तव वक्ष्यामि गोप्यं सच्छिष्यके नास्ति गोप्यं गुरोश्च ।। ३२ ।।

इति श्रीगरुडपुराणे ब्रह्मकाण्डे कालिन्द्या विवाहहेतुनिरूपणं नाम एकविंशोऽध्यायः ।। २१ ।।

॥ द्वाविंशोऽध्यायः ॥

कृष्ण उवाच

या लक्षणा पूर्वसर्गे खगेन्द्र पुत्री ह्यभूद्बर्हिषदस्य वेत्तुः ।
सुलक्षणैः संयुतत्वाद्यतः सा सुलक्षणेति प्रथिता खगेन्द्र ॥ १ ॥

यथा लक्ष्मीर्लक्षणैः सा सुपूर्णा यथा हरिर्लक्षणैर्वै सुपूर्णः ।
यथा वायुर्लक्षणैः पूर्ण एव यथा गायत्री लक्षणैः सा सुपूर्णा ॥ २ ॥

तथा रुद्राद्या लक्षणैर्नैव पूर्णा रुद्रादिवल्लक्षणा नैव पूर्णा ।
गुणेनैव धर्मतः किंचिदेव तथाऽनुसन्धानात् विव्रियते नाम चापि ॥ ३ ॥

तस्मादाहुर्लक्षणेत्येव सर्वे तल्लक्षणं श्रुणु चादौ खगेन्द्र ।
नारायणे पूर्णगुणे रमेशे द्वात्रिंशत्संख्यानि सुलक्षणानि ॥ ४ ॥

सन्त्येव पक्षीन्द्र वदाम्यनुक्रमान्मत्तः श्रुत्वा मोक्षमाप्नोति नित्यम् ।
यः सप्तपादः षण्णवत्यङ्गुलो यश्चतुर्हस्तः पुरुषो दुर्घटश्च ॥ ५ ॥

एतत्सर्वं मिलितं चैकमेव हरेर्विष्णोर्लक्षणं चाहुरार्याः ।
मुखं स्निग्धं वर्तुलं पुष्टिरूपं द्वितीयं तल्लक्षणं चाहुरार्याः ॥ ६ ॥

हनुर्यस्यानुन्नतं चास्ति वीन्द्र तल्लक्षणं प्राहुरार्यास्तृतीयम् ।
यद्दन्ता वै तीक्ष्णसूक्ष्माश्च सन्ति तल्लक्षणं चाहुरार्याश्चतुर्थम् ॥ ७ ॥

यस्याधरे रक्तिमा त्वस्ति वीन्द्र तल्लक्षणं पंचमं चाहुरार्याः ।
हस्ता रक्ताः सन्ति वै वीन्द्र यस्य तल्लक्षणं प्राहुरार्याश्च षष्ठम् ॥ ८ ॥

यस्मिन्नखाः सन्ति रक्ताः सुशोभाः तल्लक्षणं सप्तमं चाहुरार्याः ।
यस्मिन्कपोले रक्तिमा त्वस्ति वीन्द्र तल्लक्षणं ह्यष्टमं प्राहुरार्याः ॥ ९ ॥

यस्मिन् करे शंखचक्रादिरेखा वर्तन्ते तन्नवमं प्राहुरार्याः ।
यस्योदरं तन्तुरूपं सुपुष्टं वलित्रयैरंकितं सुन्दरं च ॥ १० ॥

तल्लक्षणं दशमं प्राहुरार्या एकादशं निम्ननाभिं तदाहुः ।
ऊरुद्वयं यस्य च मांसलं वै तल्लक्षणं द्वादशं प्राहुरार्याः ।। ११ ।।

कटिर्हि दीर्घा पृथुलाऽस्ति यस्य त्रयोदशं लक्षणं चाहुरार्याः ।
यस्यास्ति वक्षः सुपरिष्ठितं वै चतुर्दशं लक्ष्म तदाहुरार्याः ।। १२ ।।

समुन्नतं शिश्नमथो हि लक्ष्म यस्यास्ति तत्पंचदशं वदन्ति ।
सुताम्रकं पादतलं खगेन्द्र तल्लक्षणं षोडशं प्राहुरार्याः ।। १३ ।।

निम्नौ च गुल्फौ सप्तदशं तदाहुर्ग्रीवारूपं प्राहुरष्टादशं च ।
एकोनविंशं त्वक्षिपद्मं सुरक्तं प्राहुर्बाहुं जानु विंशं तथैव ।। १४ ।।

विस्तीर्णोरश्चैकविंशं तदाहुः सिंहास्कन्धं ह्युत्तरं विंशमाहुः ।
त्रयोविंशं सूक्ष्ममास्यं तदाहुश्चतुर्विंशं सुप्रसन्ने च दृष्टी ।। १५ ।।

ह्रस्वं लिंगं मार्दवं चापि वीन्द्र तल्लक्षणं पंचविंशं वदन्ति ।
समौ च पादौ कटिजानु चोरू षड्विंशमाहुश्च समे च जंघे ।। १६ ।।

समानहस्तौ समकर्णौ मिलित्वा द्वात्रिंशत्कं लक्षणं प्राहुरार्याः ।
द्वात्रिंशत्कं लक्षणं वै मुकुन्दे द्वात्रिंशत्कं लक्षणं वै रमायाम् ।। १७ ।।

द्वात्रिंशत्कं लक्षणं ब्रह्मणोऽपि तद्भारत्याः प्रवदन्त्येव सत्यम् ।
तथा च शंका सममेव चक्रिणेत्येवं सदा मा कुरु निर्णयं ब्रुवे ।। १८ ।।

एकस्य वा लक्षणस्यापि विष्णोर्लक्ष्मीरन्तं नैव सम्यक् प्रपेदे ।
अतोऽनन्तैर्लक्षणैः संयुतं च हरिं चाहुर्लक्षणज्ञाः सदैव ।। १९ ।।

जानाति लक्ष्मीर्लक्षणं वायुदेवः स्वापेक्षया ह्यतिरिक्तं खगेन्द्र ।
स्वलक्षणापेक्षया भारती तु शतैर्गुणैरधिकं वेधसोऽपि ।। २० ।।

खगेन्द्र तस्माल्लक्षणे साम्यचित्तं विष्ण्वादीनां सर्वदा मा कुरुष्व ।
अष्टाविंशतिं चापि रुद्रादिकानां भ्रूनेत्रयोर्लक्षणेनैव हीनाः ।। २१ ।।

अलक्षणं मन्यते यद्धि तस्य दुर्लक्षणं नैव तच्चिन्तनीयम् ।
अष्टाविंशतिं लक्षणं वै हरस्य न भारतीवच्चिन्तनीयं खगेन्द्र ।। २२ ।।

अतो हरः क्रोधरूपी सदैव [१]तेषामभावात्सत्यमुक्तं मयैतत् ।
अतो द्वयं नास्ति रुद्रे खगेन्द्र शिश्नोदरे किंचिदाधिक्यमस्ति ।। २३ ।।

सप्ताधिकैर्विंशतिलक्षणैस्तु सम्यग् युताः स्वस्त्रियो लक्षणाद्याः ।
षड्विंशत्या लक्षणैश्चापि युक्ता वारुण्याद्या पंचविंशैश्च चेन्द्रः ।। २४ ।।

चतुर्विंशतिभिश्चैव युक्तो नासावायोर्व्यधिका विंशतिश्च ।
लक्षणैश्चैकविंशत्या शची युक्ता न संशयः ।। २५ ।।

प्रवहो विंशकैर्युक्तो यम एकोनविंशकैः ।
पाश्यष्टादशभिर्युक्तो दशसप्तयुतोऽनलः ।। २६ ।।

वैवस्वतो षोडशभिः मित्रः पंचदशैर्युतः ।
चतुर्दशैस्तु धनपः पावकस्तु त्रयोदशैः ।। २७ ।।

गङ्गा द्वादशभिर्युक्ता बुध एकादशैर्युतः ।
शनिस्तु दशसंख्याकैः पुष्करो नवभिर्युतः ।। २८ ।।

अथ षोडशसाहस्रं भार्यास्तु मम वल्लभाः ।
अष्टभिश्चैव संयुक्ताः सप्तभिः पितरस्तथा ।। २९ ।।

षड्भिश्च देवगन्धर्वाः पंचभिस्तदनन्तराः ।
चतुर्भिः क्षितिपाः प्रोक्ताः त्रिभिरन्ये च संयुताः ।। ३० ।।

उदरे किंचिदाधिक्यं ह्रस्वे पादे च कर्णयोः ।
शिखाधिक्यं विना विप्र भार्यायां च शिवस्य च ।। ३१ ।।

लक्षणायां पंच दोषाः शिरोगुल्फादिकं विना ।
नाभ्याधिक्ये सहैवाष्टौ दोषाः सन्त्यातिवाहिके ।। ३२ ।।

---

१. तयो ।

जंघाधिक्ये सहैवाष्टौ दोषाः शच्याः सदा स्मृताः ।
एवमेव हि दोषाश्चाप्यूहनीयाः खगेश्वर ॥ ३३ ॥

दुर्लक्षणैः सदा वीन्द्र संयुतः कलिरेव हि ।
महोदरो लम्बनाभिरीषामात्रोग्रदंष्ट्रकः ॥ ३४ ॥

अन्धकूपगभीराक्षो लम्बकर्णोष्ठनासिकः ।
लम्बगुल्फो वक्रपादः कुनखी श्यावदन्तकः ॥ ३५ ॥

दीर्घजंघो दीर्घशिश्नस्त्वेकांडश्चैकनासिकः ।
रक्तश्मश्रू रक्तरोमा वक्रास्यः संप्रकीर्तितः ॥ ३६ ॥

दग्धपर्वतसंकाशो रक्तपृष्ठः कलिः स्मृतः ।
अलोमशीर्षा संप्रोक्तः रक्तगण्डकपोलकः ॥ ३७ ॥

ललाटे पाण्डुता नित्यं वामस्कन्धे करे खग ।
कूर्मदृष्टिर्दोषवादी तथा वै घर्घरस्वरः ॥ ३८ ॥

अत्याशी चातिपानश्च स्तनौ शुष्कफलोपमौ ।
ऊरौ नवांकितारोमस्तथा पृष्ठे च मस्तके ॥ ३९ ॥

ललाटे त्रीणि दीर्घे तु समे द्वौ संप्रकीर्तितौ ।
सर्पाकारस्तु यो मत्स्यस्तस्य शिश्ने प्रकीर्तितः ॥ ४० ॥

पादत्राणसमो मत्स्यो रसनाग्रे प्रकीर्तितः ।
शिश्नाकारश्च यो मत्स्यो गुदे तस्य प्रशस्यते ॥ ४१ ॥

वृश्चिकाकारमत्स्यस्तु पदोस्तस्य प्रशस्यते ।
श्वाकारश्चापि मत्स्यो वै मुखे तस्य प्रकीर्तितः ॥ ४२ ॥

हस्ते तु बहुरेखाः स्युर्लोमनासापुटे स्मृतम् ।
अतिदीर्घं तु चाङ्गुष्ठं कनिष्ठं चातिदीर्घकम् ॥ ४३ ॥

दुर्लक्षणं त्वेवमादि कलावस्ति ह्यनेकशः।
सुलक्षणान्यनेकानि मयि सन्ति खगेश्वर ॥ ४४ ॥

द्वात्रिंशल्लक्षणो विष्णुर्ब्रह्मणोऽपेक्ष्यैव तत्।
इत्यभिप्रायगर्भेण ब्रह्मणोक्तं तव प्रभो ॥ ४५ ॥

ब्रह्मोक्तस्य मयोक्तस्य विरोधो नास्ति सत्तम।
मयोक्तस्यैव व्यत्यासः कम्बुग्रीवे प्रदृश्यते ॥ ४६ ॥

रक्ताधरं रक्ततालु चैकीकृत्य मयोदितम्।
अतो विरोधो नास्त्येव तथाऽज्ञानात्प्रतीयते ॥ ४७ ॥

सप्ताधिकैर्विंशतिलक्षणैस्तु समायुताः याः स्त्रियो लक्षणाद्याः ॥ ४८ ॥

भगे नेत्रे च हस्ते च स्तने कुक्षौ तथैव च।
भारत्यपेक्षया पंचभिर्न्यूना त्वस्ति लक्षणैः ॥ ४९ ॥

न रुद्रवन्न चान्यानि लक्षणानि खगेश्वर।
षड्विंशत्या लक्षणैश्चापि युक्ता वारुण्याद्याः षड्लक्षणैश्चापि हीनाः ॥ ५० ॥

कर्णे कुक्षौ नासिकाकेशपाशे गुल्फे भगे किंचिदाधिक्यमस्ति।
इन्द्रो युक्तः पंचविंशत्या खगेन्द्र सदा हीनो लक्षणैः सप्तसंख्यैः ॥ ५१ ॥

हस्ते पादे उदरे कर्णयोश्च शिश्ने गुल्फे त्वधरोष्ठेऽधिकं च।
चतुर्विंशत्या लक्षणैश्चापि युक्तो नासिक्यवायुस्तद्वदेवाष्टभिश्च ॥ ५२ ॥

नाभ्यां गुल्फे हनुरंघ्र्योश्च स्कन्धे द्विजे नेत्रे ह्यधरोष्टेऽधिकं च।
त्रयोविंशत्या लक्षणैश्चापि युक्ता शची तथा नवदोषैश्च युक्ता ॥ ५३ ॥

भगे केशे ह्यधरोष्ठे च कर्णे जंघे गण्डे वक्षसि गुल्फयोश्च।
तथोत्तरोष्ठे किंचिदाधिक्यमस्ति चैवं विजानीहि खगेन्द्रसत्तम ॥ ५४ ॥

द्वाविंशत्या लक्षणैः संयुतस्तु दशभिर्दोषैः प्रवहो नाम वायुः।
एकाधिकैर्विंशतिलक्षणैस्तु तथा चैकादशभिर्दोषतोऽर्कः ॥ ५५ ॥

तद्विंशत्या लक्षणैः संयुतस्तु तदा दोषैर्द्वादशभिश्च चापः ।
एकोनविंशत्या लक्षणैश्चापि युक्तस्त्रयोदशभिस्तदभावैर्युतोऽग्निः ॥ ५६ ॥

अष्टादशभिर्लक्षणैः संयुतस्तु वैवस्वतस्तदभावैश्चतुर्दशभिः ।
मित्रस्तु सप्तदशभिर्लक्षणैः संयुतः खग ॥ ५७ ॥

सदोषैः पंचदशभिः संयुक्तो नात्र संशयः ।
तैश्च षोडशभिर्युक्तो धनपो नात्र संशयः ॥ ५८ ॥

तदभावैः षोडशभिः संयुक्तः संप्रकीर्तितः ।
तैः पंचदशभिश्चैव युक्तोऽग्रेः ज्येष्ठपुत्रकः ॥ ५९ ॥

तैः सप्तदशभिर्दोषैः संयुक्तो नात्र संशयः ।
तैश्चतुर्दशभिश्चैव गंगा संपरिकीर्तिता ॥ ६० ॥

तथाष्टादशभिर्दोषैः संयुता नात्र संशयः ।
तैस्त्रयोदशभिश्चैव संयुतो बुध एव तु ॥ ६१ ॥

दोषैरेकोनविंशत्या संयुतो नात्र संशयः ।
शनिर्विंशतिदोषेण युतो द्वादशलक्षणैः ॥ ६२ ॥

लक्षणैश्चैकादशभिः पुष्करः परिकीर्तितः ।
एकविंशतिसंख्याकैरसद्भावैः प्रकीर्तितः ॥ ६३ ॥

दशभिर्लक्षणैर्युक्ताः पितरो ये चिराः खग ।
त्रयो विंशतिदोषैश्च संयुता नात्र संशयः ॥ ६४ ॥

अष्टभिर्लक्षणैर्युक्ता देवगन्धर्वसत्तमाः ।
दोषैश्चतुर्विंशतिभिः संयुक्ताः परिकीर्तिताः ॥ ६५ ॥

सप्तलक्षणसंयुक्ता गन्धर्वा मानुषात्मकाः ।
यैस्तु पंचविंशतिभिर्दोषैः संयुक्ताः संप्रकीर्तिताः ॥ ६६ ॥

षड्गुणैः क्षितिपा युक्ता षड्विंशत्या च दोषतः ।
तदन्ये पंचभिर्युक्ताश्चतुर्भिः केचिदेव हि ।। ६७ ।।

त्रिभिः केचित्ततो हीना न सन्ति खगसत्तम ।
यस्मिन्नरे क्षितिपे वा खगेन्द्र ह्याधिक्यं यद्दृश्यते लक्षणस्य ।। ६८ ।।

न ते नरा नैव ते वै क्षितीशाः सर्वे ते वै ह्युत्तमाः सर्व एव ।
ये देवा ये च दैत्याश्च सर्वेऽप्येवं खगाधिप ।। ६९ ।।

लक्षणालक्षणैश्चैव क्रमेणोक्ता न संशयः ।
लक्षणा सप्तविंशत्या लक्षणैः संयुता खग ।। ७० ।।

अतः सा लक्षणा ज्ञेया द्वात्रिंशल्लक्षणैर्न हि ।
पितुर्गृहे वर्धमाना सदाऽपि पितुः कुटुम्बं पोषयितुं खगेन्द्र ।। ७१ ।।

उवाच सा पितरं दीयमानमन्नादिकं पुत्रमित्रादिकेषु ।
सदाऽपि ये त्वनुसन्धानेन युक्ता अन्तर्गते तत्र तत्र स्थिते च ।। ७२ ।।

अज्ञात्वैव चान्नपानादिकं च दत्तं सन्तो व्यर्थमेवं वदन्ति ।
हरिं वक्ष्ये तत्र तत्र स्थितं च तं वै श्रुणु त्वादरेणाद्य नित्यम् ।। ७३ ।।

बालो हरिर्बालरूपेण कृष्णः क्षीरादिकं नवनीतं घृतं च ।
गृह्णाति नित्यं भूषणं वस्त्रजातमेवं दद्यात्सर्वदा विष्णुतुष्ट्यै ।। ७४ ।।

मित्रैर्हरिः केशवाख्यो मुकुन्दो भुंक्ते दत्तं ह्यन्नपानादिकं च ।
पूर्वं दद्यात्सर्वदा वै गृहस्थो धन्यो भवेदन्यथा व्यर्थमेव ।। ७५ ।।

गृह्णाति नित्यं माधवाख्यो हरिश्चेत्येवं ज्ञात्वा देयमन्नादिकं च ।
एवं ज्ञात्वा दीयमानेन नित्यं प्रीणाति विष्णुर्नान्यथा व्यर्थमेव ।। ७६ ।।

गृहे नित्यं वासुदेवो हरिस्तु प्रीणाति नित्यं तत्र तिष्ठन् सुपर्ण ।
एवं ज्ञात्वा स्वगृहं सर्वदैव ह्यलंकुर्याद्धातुरूपैः सदैव ।. ७७ ।।

गोविन्दाख्यस्तिष्ठति वैष्णवानां पुत्रैर्युतस्तिष्ठति वासुदेवः ।
मित्रे मुकुन्दः शालके चानिरुद्धः नारायणो द्विजवर्ये सदाऽऽस्ति ॥ ७८ ॥
गोष्ठे च नित्यं विष्णुरूपी हरिस्तु ह्यश्वे सदा तिष्ठति वामनाख्यः ।
संकर्षणः शूद्रवर्णे सदाऽस्ति वैश्ये प्रद्युम्नस्तिष्ठति सर्वदैव ॥ ७९ ॥
जनार्दनः क्षत्रजातौ सदाऽस्ति दाशेषु नित्यं महिदासो हरिस्तु ।
मह्यां नित्यं तिष्ठति सर्वदैव ह्युपेन्द्राख्यो हरिरेकः सुपर्ण ॥ ८० ॥
गजे सदा तिष्ठति चक्रपाणिः सदाऽन्तरे तिष्ठति विश्वरूपः ।
नित्यं शुनि तिष्ठति भूतभावनः पिपीलिकायामपि सर्वदैव ॥ ८१ ॥
त्रिविक्रमो हरिरूप्यन्तरिक्षे सर्वत्र जातावनन्तरूपी हरिस्तु ।
हरेर्नवर्णोऽस्ति न गोत्रमस्ति न जातिरीशे सर्वरूपे विचित्रे ॥ ८२ ॥
एवं ज्ञात्वा सर्वदा लक्षणा तु हरिं सदा प्रीणयामास देवी ।
भक्त्या मयेत्थं क्रियमाणया हरिः पतिर्मम स्यादिति चिन्तयाना ॥ ८३ ॥
तत्याज देहं विष्णुपत्नीत्वकामा मद्रेषु वै वीन्द्र पुत्री प्रजाता ।
स्वयंवरे लक्षणाया अहं च भित्वा लक्ष्यं भूपतीन् द्रावयित्वा ॥ ८४ ॥
पाणिग्राहं लक्षणायाश्च कृत्वा गत्वा पुरीं रमयामास देवीम् ।
तथैवाहं जाम्बवत्या विवाहं मत्पत्नीत्वे कारणं त्वां ब्रवीमि ॥ ८५ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे लक्षणाविवाहहेतुनिरूपणं
नाम द्वाविंशोऽध्यायः ॥ २२ ॥

॥ त्रयोविंशोऽध्यायः ॥

कृष्ण उवाच

सोमस्य पुत्री पूर्वसर्गे बभूव भार्या मदीया जाम्बवती मम प्रिया ।
तासां मध्ये ह्यधिका किंचिद्रुद्रादिभ्यः पंचगुणैर्विहीना ॥ १ ॥
रमावेशो बलवान्स्याच्च तासु तदा तासां प्रीयते केशवोऽलम् ।
यदावेशो ह्रासमुपैति लक्ष्म्याः कामादिभ्यो विंशगुणाधिकाः स्युः ॥ २ ॥
यदावेशो बलवान्स्याद्रमायास्तदा जाम्बवती शेषतुल्या प्रियत्वे ।
यदावेशो ह्रासमुपैति वीन्द्र तदा तासां साम्यमाहुर्महान्तः ॥ ३ ॥
लक्ष्म्यावेशः किंचिदस्त्येव नित्यमतस्ताभ्यः किंचिदाधिक्यमस्ति ।

गरुड उवाच

तासां मध्ये जाम्बवती तु कृष्ण ह्याराधनं कीदृशं सा चकार । ४ ॥
तन्मे ब्रूहि कृपया विश्वमूर्ते चाधिक्ये वै कारणं ताभ्य एव ॥
गरुडेनैवमुक्तस्तु भगवान् देवकीसुतः ।
मेघगम्भीरया वाचा चोवाच विनतासुतम् ॥ ५ ॥

कृष्ण उवाच

या पूर्वसर्गे सोमपत्री बभूव पितुर्गृहे वर्तमानाऽपि साध्वी ।
जन्म स्वकीयं सार्थकं वै चकार पित्रा साकं विष्णुशुश्रूषणेन ॥ ६ ॥
शुश्राव नित्यं सत्पुराणानि चैव सदा चक्रे विष्णुपादप्रणामम् ।
चक्रे सदा तारकस्यापि विष्णोः प्रदक्षिणं स्मरणं कुर्वती सा ॥ ७ ॥
पित्रा साकं सा तु कन्या खगेन्द्र वैराग्ययुक्ता श्रवणात्संबभूव ।
कोशं च मित्रं द्विरदादिकं च ह्यनर्घ्यरत्नानि गृहादिकं च ॥ ८ ॥
सर्वं ह्येतन्नश्वरं चैव मेने ममाधीनं हरिणा वै कृतं च ।
येनैव दत्तं पुत्रमित्रादिकं च तेनाहृतं वेदनां नैव चक्रे ॥ ९ ॥

अद्यैव विष्णुः परमो दयालुः दयां कृतवांस्तेन सुष्ठु ।
पित्रा साकं कन्यका सा तु वीन्द्र सदात्मनि ह्यमले वासुदेवे ॥ १० ॥

एकान्तत्वं सुष्ठु भक्त्या गता सा यदृच्छया सोपपन्नेन देवी ।
अकल्पयत्स्वात्मनो वीन्द्रवृत्तिं मर्हीं चचार बधिरान्धा यथैव ॥ ११ ॥

सा वै वित्तं विष्णुपादारविन्दे दुःखार्णवोत्तारके संचकार ।
वागिन्द्रियं खग सम्यक् चकार हरेर्गुणानां वर्णने सा सदैव ॥ १२ ॥

हस्तौ च विष्णोर्गृहमार्जनादौ चकार देवी गात्रमलापहारम् ।
श्रोत्रं च चक्रे हरिसत्कथोदये मोक्षादिमार्गे ह्यमृतोपमे च ॥ १३ ॥

नेत्रं च चक्रे प्रतिमादिदर्शने ह्यनादिकालीनमलापहारणे ।
सद्वैष्णवानां स्पर्शने चैव संगे निर्माल्यगन्धानुविलेपने त्वक् ॥ १४ ॥

घ्राणेन्द्रियं सा हरिपादसौरभे चकार संसारविमुक्तिदे च ।
जिह्वेन्द्रियं हरिनैवेद्यशेषे श्रीमत्तुलस्यादिविमिश्रिते च ॥ १५ ॥

पादौ हरेः क्षेत्रपथानुसर्पणे शिरो हृषीकेशपदाभिवन्दने ।
कामं तु दास्ये नतु काम्यकामया तथोत्तमश्लोकजनाश्रयां रतिम ॥ १६ ॥

निष्कामरूपे च मतिं चकार वागिन्द्रियं संस्तवने चकार ।
एवं सदा कर्मसमूहमात्मनः समर्पयित्वा परमेशपादयोः ॥ १७ ॥

तीर्थाटनार्थन्तु जगाम पित्रा साकं हरेः प्रीणनाद्यर्थमेव ।
आराध्य विष्णुं ब्राह्मणान्विष्णुभक्तानादौ गृहे वस्त्रसंभूषणाद्यैः ॥ १८ ॥

पश्चात्संकल्पं कारयामास देवी विष्णोरग्रे तीर्थयात्रार्थमेव ।
यावत्कालं तीर्थयात्रा मुकुन्दं तावत्कालं तूर्ध्वरेता भवामि ॥ १९ ॥

यावत्कालं तीर्थयात्रां करिष्ये तावद्देहि वैष्णवानां च सङ्गम् ।
हरेः कथाश्रवणं स्यान्मुकुन्द नावैष्णवानां सङ्गिनामङ्गसङ्गम् ॥ २० ॥

सुहृज्जनैः पुत्रमित्रादिकैश्च तीर्थाटनं नैव कुर्यां मुकुन्द
कुर्वन्ति ये काम्यया तीर्थयात्रां तेषां सङ्गं कुरु दूरे मुकुन्द ॥ २१ ॥

शालिग्रामं ये विहायैव यात्रां कुर्वन्ति तेषां किं फलं प्राहुरार्याः ।
यदा तीर्थानां दर्शनं स्यात्तदैव शालग्रामं पुरतः स्थापयित्वा ॥ २२ ॥

तीर्थाधिपं प्रणमेद्विष्णुमूर्तिं तथा प्रतीकं विष्णुदेवस्य नान्यत् ।
तीर्थाटनं पादचारैः कृतं चेत् पूर्णं फलं प्राहुरार्याः खगेन्द्र ॥ २३ ॥

पादत्राणं पादरक्षां च कृत्वा तीर्थाटनं पादहीनं तदाहुः ।
यो वाहने तुरगे चोपविष्टस्तीर्थाटनं कुरुते चार्धहीनम् ॥ २४ ॥

वृषादीनां वाहने पादमाहुः परान्नानां भोजने व्यर्थमाहुः ।
महात्मनां वेदविदां यतीनां परान्नानां भोजने नैव दोषः ॥ २५ ॥

सङ्कल्पयित्वा परमादरेण जगाम सा तीर्थयात्रार्थमेव ।
आदौ स्नात्वा हरिनिर्माल्यगन्धं विसर्जयित्वा श्रवणं संचकार ॥ २६ ॥

पित्रा साकं भोजनं चापि कृत्वा ह्यग्रे दिने क्रोशमेकं जगाम ।
तत्र द्विजान् पूजयित्वान्नपानै रात्रौ तत्त्वं श्रावयामास देवी ॥ २७ ॥

एवं यात्रां ये प्रकुर्वन्ति नित्यं तेषां यात्रां सफलां प्राहुरार्याः ।
विना कथां तीर्थयात्रां खगेन्द्र यात्राफलं व्यर्थमाहुर्महान्तः ॥ २८ ॥

दिवारात्रौ ये न श्रुण्वन्ति दिव्यां हरेः कथां तीर्थमार्गे खगेन्द्र ।
व्यर्थं व्यर्थं तस्य चायुर्गतं वै अश्वादिवद्गमनं विद्धि तस्य ॥ २९ ॥

गङ्गादीनां दर्शनात्पापनाशः ह्यश्वादीनां अपराधं वदस्व ॥
क्षेत्रस्थविष्णोर्दर्शनात् पापनाशः क्षेत्रस्थानामपराधं क्षमस्व ॥ ३० ॥

क्षेत्रस्थविष्णोः पूजनात्पापनाशः पूजावतां अपराधं वदस्व ।
जपादीनां कुर्वतां पापनाशो विष्णोर्ध्यानात् सद्य एवाघनाशः ॥ ३१ ॥

अनुसन्धानाद्रहितं सर्वमेव कृतं कर्म व्यर्थमेवेति चाहुः ।
अतो हरेः पापविनाशिनीं कथां श्रुत्वा विष्णोर्भक्तिमान्स्यात्खगेन्द्र ॥ ३२ ॥

दृष्ट्वा दृष्ट्वा हरिपादाङ्कितं च स्मृत्वा स्मृत्वा भक्तिमान्स्यात्खगेन्द्र ।
पित्रा साकं कन्यका सापि वीन्द्र शेषाचलस्थं श्रीनिवासं च द्रष्टुम् ॥ ३३ ॥

जगाम सा मार्गमध्ये हरिं च सन्तर्पयामास रमापतिं च ।
कदा द्रक्ष्ये श्रीनिवासस्य वक्षः श्रीवत्सरत्नैर्भूषितं विस्तृतं च ॥ ३४ ॥

कदा द्रक्ष्ये श्रीनिवासस्य कुक्षिं वलित्रयेणाङ्कितं सुन्दरं च ।
कदा द्रक्ष्ये श्रीनिवासस्य कण्ठं महर्लोकस्याश्रयं सर्वदैव ॥ ३५ ॥

कदा द्रक्ष्ये श्रीनिवासस्य नाभिं सदान्तरिक्षस्याश्रयं वै सुपूर्णम् ।
कदा द्रक्ष्ये वदनं वै मुरारेर्जनोलोकस्याश्रयं सर्वदैव ॥ ३६ ॥

शिरः कदा श्रीनिवासस्य द्रक्ष्ये सत्यस्य लोकास्याश्रयं सर्वदैव ।
कटिं कदा श्रीनिवासस्य द्रक्ष्ये भूमेर्लोकस्याश्रयं सर्वदैव ॥ ३७ ॥

कदा द्रक्ष्ये श्रीनिवासस्य चोरू तलातलस्याश्रयं सर्वदैव ।
कदा द्रक्ष्ये श्रीनिवासस्य जानु सुकोमलं सुतलस्याश्रयं च ॥ ३८ ॥

कदा द्रक्ष्ये श्रीनिवासस्य जंघे रसातलस्याश्रयं सर्वदैव ।
कदा द्रक्ष्ये पादतलं हरेश्च पाताललोकस्याश्रयं सर्वदैव ॥ ३९ ॥

इत्थं मार्गे चिन्तयन्ती च देवी शेषाचले शेषदेवं ददर्श ।
फणैः सहस्रैः सुविराजमानं नानाद्रुमैर्वानरैर्वानरीभिः ॥ ४० ॥

अनन्तजन्मार्जितपुण्यसंचयान्मयाद्य दृष्टः परमाचलो हि ।
तद्दर्शनात्बाष्पकलाकुलेक्षणा सद्यः समुत्थाय ननाम मूर्ध्ना ॥ ४१ ॥

मुखं च दृष्ट्वा नमनं च कार्यं पृष्ठादिभागे नमनं न कार्यम् ।
साऽपि द्विषट्कं नमनं च चक्रे शालग्रामं स्थापयित्वा पुरोऽस्य ॥ ४२ ॥

इत्थं कार्यं वैष्णवैः पर्वतस्य ह्यवैष्णवैर्विपरीतं च कार्यम् ।
मध्वान्तस्थः पर्वताग्रेऽस्ति नित्यं रमाब्रह्माद्यैः पूजितः श्रीनिवासः ॥ ४३ ॥

सुसत्तमं परमं श्रीनिवासं द्रक्ष्येऽथाहं ह्यारुरुक्षेऽचलं च ।
इत्येवमुक्त्वा कपिलाख्यतीर्थे स्नानं चक्रे सा स्वपित्रा सहैव ॥ ४४ ॥

अत्रैवास्ते श्रीनिवासो हरिस्तु द्रवेण रूपेण न चान्यथेति ।
आदौ स्नात्वा मुण्डनं तत्र कृत्वा तीर्थश्राद्धं कार्यमस्मिन् सुतीर्थे ॥ ४५ ॥

गोभूहिरण्यादिसमस्तदानं दत्वा शैलं चारुरोहाथ साध्वी ।
शालग्रामं स्थापयित्वाऽस्य चाद्रेः पुनः प्रणामं साऽपि चक्रे सुभक्त्या ॥ ४६ ॥

सोपानानां शतपर्यन्तमेवमारुह्य सा ह्युपविष्टा तु तत्र ।
शुश्राव सा भागवतं पुराणं शुश्राव वै वेंकटाद्रेः प्रशंसाम् ॥ ४७ ॥

जैगीषव्याद्रुद्ररूपात्सकाशात् शुश्राव तत्त्वं वेंकटाद्रेश्च सर्वम् ॥ ४८ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे वेंकटगिरियात्राक्रमनिरूपणं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

॥ चतुर्विंशोऽध्यायः ॥

जैगीषव्य उवाच

कन्ये श्रुणु त्वं वेंकटाख्याचलस्य सोपानानां पुण्यमारोहणस्य ।
श्रीगीतायाः पठनं चैव कुर्वन्नारोहणं कुरुते सर्वलोकः ॥ १ ॥
पदे पदे श्रीनिवासश्च देवस्त्वलं ह्यलं प्रीयते भक्तवर्गः ।
तं प्रीणयन्मोक्षमायान्ति सर्वे हरौ तुष्टे किमलभ्यं च कन्ये ॥ २ ॥
सोपानदेशे यः पुराणं श्रुणोति तदा कृता सर्वतीर्थादियात्रा ।
तदा देवाः प्रस्तुवन्तीह मार्गे सदा हरिं श्रीनिवासं गुरुं च ॥ ३ ॥
सोपानानां महिमानं च श्रुत्वा शालग्रामं स्थापयित्वा च तत्र ।
नमस्कृत्वा पुनरेवापि सा तु सोपानानि त्वारुरोहाथ साध्वी ॥ ४ ॥
सोपानानां वीन्द्र चारोहणेन ह्यवैष्णवानां हरितोषो न चैव ।
तेनैव तेषां साधनं भूय एव तमस्यन्धे पातयितुं खगेन्द्र ॥ ५ ॥
स्थले स्थले चैवमेवाऽपि कार्यं जैगीषव्यं पुनरेवाह देवी ।

कन्योवाच

जैगीषव्यः श्रीनिवासो हरिस्तु ब्रह्मादीनां दृश्यते श्रीनिवासः ॥ ६ ॥
वदस्व मे मानुषाणां यथैव संसारिणां मानुषाणां यथैव ।
यादृक्प्रकाशो दृश्यते श्रीनिवासे वदस्व त्वं कृपया जैगिषव्य ॥ ७ ॥
एवं पृष्टो जैगिषव्यो हरस्तु ह्युवाच कन्यां सोमपुत्रीं सतीं च ।

जैगीषव्य उवाच

ब्रह्मादीनां दृश्यते श्रीनिवासो ह्यनन्तसूर्याधिककान्तिवच्च ॥ ८ ॥
रुद्रादीनां दृश्यते श्रीनिवासः स सूर्यलक्षाधिकान्तिवच्च ।
स विद्युद्वन्मानुषाणां रमेशो ऋष्यादीनां चन्द्रवद्दृश्यते च ॥ ९ ॥

*अपरोक्षीणां मानुषाणां हरिस्तु नक्षत्रवद्दृश्यते वासुदेवः ।
*अपरोक्षीणां ऋषीणां सर्वदेव सूर्यैकवद्दृश्यते वेंकटेशः ॥ १० ॥
संसारिणां वेंकटेशः खगेन्द्र सदेहवद्दृश्यते वै प्रकाशः ।
मिथ्यावतां दृश्यते श्रीनिवासः पाषाणवन्नैल्यरूपप्रकाशः ॥ ११ ॥
शिलामात्रं दृश्यते वै कलौ च नृणां सर्वेषां श्रीनिवासो हरिस्तु ।
कलौ स्वरूपं श्रीनिवासस्य देवि न मानुषाः प्रविजानन्ति सर्वे ॥ १२ ॥
यतः कलौ तामसा राजसाश्च तत्सङ्गिनः सात्त्विकाः केचिदेव ।
अतो भक्ताः दुर्लभा वै कलौ च ये दृश्यन्ते भक्तवत्तेन भक्ताः ॥ १३ ॥
शिश्नोदरे भरणे चैव निष्ठास्तदर्थं वै ते च कुर्वन्ति यात्राम् ।
भक्तिर्ज्ञानं दुर्लभं वै कलौ च [1]भक्त्या हरेर्दर्शनं दुर्लभं च ॥ १४ ॥
भक्तिस्वरूपं तव वक्ष्ये च देवि यो ज्ञानपूर्वः परमस्नेह एव ।
नवद्वेषैर्विधुरो भक्तियुक्तो नव द्वेषाञ्छृणु भद्रे च सम्यक् ॥ १५ ॥
जीवाभिदा हरिणाऽप्राकृतेन स्वतन्त्रेण ह्यस्वतन्त्रस्य नित्यम् ।
ज्ञानानन्दैः परिपूर्णे हरौ च गुणैरपूर्णो हरिरित्येव चिन्ता ॥ १६ ॥
श्रीब्रह्मरुद्रादिदिवौकसां सदा तथा द्विजानां साम्यरूपस्य चिन्ता ।
विष्णोः सकाशाद् ब्रह्मरुद्रादिकानां सदाऽधिक्यालोचनं द्वेष एव ॥ १७ ॥
विष्णोर्देहे हस्तपादादिकानां भेदज्ञानं द्वेषमाहुर्महान्तः ।
अवताराणां छेदभेदादिकं च तथोत्पत्तिर्मरणस्यापि चिन्ता ॥ १८ ॥
तद्भक्तानां द्वेषणं चाहुरार्यास्तद्वाक्यानां दूषणं द्वेष एव ।
नवद्वेषैः संयुता एव लोके कन्ये दृश्यन्ते न तु भक्ताः कदाचित् ॥ १९ ॥

कन्योवाच

जैगीषव्य ब्रूहि मे के च भक्ता भक्तिं कथं दर्शयामासुरेते ।
तेषां हरिः श्रीनिवासो महात्मा त्राता सदा भक्तवर्गे दयालुः ॥ २० ॥

** अपरोक्षीणामिति छान्दसं रूपम् । १. तेषाम् ।

जैगीषव्यस्त्वेवमुक्तो महात्मा ह्युवाच कन्यां संस्मरन् भक्तवर्यः ।

जैगीषव्य उवाच

प्रह्लादाद्या श्रीनिवासस्य भक्ताः कृत्वा नृसिंहे चोत्तमां भक्तिमेव ॥ २१ ॥
अवाप साम्राज्यमनुत्तमं च ज्ञानं नृसिंहात्समवाप पश्चात् ।
पराशरः श्रीनिवासस्य भक्तो भक्तिं कृत्वा व्यासरूपं हरिं च ॥ २२ ॥
स्तुत्वा तेन ज्ञानतत्त्वं ह्यवाप्य जगाम मोक्षं भक्तिसंवर्धितात्मा ।
यो नारदः श्रीनिवासस्य भक्तो भक्तिं कृत्वा गर्भवासे हरौ च ॥ २३ ॥
तया भक्त्या ब्रह्मपुत्रत्वमाप ज्ञानप्राप्त्या तेन मुक्तिं जगाम ।
यो ह्यंबरीषः श्रीनिवासस्य भक्तः कृत्वा भक्तिं परदेवे हरौ च ॥ २४ ॥
जप्त्वा ज्ञानं प्राप्य दुर्वासकश्चाप्यवाप मोक्षं तेन संवर्धितात्मा ।
मुचुकुन्दो वै श्रीनिवासस्य भक्तो वैराग्यतो भक्तिदार्ढ्यं च कृत्वा ॥ २५ ॥
तत्त्वज्ञानं प्राप्य विष्णोर्महात्मा ह्यवाप मोक्षं तेन संवर्धितात्मा ।
स पुण्डरीकः श्रीनिवासस्य भक्तः पित्रादिष्टो विष्णुभक्तिं च कृत्वा ॥ २६ ॥
हरिप्रसादाज्ज्ञानमनुत्तमं चाप्यवाप मोक्षं भक्तिसंवर्धितात्मा ।
ब्रह्मा च वायुश्च सरस्वती च ज्ञातव्याः सर्वे ऋजुयोगिनश्च ॥ २७ ॥
अच्छिन्नभक्ताश्च सदा मुरारेर्न काम्यभक्ताः शुद्धरूपा हि ते च ।
गिरीशनागेशखगेशदेवास्तथा कामो गुरुचन्द्रेन्दुसूर्याः ॥ २८ ॥
जलेशोऽग्निर्मनुधर्मौ कुबेरः विघ्नेशनासत्यमरुद्गणाश्च ।
पर्जन्यमित्रादय एव सर्वे सदा ह्येते श्रीनिवासस्य भक्ताः ॥ २९ ॥
विश्वामित्रो भृगुरौर्वश्च कुत्सो मरीचिरत्रिः पुलहः क्रतुश्च ।
शक्तिर्वसिष्ठो गौतमो वै पुलस्त्यो भारद्वाजः श्रीनिवासस्य भक्ताः ॥ ३० ॥
मान्धाता नहुषोऽम्बरीषसगरौ राजा पृथुर्हैहयो
इक्ष्वाकुर्भरतो ययातिसुनलौ धर्मो विकुक्षिस्तथा ।

उत्तानश्च विभीषणो दशरथो ह्येते महाज्ञानिनः
श्रीमद्वेंकटनायकस्य च गुरोर्भक्ताः सदा संस्मृताः ॥ ३१ ॥

भागीरथी समुद्रश्च यमुना च सरस्वती ।
गोदावरी नर्मदा च कृष्णा भीमरथी तथा ॥ ३२ ॥

सरयूफल्गुकावेरी गण्डकीकपिला तथा ।
इत्येताश्च हरेर्भक्ताः सन्ति चात्रैव भामिनि ॥ ३३ ॥

अभिप्रायं त्वत्र वक्ष्ये श्रुणु कन्ये महासति ।
यत्र प्रवर्तते मार्गे कथा विष्णोर्महात्मनः ॥ ३४ ॥

वर्तन्ते वैष्णवा यत्र हरितत्त्वार्थबोधकाः ।
तत्रैव भक्ताः सर्वेऽपि सन्ति विष्णोस्तथैव च ॥ ३५ ॥

ये देवयात्रां परमात्मवार्तया कुर्वन्ति ते हरिभक्ताशच नान्ये ।
यतौ हरौ परमे वैष्णवानां सर्वं निष्ठामेति कृत्यं खगेन्द्र ॥ ३६ ॥

शेषाचलं समारभ्य ह्यन्नवस्त्रादिभूषणं ।
यो न दद्यादभक्तः स ततः को नु परः पशुः ॥ ३७ ॥

भक्ता हरेः श्रीनिवासाचले च [१]गङ्गादिरूपेण च तत्र तत्र ।
तिष्ठन्ति सेवार्थमुरुक्रमस्य तेषां पूजा नैव कार्या च देवि ॥ ३८ ॥

अभिप्रायं तत्र वक्ष्ये श्रुणु त्वं तत्र स्थले वस्त्रगन्धादिधूपैः ।
पुराणोक्ता अपि [२]भेदेन पूज्या दृष्ट्वा च तान्वन्दयेत्प्राज्ञ एव ॥ ३९ ॥

सद्ब्राह्मणान्वन्दयेत्पादमूले हस्तौ च द्वौ सम्पुटीकृत्य देवि ।
साष्टाङ्गरूपं वन्दनं चैव विष्णोः कुर्यात्तथा गुरवे विष्णुबुध्द्या ॥ ४० ॥

गङ्गादीनां वन्दनं कार्यमेव साष्टाङ्गं वै तुलसीनां तथैव ।
अश्वत्थानां नमनं कार्यमेव गवादीनां नमनं मानसेन ॥ ४१ ॥

---

१. लिङ्गादिरूपेण । २. भद्रे न ।

पूजा सदा देवदेवस्य विष्णोः कार्या भक्त्या वैष्णवैरेव नान्यैः ।
ये नामकाः विष्ण्वभक्ताः सदैव पूजां विष्णोर्नैव कुर्याच्च देवि ॥ ४२ ॥

मोहाद्यो वै पूजयेद्देवदेवं महाऽधर्माद्याति चान्धं तमो वै ।
ब्रह्मादिनामानि हरेर्हि देवि विष्णुः स्वनामानि ददौ दिवौकसाम् ॥ ४३ ॥

नादाद्धरिः केशवादीनि कन्ये स्वकं पुरं प्रविहायैव राजा ।
एवं मयोक्तं कन्यके सर्वमेतदेतत्परं सम्यगारोहणीयम् ॥ ४४ ॥

गोविन्द नारायण माधवेति मया युष्माभिराराधनीयम् ।
सर्वे मिलित्वा पुनरेवं खगेन्द्र समारुहन्वेङ्कटाद्रिं गृणन्तः ॥ ४५ ॥

हरेर्नामान्यत्र पूर्वं गृणन्तस्त्वासादयन्तः श्रीनिवासस्य नाम ।
द्रष्टुं सर्वे श्रीनिवासं तथैव कुर्वन्तस्ते तलशब्दं नदन्तः ॥ ४६ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे कन्याजैगिषव्यसंवादे जैगिषव्येन श्रीनिवासगुणानुवर्णनं नाम चतुर्विंशोऽध्यायः समाप्तः ॥ २४ ॥

॥ पंचविंशोऽध्यायः ॥

इति कृष्णवचः श्रुत्वा तार्क्ष्यः कृष्णमुवाच ह ।
कथं आस्वादनं चक्रुरेतद्विस्तार्य मे वद ॥ १ ॥

श्रीकृष्ण उवाच

भोः श्रीनिवास तव नामैव चैतन्नामस्वामिन् नतु नामैव नामि ।
यां ब्रह्माद्या आश्रयन्तीति यस्मात्तस्माद्रमा श्रीरिति नाम चाप ॥ २ ॥

रमाश्रयत्वान्नितरां सर्वदा चेत्यतो हरिः श्रीनिवासाभिधानः ।
भो श्रीनिवासेति तु नर्तयन्तो रोमांचमात्रास्तलशब्दकारिणः ॥ ३ ॥

अद्यैव द्रक्ष्ये तव वक्त्रं मुकुन्द ह्यद्यैवाहं कृतकृत्यो भवानि ।
भोः केशवाद्यैव पदारविन्दं सन्दर्शयित्वा सुदयां कुरुष्व ॥ ४ ॥

ब्रह्माणमाहुश्च पुराणमाहुः कशब्दवाच्यं सर्वलोकेशमाहुः ।
ईशं चाहू रुद्रमित्येव चाहुस्तत्प्रेरकं सृष्टिसंहारकार्ये ॥ ५ ॥

अतो हरिः केशवनामधेयो भोः केशवेति च नर्तयन्तः ।
आनन्दबाष्पैः संस्तुवन्तोऽनुजग्मुर्नारायणेति वदन्त एव ॥ ६ ॥

अरा दोषास्तद्विरुद्धा गुणाश्च नाराश्च तेषामाश्रयत्वान्मुरारिः ।
नारायणेति वदन्ति लोके नरानुबन्धात्सर्वमुक्ताः खगेन्द्र ॥ ७ ॥

नाराः प्रोक्ता आश्रयत्वाच्च तेषामतोऽपि नारायण एव वीन्द्र ।
मुक्ताश्रयेति ननृतुश्च सर्वे नरेण चाण्डादिकमेव सर्वम् ॥ ८ ॥

यदुत्पन्नं तेन नारं खगेन्द्र सदा तस्याप्याश्रयत्वाच्च वीन्द्र ।
नारायणेति प्रवदन्ति लोके ह्यनन्तब्रह्माण्डविसर्जकत्वात् ॥ ९ ॥

गोविन्द देहि तव दर्शनं च वेदाश्च सर्वेऽपि गोशब्दवाच्याः ।
गोभिश्च सर्वैः प्रतिपाद्यतो यतो ह्यतश्च गोविन्द इति स्मृतः सदा ॥ १० ॥

भो वेदवेद्येति ननृतुश्च सर्वे ह्यानन्दबाष्पैश्च समन्विताश्च ।
देहि प्रभो वै तव दासदासाश्चतुर्दशे भुवने सर्वदाऽपि ॥ ११ ॥

यतस्त्वेवं वसतीति वासुश्चात्रैव नित्यं क्रीडते सर्वदैव ।
यतो देवे त्येवमाहुर्महान्तस्त्वतो हरिं वासुदेवेति चाहुः ॥ १२ ॥

भो वासुदेवेति ननृतुः सदैव भो माधवेति ननृतुश्च सर्वे ।
लक्ष्मीपते चेति वदन्ति सर्वे धनीति शब्दः स्वामिवाची यतो हि ॥ १३ ॥

भो माधवेति प्रननृतुश्च सर्वे लक्ष्मीस्तु मेति प्रवदन्ति लोके ।
धवः शब्दः स्वामिवाची यतो हि लक्ष्म्या धवं माधवं चाहुरार्याः ॥ १४ ॥

अतः प्राज्ञा माधवेति ब्रुवन्ति लक्ष्मीपते पाहि सदैव भक्तान् ।
ते वै ब्रुवन्तो ननृतुश्च जग्मुर्विष्णो सदाऽस्मान् परिपाहि नित्यम् ॥ १५ ॥

सर्वत्र यस्माद्विततोऽसि तस्मादित्यादिनामानि गृणन्त एव ।
जग्मुश्च सर्वे ददृशुश्च तीर्थं भक्त्योपेताः श्रीनिवासं स्मरन्तः ॥ १६ ॥

कन्योवाच

किं नामकं तीर्थमिदं मुनीन्द्र किं कार्यमत्र प्रवदास्मान् कृतीश ।
कस्मै प्रसन्नो भगवान् श्रीनिवासो ह्यस्मिंस्तीर्थे वद विस्तरेण ॥ १७ ॥

जैगीषव्य उवाच

कन्ये श्रुणु त्वं ह्यभवत्सुबुद्धिमान् प्रह्लादसंज्ञो हरिभक्तवर्यः ।
निष्कामबुध्या तु यदा जगाम शेषाचलस्थं श्रीनिवासं च द्रष्टुम् ॥ १८ ॥

अस्मिंस्थले दैत्यकुमारकान् प्रति हरेश्च तत्त्वं ह्युपदिष्टवान्प्रभुः ।
नृसिंहरूपं श्रीनिवासं भजध्वं सुदुर्लभं मानुषं जन्म चैव ॥ १९ ॥

तत्रापि विष्णोर्नृहरेश्च तत्त्वं सुदुर्लभं सुष्ठु यात्रा तथैव ।
यस्यां यात्रायां यत्र कुत्रापि देशे हरेः कथा वर्तते दैत्यवर्याः ॥ २० ॥

तत्र स्थले हरिरास्ते सदैव यतो व्याप्तः सर्वतो वै नृसिंहः ।
एतच्छ्रुत्वा दैत्यकुमारकास्ते प्रह्लादमूचुर्भक्तवर्यं हरेश्च ॥ २१ ॥

व्याप्तो हरिश्चेत्कथमत्र वै सखे न दृश्यते जलरूपी नृसिंहः ।
स चैवमुक्तो दानवानां सुतैश्च तुष्टाव विष्णुं परमादरेण ॥ २२ ॥

तव स्वरूपं दर्शय मेऽत्र विष्णो स्वयोग्यरूपं दैत्यकुमारकाणाम् ।
इति स्तुतः श्रीनिवासो हरिस्तु तस्मिंन्नन्तर्जलरूपी समायात् ॥ २३ ॥

अस्मिन् स्नानं ये प्रकुर्वन्ति तीर्थे तेषां ज्ञानं परमं दृढं स्यात् ।
अत्र स्नाने मानुषाणां च तात बुद्धिर्न हि स्यात्कलिकाले विशेषात् ॥ २४ ॥

दत्वा वरं दैत्यवराय विष्णुरन्तर्दधे जलपूर्णे सुकुण्डे ।
अद्याप्यास्ते जलमध्ये नृसिंहः प्रह्लादोऽपि दैत्यकुमारकैः सह ॥ २५ ॥

तस्मिंस्तीर्थे परितस्तत्र तत्र जयेति शब्दः श्रूयते चापराह्ने ।
इदं तीर्थं नारसिंहाभिधं च कन्ये स्नानं ह्यत्र कार्यं मनुष्यैः ॥ २६ ॥

स्नानं चक्रुस्तत्र तीर्थे च सम्यग् दीपं दत्वा द्विजवर्याय मुख्यम् ।
द्रष्टुं पुनः श्रीनिवासं प्रजग्मुर्गोविन्द गोविन्द इति ब्रुवन्तः ॥ २७ ॥

मुख्यप्राणाधिष्ठितं स्थानमाप्य ह्युपाविशत्तत्र देवी ह्युवाच ।
जैगीषव्यः प्राह संहृष्टचित्तो ब्रवीमि श्रुत्वा कुरु सर्वं समग्रम् ।
आद्यद्वारं श्रीनिवासस्य दृष्ट्वा संप्रार्थयेद्देवदेवं रमेशम् ॥ २८ ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ॥ २९ ॥

मानसान् वाचिकान् दोषान् कायिकानपि सर्वशः ।
वैष्णवद्वेषहेतून्मे भस्मसात्कुरु माधव ॥ ३० ॥

आद्यद्वारे श्रीनिवासस्य देवि सम्यक् स्मरेद्द्विजयं वै जयं च ।
दक्षद्वारे श्रीनिवासस्य देवि चण्डं प्रचण्डं संस्मरेत्सम्यगेव ॥ ३१ ॥

पाश्चात्यभागे श्रीनिवासस्य देवि नन्दं सुनन्दं संस्मरेद्देवभक्त्या ।
सव्यद्वारे श्रीनिवासस्य कन्ये स्मरेत्कुमुदं कुमुदाक्षं तथैव ॥ ३२ ॥

पश्चादग्रे प्रविशेद्भक्तिपूर्वं कदा द्रक्ष्ये सादरेणैव देवम् ।
प्रदक्षिणद्वादशकं च कृत्वा पदे पदे संस्मरेत् श्रीनिवासम् ॥ ३३ ॥

श्रीस्वामितीर्थे सम्यगाचम्य नत्वा स्नात्वा नत्वा भूवराहं च देवि ।
आद्यद्वारं प्रविशेद्भक्तिपूर्वं गोविन्द गोविन्द इति ब्रुवन्वै ॥ ३४ ॥

पश्चाद्धरेर्नमनं कार्यमेव साष्टाङ्गरूपं प्रविशेद्देवगेहम् ।
पुनर्विशन् दूरदेशे स्थितः सन् पीठस्थदेवान् मनसा हि चिन्तयेत् ॥ ३५ ॥

मध्ये पीठं श्रीनिवासं च देवी नारायणं प्रणमेत् पूर्वमेव ।
देवस्य सव्ये पीठभागाद्बहिश्च नमस्कार्यं गुरवे वायवे वै ॥ ३६ ॥

पीठाद्बहिर्दक्षिणे ब्रह्मविष्णुरुद्रादिभ्यः सर्वदेवेभ्य एव ।
पीठस्याग्राच्चाप्यधस्ताप्रदेशे ह्याग्नेयकोणे प्रणमेद्वाहनाय ॥ ३७ ॥

नैर्ऋत्यभागे वासुदेवाय सुभ्रु नमस्कुर्याद्वैष्णवैः सर्वदाऽपि ।
वायव्यकोणे भक्तिपूर्वं सुदुर्गां नमस्कुर्याद्भक्तिसंवर्धितात्मा ॥ ३८ ॥

पीठस्योर्ध्वं ह्यग्निकोणे च देवि धर्माधिभूताय नमो यमाय ।
पीठस्योर्ध्वं नैर्ऋते कोणदेशे ज्ञानाधिपं प्रणमेद्वायुदेवम् ॥ ३९ ॥

पीठस्योर्ध्वं वायुकोणे च सुभ्रु वैराग्याणामधिपं चैव रुद्रम् ।
पीठस्योर्ध्वं त्वीशकाले च देवि ऐश्वर्याणामधिपं चेन्द्रदेवम् ॥ ४० ॥

पीठस्य पूर्वे प्रणमेन्निर्ऋतिं च ह्यधर्माणामधिपं चैव सुभ्रु ।
देवस्य पीठस्य च दक्षिणे च दुर्गां नमेदुग्ररूपाभिधां च ॥ ४१ ॥

पीठस्य कन्ये प्रणमेत्पश्चिमे चावैराग्याणामधिपं कामदेवम् ।
देवस्य पीठस्योत्तरे रुद्रदेवमनैश्वर्याणामधिपं संस्मरेच्च ॥ ४२ ॥

पीठस्य मध्ये प्रणमेद्धै वराहं सदा कन्ये परमं पूरुषाख्यम् ।
तस्योपरिष्टाच्छक्तिसंज्ञां च लक्ष्मीमाधाररूपां प्रणमेच्चैव नित्यम् ॥ ४३ ॥

तस्योपरिष्ठाद्वायुकूर्मं नमेच्च तस्योपरिष्टात् शेषकूर्मं नमेच्च ।
तस्योपरिष्टादभिमानिनीं भुवो भूदेवतां प्रणमेच्चैव सुभ्रूः ॥ ४४ ॥

तस्योपरिष्टाद्वरुणं संस्मरेच्च श्रीरोदधेरधिपं चैव देवम् ।
तस्योपरिष्टात्प्रणमेच्च लक्ष्मीं श्वेतद्वीपाख्यां कन्यके पूजयेच्च ॥ ४५ ॥

तस्योपरिष्टात्प्रणमेच्च लक्ष्मीं महादिव्यां मण्टपसंज्ञकां च ।
पीठस्य मध्ये पद्मसंज्ञां च लक्ष्मीं सम्यङ् नमेत्पद्ममध्ये च देवीम् ॥ ४६ ॥

पद्मस्थदेवस्य च दक्षिणे च सूर्यं नमेद्दीपरूपं च भद्रे ।
पद्मस्थदेवस्य च वामभागे श्रियं नमेद्दीपरपां च देवीम् ॥ ४७ ॥

पद्मस्थदेवस्य तु चाग्रभागे हुताशनं दीपरूपं नमेच्च ।
देवस्याग्रे भूमिनाम्नीं नमेच्च सत्त्वाभिमानां संस्मरेच्चैव नित्यम् ॥ ४८ ॥

पर्यङ्करूपां श्रीनिवासस्य विष्णोस्तमोभिमानां सन्नमेच्चैव दुर्गाम् ।
पूर्वादिदिक्पीठसोपानरूपमात्मानमेकं प्रणमेच्च देवम् ॥ ४९ ॥

दक्षस्थदिक्पीठसोपानरूपमन्तरात्मानरूपं च देवम् ।
पश्चाच्च दिक्पीठसोपानरूपं परात्मानं सन्नमेच्चैव देवम् ॥ ५० ॥

सव्यस्थदिक्पीठसोपानरूपं ज्ञानात्मानं प्रणमेच्चैव देवि ।
पद्मस्य पूर्वस्थदले च देवीं स्त्रीरूपभूतां विमलाख्यां रमां च ॥ ५१ ॥

ब्रह्मादिदेवान् प्रणमेच्चैव नित्यं ह्याग्नेयकोणस्थदले श्रुणु त्वम् ।
उत्कर्षनाम्नीं परमां च देवीं नमेद्रमां ब्रह्मवायू च शेषम् ॥ ५२ ॥

दक्षस्थपद्मस्य दलाष्टके च नारायणश्रीकेरशेषादिकानाम् ।
स्त्रीरूपेभ्यो नमनं कार्यमेव सुवायुकोणस्थदलादिकेषु ॥ ५३ ॥

योगाख्यनारायणब्रह्मवायुविपादिकानां शेषरुद्रादिकानां ।
स्त्रीरूपेभ्यो नमनं कार्यमेव हीशानकोणस्थदलेषु चैव ॥ ५४ ॥

प्राह्वयाख्यनारायणब्रह्मवायुविपादिकानां शेषरुद्रादिकानाम् ।
स्त्रीरूपेभ्यो नमनं कार्यमेव तथैव पद्मस्य च मध्यभागे ॥ ५५ ॥

सत्याख्यनारायणब्रह्मवायुविपादिकानां शेषरुद्रादिकानाम् ।
स्त्रीरूपेभ्यो नमनं कार्यमेव सव्यस्थपद्मस्य दलेषु चैव ॥ ५६ ॥

अनुग्रहाख्या विष्णुलक्ष्मीश्च देवी वायोर्वियच्छेषरुद्रादिकानाम् ।
स्त्रीरूपाणां नमनं कार्यमेव सुयोगपीठस्थस्वरूपभूतम् ॥ ५७ ॥

सदा नमेच्छ्रीमदनन्तसंज्ञमेवं नमेच्छ्रीनिवासं च देवम् ।
श्रीनिवासाय वामे तु लक्ष्मीं च प्रणमेद्बुधः ॥ ५८ ॥

श्रीनिवासस्य सव्ये तु धरायै प्रणमेच्छुभे ।
पीठाद्बहिः पूर्वभागे कृद्धोल्कं प्रणमेच्छुभम् ॥ ५९ ॥

महोल्कं दक्षिणे चैव वीरोल्कं पश्चिमे तथा ।
उत्तरे च नमस्कुर्याद् द्यूल्काय च महात्मने ॥ ६० ॥

चतुर्ष्वपि च कोणेषु सहस्रोल्कं नमेत्सुधीः ।
पूर्वे तु वासुदेवाय नमस्कुर्याच्च दक्षिणे ॥ ६१ ॥

संकर्षणाय देवाय प्रद्युम्नाय च पश्चिमे ।
उत्तरे ह्यनिरुद्धाय नमस्कुर्यादतन्द्रितः ॥ ६२ ॥

आग्नेये च नमस्कुर्यादेकदा कन्यके शुभे ।
जयायै च नमस्कुर्यान्नैर्ऋत्ये चापि वायवे ॥ ६३ ॥

कृत्यै चैव नमस्कुर्यात् ईशान्ये शान्तिसंज्ञकाम् ।
केशवाय नमः पूर्वे तथा नारायणाय च ॥ ६४ ॥

माधवाय नमस्कुर्यादाग्नेये कन्यके शुभे ।
गोविन्दाय नमस्कुर्याद्दक्षिणे विष्णवे तथा ॥ ६५ ॥

मधुसूदनाय भो कन्ये नमस्कुर्याच्च नैर्ऋते ।
पश्चिमे त्रिविक्रमायैव वामनाय तथैव च ॥ ६६ ॥

वायव्ये श्रीधरायैव नमस्कुर्याच्च भामिनि ।
उत्तरे तु महाकन्ये हृषीकेशाय वै नमः ॥ ६७ ॥

तथा वै पद्मनाभाय नमस्कुर्यादतन्द्रितः ।
दामोदराय चैशान्ये नमस्कुर्याच्च भामिनि ॥ ६८ ॥

चतुर्थावरणे पूर्वे मत्स्यकूर्माय वै नमः ।
वराहाय नमस्कुर्यादाग्नेये कन्यके शुभे ॥ ६९ ॥

दक्षिणे श्रीनृसिंहाय वामनाय नमो नमः ।
भार्गवाय नमस्कुर्यान्नैर्ऋते शुद्धतेजसे ॥ ७० ॥

पश्चिमे राघवायाथ तथा कृष्णाय वै नमः ।
बुद्धाय च नमस्कुर्यात् वायवे कन्यके शुभे ॥ ७१ ॥

उत्तरे कल्किरूपाय चानन्ताय नमो नमः ।
ईशान्ये विश्वरूपाय नमस्कुर्यादतन्द्रितः ॥ ७२ ॥

पंचमावरणे पूर्वे अनन्ताय नमो नमः ।
दक्षिणे ब्रह्मणे चैव पश्चिमे वायवे ततः ॥ ७३ ॥

उत्तरे चैव चेशान्ये नमस्कुर्यादतन्द्रितः ।
आग्नेये वारुणीं चैव गायत्रीं चैव निर्ऋतौ ॥ ७४ ॥

वायव्ये भारतीं चैव चेशान्ये गिरिजां नमेत् ।
गिरिजावामभागे तु सौपर्णीं चैव संनमेत् ॥ ७५ ॥

प्रागिन्द्राय नमस्कुर्यात्सायुधाय तथैव च ।
सपरिग्रहाय श्रीविष्णोः पार्षदाय च संनमेत् ।। ७६ ।।

आग्नेये चाग्नये तुभ्यं सायुधायेति पूर्ववत् ।
दक्षिणे तु यमायैव नैर्ऋत्यां निर्ऋतिमेव च ।। ७७ ।।

पश्चिमे वरुणायैव वायव्ये वायवे नमः ।
उत्तरे च कुबेराय ईशान्ये च शिवाय च ।। ७८ ।।

ईशानशक्रयोर्मध्ये ब्रह्मणे सायुधाय च ।
निर्ऋत्यप्पतिमध्ये तु शेषाय च नमो नमः ।। ७९ ।।

एवं कृत्वा नमस्कारं प्रणमेच्च पुनः पुनः ।
इत्येतत्सर्वमाख्यातं विधिपूर्वं तु दर्शनम् ।। ८० ।।

इतः परं तु गन्तव्यं दर्शनार्थं रमापतेः ।
एवमुक्ता तु सा देवी तैः सार्धं तु ययौ मुदा ।। ८१ ।।

यदुक्तः श्रीनिवासस्य दर्शनस्य विधिः खग ।
कस्यचिन्नैव वक्तव्यो गोप्यत्वाच्च कदाचन ।। ८२ ।।

समागमो दुर्घट एव वीन्द्र सतां च सत्तत्वविबोधकानां ।
अनेकजन्मार्जितपुण्यसंचयादभूद्गुरोः संगम एव तस्याः ।। ८३ ।।

पयो विकारं च निजं जहाति शेषः स्वरोषं नलिनं च पङ्कम्
मा चंचलं पंकजनाभयोगात् सत्संगयोगादशुभानि न स्युः ।। ८४ ।।

इति श्रीगरूडपुराणे ब्रह्मकाण्डे श्रीवेंकटेशगिर्यारोहणक्रम तद्भक्ततत्पर्वतनामादिनिरूपणं नाम पंचविंशोऽध्यायः ।। २५ ।।

॥ षड्विंशोऽध्यायः ॥

सा द्वारदेशे श्रीनिवासस्य देवी स्वामिपुष्करिर्णी ददृशे तैश्च सार्धम् ।
स्वामिन्हरे श्रीनिवासेति सा तं ब्रह्मादीनां तारकं संप्रदध्यौ ॥ १ ॥

देवैः सार्धं पालनार्थं स विष्णुरस्त्येव नित्यं पुष्करिण्यां जलेषु ।
अतः स्वामिपुष्करिणीति चाहुस्तत्र स्नानं कन्यकाश्चैव चक्रुः ॥ २ ॥

शुचिर्भूत्वा श्रीनिवासं च द्रष्टुं देवालयं विविशुः शुद्धभक्त्या ।
यथोपदिष्टं गुरुणा तत्तथैव चक्रे कन्या पितृसार्धं खगेन्द्र ॥ ३ ॥

तदा हरिर्दर्शयामास तस्यै स्वकं रूपं सुप्रतीके सुपूर्णम् ।
सा कन्यका श्रीनिवासस्य रूपं ददर्श भक्त्या स्वमनोऽभिरामम् ॥ ४ ॥

सुवर्णचित्रं वसनं वसानं सोष्णीकं कंचुकं सन्दधानं ।
मृगोत्थमदगन्धेन सुरभीकृतदिङ्मुखम् ॥ ५ ॥

पुण्डरीकविशालाक्षं कम्बुग्रीवं महाभुजम् ।
हेमयज्ञोपवीताङ्गं साक्षात्कन्दर्पसन्निभम् ॥ ६ ॥

जगन्मोहनसौन्दर्यं कोमलाङ्गं मनोहरम् ।
दृष्ट्वा च कन्या मुमुदे रोमांचितसुगात्रका ॥ ७ ॥

तद्दर्शनाह्लादपरिप्लुताशया प्रेम्णाथ रोमाश्रुकलाकुलेक्षणा ।
ननर्त देवी पुरतस्तस्य विष्णोः सा ध्वस्तदोषा परमादरेण ॥ ८ ॥

आनन्द मां पाहि सुखं च दत्वा मुकुन्द मां पाहि विमुक्तिदानात् ।
मां पाहि नित्यं ह्यरविन्दनेत्र प्रसन्नदृष्ट्या करुणासुधार्द्र ॥ ९ ॥

गोविन्द गोविन्द सुदुःखितां मां ज्ञानादिदानेन हि पाहि नित्यम् ।
जनार्दन त्वं हि सुदुष्टसङ्गान् कामादिरूपान् सततं वर्जयित्वा ॥ १० ॥

हरे च मां पाहि हरे च पाहि दैत्यान् समाहृत्य सुविघ्नरूपान् ।
रमेश मां पाहि चतुर्मुखेश विश्वेश मां पाहि सरस्वतीश ॥ ११ ॥

रुद्रेश मां पाहि निदानमूर्ते वृन्दारकैर्वन्दितपादपद्म ।
एवं तु नत्वा परमादरेण तुष्टाव विष्णुं परमं पुराणम् ।। १२ ।।

लक्ष्म्या सदा ये विदिता गुणाश्च ह्यसंख्याताः सन्ति विष्णौ त्वयीश ।
तेषां सकाशादतिबाहुल्यसंख्या गुणा हरौ तेऽविदिता वै रमायाः ।। १३ ।।

अतो हरे स्तवने क्वास्ति शक्तिस्तथापि यत्नं स्तवने करिष्ये ।
तव प्रसादाच्च रमाप्रसादात् विधिप्रसादाद्भारतीशप्रसादात् ।। १४ ।।

रुद्रप्रसादात् स्तवनं करिष्ये तथापि विष्णोः माऽपहासं कुरुष्व ।
यदि प्रसन्नोऽसि मयि त्वयीश त्वत्पादमूले देहि भक्तिं सदैव ।। १५ ।।

त्वद्दर्शनादेव शुभाशुभांश्च नष्टं मदीयं च शुभं ह्यनिष्टम्
त्वन्मायया नष्टमिदं च लोकं मदेन मत्तं बधिरं चान्धभूतम् ।। १६ ।।

ऐश्वर्ययोगेन च एडमूको जातः सदा दीनगुर्वादिकेषु ।
मा देहि ऐश्वर्यमनुत्तमं त्वत्पादारविन्दस्य विरुद्धभूतम् ।। १७ ।।

त्वं देव मे देहि सतां च सङ्गं तव स्वरूपप्रतिपादकानाम् ।
पुत्रादीनमैहिकं वासुदेव दग्ध्वा च मे देहि पदारविन्दम् ।। १८ ।।

सद्वैष्णवे क्रियमाणं च कोपं दग्ध्वा च मे देहि पदारविन्दम् ।
द्रव्यादिके क्रियमाणं च लोभं दग्ध्वा च मे देहि पदाब्जमूलम् ।। १९ ।।

पुत्रादिके क्रियमाणं च मोहं दग्ध्वा च मे देहि पदारविन्दम् ।
विद्यां पुत्रं द्रव्यजातं मदं च दग्ध्वा च मे देहि पदाब्जजातम् ।। २० ।।

सद्वैष्णवासहमानस्वरूपं दग्ध्वा मात्सर्यं पाहि मां वेङ्कटेश ।
मन्त्रं च मे देहि निदानमूर्ते येनैव मे स्यात्तव सङ्गश्च भूयः ।। २१ ।।

नान्यं वृणे तव पादाब्जसङ्गात्तदेव मे देहि मम प्रसन्नः ।
इतीरितः श्रीनिवासः प्रसन्नो ह्युवाच देवो ह्यमृतस्रवं च ।। २२ ।।

अत्रैव कन्ये प्रजपस्व मन्त्रं सुगोप्यरूपं परमादरेण ।
वक्ष्यामि मन्त्रं परमादरेण श्रुणुव भक्त्या परमादरेण ॥ २३ ॥

अन्तस्थमन्त्यं ह्याद्यसंयुक्तमेव सबिन्दु तद्वत्स्पर्शकाद्येन युक्तम् ।
टकारयुक्तं च समात्रकेण ह्यूष्माद्ययुक्तं प्रथमांतस्थयुक्तम् ॥ २४ ॥

नकारयुक्तं स्पर्शान्त्यस्थयुक्तं आद्यं तमोंकारसमन्वितं च ।
अनेन मन्त्रेण तवेप्सितं च भवेद्धि कन्ये नात्र विचार्यमस्ति ॥ २५ ॥

एवं स चोक्त्वा श्रीनिवासो हरिस्तु प्रतीकवद्दर्शयामास रूपम् ।
नत्वा तु सा श्रीनिवासं च देवी ह्युवास ह स्वामिसरः समीपे ॥ २६ ॥

तस्मिन् दिने ब्राह्मणार्दीश्च सर्वान् सन्तर्पयामास च षड्रसान्नैः ।
सायंकाले श्रीनिवासं च दृष्ट्वा उत्साहरूपे श्रीनिवासप्रतीके ॥ २७ ॥

साकं च भक्त्या प्रचकार देवी प्रदक्षिणं श्रीनिवासस्य सुष्ठु ।
ननर्त देवी सुप्रतीकस्य चाग्रे लज्जां च त्यक्त्वा जय देवेति चोक्त्वा ॥ २८ ॥

आर्तिक्यकाले च हरेश्च वक्त्रं दृष्ट्वा च दृष्ट्वा च ननर्त देवी ।
ममाद्य गात्रं पावितं श्रीनिवास ममाद्य नेत्रं सार्थकं चैव जातम् ॥ २९ ॥

ममाद्य पादौ सार्थकौ चैव जातौ प्रदक्षिणं कुर्वतः श्रीनिवास ।
हस्तौ च मे सार्थकावद्य जातौ अग्रे हरेः कुर्वतो हस्तशब्दम् ॥ ३० ॥

एवं वदन्ती प्रीणयन्ती च देवं जगाम सा वाद्यशब्दैः सहैव ।
देवास्तदा दुन्दुभयो विनेदिरे तन्मस्तके पुष्पवृष्टिं च चक्रुः ॥ ३१ ॥

तस्मिन्काले ह्युभयोः पार्श्वयोश्च नृत्यं चक्रुर्देवतावारनार्यः ।
तथैव तास्तलशब्दं च कृत्वा तदा सर्वा नमनं चापि चक्रुः ॥ ३२ ॥

आनन्दशैले सर्वदा त्वित्थमेव सा सर्वदा नर्तयन्ती च वीन्द्र ।
आनन्दमग्ना सापि देवी जगाम स्वमाश्रमं जैगिषव्येण सार्धम् ॥ ३३ ॥

यात्रामेवं ये न कुर्वन्ति वीन्द्र तेषां यात्रा निष्फला चाहुरार्याः।
गत्वाश्रमं जैगिषव्येण सार्धं गुरुं त्वपृच्छद्वेंकटेशस्य मन्त्रम् ॥ ३४ ॥

मन्त्रस्यार्थं ब्रूहि मे जैगिषव्य मन्त्रावृत्तिं कुर्वतां वै फलाय।

जैगीषव्य उवाच

श्रृणुष्व भद्रे व्यङ्कटेशस्य नाम्नस्त्वर्थं श्रुत्वा हृदये सन्निधत्स्व ॥ ३५ ॥

वीति ह्युत्तमवाची स्याद्येति ज्ञानमुदाहृतम्।
ककारः सुखवाची स्याट्टेति चित्तमुदाहृतम् ॥ ३६ ॥

ईशित्वमात्मवाची स्यादेवं ज्ञेयं तु कन्यके।
पूर्णज्ञानं सुखं चित्त्वं आत्मत्वाद्व्यङ्कटाभिधः ॥ ३७ ॥

व्यामिन्द्रियात्मकं प्रोक्तं व्यङ्गभूतं हरौ यतः।
कटश्च समुदायार्थो व्यंकटश्चेन्द्रिया गणाः ॥ ३८ ॥

स्वस्मिन् प्रेरयते यस्माद् तस्मात् व्यंकटनामकः।
विषयेष्वेव वा नित्यमतो व्यंकटनामकः ॥ ३९ ॥

विशिष्टज्ञानरूपत्वात् व्येति मुक्ताः सदा स्मृताः।
मुक्तानां च समूहस्तु व्यंकटेति प्रकीर्तितः ॥ ४० ॥

सदा मुक्तसमूहानामीशत्वाद् व्यङ्कटाभिधः।
लिङ्गदेहयुतो जीवो व्यङ्कटेति समाहृतः ॥ ४१ ॥

लिङ्गिनां चैव स्वामित्वाद् व्यङ्कटेशेति संज्ञितः।
दैत्यानां च समूहस्तु ज्ञानादिविधुरो यतः ॥ ४२ ॥

अतो दैत्यसमूहस्तु व्यङ्कटेति प्रकीर्तितः।
तेषां संहरणेऽपीशस्त्वतो व्यङ्कटनामकः ॥ ४३ ॥

आनन्दस्य विरुद्धत्वात्कामक्रोधादयो गुणाः ।
व्यङ्कटा इति संप्रोक्तास्तेषां नाशयिता प्रभुः ॥ ४४ ॥

अतस्तु व्यंकटेशाख्य एवं ज्ञात्वा जपं कुरु ।
एवं व्यंकटमाहात्म्यं श्रुत्वा देवी खगेश्वर ॥ ४५ ॥

निद्रां चकार तत्रैव रात्रौ पित्रा सहैव च ।
ब्राह्मे मुहूर्ते चोत्थाय हृदि[1] सस्मार कन्यका ॥ ४६ ॥

श्रीव्यङ्कटेशश्च नृसिंहमूर्तिः श्रीवरदराजश्च नृसिंहमूर्तिः ।
श्रीरङ्गशायी च ह्यनन्तशायी कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ४७ ॥

श्रीकृष्णमूर्तिश्च गदाधरस्तु श्रीविष्णुपादस्तु प्रयागवासः ।
नारायणः श्रीबदरीनिवासः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ४८ ॥

दामोदरो वै त्रिजगन्निवासः श्रीपाण्डुरङ्गश्च नृसिंहदेवः ।
श्रीरामदेवश्च ह्ययोध्यवासः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ४९ ॥

श्रीधर्मपुर्यस्थनृसिंहमूर्तिः श्रोकोप्पलस्थो मुद्गल्लवासः ।
कोल्हानृसिंहः शूर्पकारस्थसिंहः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ५० ॥

चतुर्मुखश्चारुसरस्वती च सुभारती शर्वसुपर्णशेषाः ।
उमा महेन्द्रश्च शचीमुखाद्याः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ५१ ॥

द्वारावती काशिकावन्तिका च प्रयागकांच्यौ मथुरापुरी च ।
मायापुरी हस्तिपुरी निवासिनः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ५२ ॥

भागीरथी चैव सरस्वती च गोदावरी कृष्णवेणी च सिन्धुः ।
कलिंकन्या यमुना च नर्मदा कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ५३ ॥

वितस्तिकावेरिसतुङ्गभद्राः सुवंजरा भीमरथी विपाशा[2] ।
सुताम्रपर्णी च पिनाकिनी च कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ५४ ॥

स्वामिपुष्करिणी चैव सुवर्णमुखरी तथा ।
श्रीपाण्डवी तुम्बुरुस्च कपिला पापनाशिनी ॥ ५५ ॥

गुरुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः ।
रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ५६ ॥

सप्तार्णवाः सप्तकुलाचलाश्च द्वीपाश्च सप्तोपवनानि सप्त ।
भूरादिकानि भुवनानि सप्त कुर्वन्तुं सर्वे मम सुप्रभातम् ॥ ५७ ॥

मान्धाता नहुषोऽबरीषसगरौ राजा नलो धर्मराट्
प्रह्लादः क्रतुराड् विभूषणगयौ व्यासो हनूमानपि
अश्वत्थामकृपावुमा द्रुपदजा श्रीजानकी तारका
मन्दोदर्यखिलाः प्रभातसुमहं कुर्वन्तु नित्यं हरे ॥ ५८ ॥

अश्वत्थस्य वनानि यानि तुलसीधात्रीवनानि प्रभो
पुन्नागस्य वनानि चम्पकवनान्यन्यानि पुष्पाणि च ।
मन्दारस्य वनानि यानि च हरेः सौगन्धिकान्यप्यहो
नित्यं तानि दिशन्तु प्रभातमतुलं श्रीवेंकटेश प्रभो ॥ ५९ ॥

एवं स्मृत्वा श्रीनिवासस्य देवी कृत्वा शौचं जैगिषव्येण साकम् ।
स्नातुं ययौ पुष्करिर्णीं हरेश्च स्नानं सम्यक् तत्र चकार देवी ॥
सम्यग् जस्वा व्यङ्कटेशस्य मन्त्रमुवाच सा जैगिषव्यं गुरुं च ॥ ६० ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे देवीकृतवेङ्कटेशदर्शनतत्स्तुत्यादिवर्णनं नाम षड्विंशोऽध्यायः ॥ २६ ॥

॥ सप्तविंशोऽध्यायः ॥

कन्योवाच

श्रीनिवासः किमर्थं वा आगतोऽत्र वदस्व मे ।
शेषाचलोऽपि कुत्राभूत्कदाऽयातश्च पापहा ॥ १ ॥
स्वामिपुष्करिणी चात्र किमर्थं ह्यागता वद ।

जैगीषव्य उवाच

शृणु भद्रे महाभागे वेंकटेशस्य चागमम् ॥ २ ॥
श्रवणादेव पापानि विलयं यान्ति भामिनि ।
आसीत्पुरा हिरण्याक्षः काश्यपिर्दितिनन्दनः ॥ ३ ॥
सनकादेश्च शापात्तु विजयो द्वारपालकः ।
बभूव दैत्ययोनौ तु देवानां कण्टको बली ॥ ४ ॥
सञ्जीवो विजयः प्रोक्तो हरिभक्तो महाप्रभुः ।
हिरण्याक्षः स्वयं दैत्यो हरितद्भक्तदूषकः ॥ ५ ॥
एतादृशो हिरण्याक्षः तपस्तप्तुं समुद्यतः ।
तदा माता दितिर्देवी हिरण्याक्षमुवाच सा ॥ ६ ॥

दितिरुवाच

वत्स तात महाभाग मा तपस्वाष्टहायन ।
त्वं मा ददस्व दुःखं मां पालयिष्यति को वद ॥ ७ ॥
क्षणमात्रं न जीवामि त्वां विना जीवनं नहि
मा तप त्वं महाभाग मम जीवनहेतवे ॥ ८ ॥
एवमुक्तस्तु मात्रा स विजयावेशतोऽब्रवीत् ।
मातर्मूढे मोहजालं च दग्ध्वा हरिं भज स्नेहजालं कुरुष्व ॥ ९ ॥
मयि स्नेहं पुत्रनिमित्तभूतं सुदुःखदं चेह लोके परत्र ।
यावत्स्नेहं मयि मातः करोषि तावत्क्लेशं शाश्वतं यास्यसि त्वम् ॥ १० ॥

मातश्च ते मयि पुत्रत्वबुद्धिस्त्वय्यप्येषा मातृबुद्धिर्ममापि ।
या कश्यपे पितृबुद्धिर्ममापि तस्मिंस्तु ते भर्तृबुद्धिस्तु मिथ्या ।। ११ ।।
निर्माति यस्माद्धरिरेव सर्वं सम्यक् पाता नियतोऽसौ मुरारिः ।
अतो हि माता हरिरेव सर्वदा त्वन्यासां वै मातृता चोपचारात् ।।१२ ।।
निर्मातृत्वं यदि मुख्यं त्वयि स्यात् द्रोणादीनां जननी का वदस्व ।
मातृत्वं वै यदि मुख्यं त्वयि स्यात् धात्रादीनां जननी का वदस्व ।। १३ ।।
भर्तृत्वं वै यदि मुख्यं त्वयि स्यात् मान्धातृपूर्वान् रक्षिता को वदस्व ।
यतः सदा पाति जगत्ततो हरिः सदा पिता विष्णुरजः पुराणः ।। १४ ।।
न तारकोऽहं नरकाच्च सुभ्रूर्न वै भर्ता नापि मित्रादयश्च ।
न वै माता नानुजादिश्च सर्वः सर्वत्राता विष्णुरतो न चान्यः ।। १५ ।।
यदा पिता मुख्यपिता यदि स्यात् गर्भस्थानां पालकः को वदस्व ।
मातापित्रोः पालकस्त्वं यदि स्यात्कूर्मादीनां पालकः को वदस्व ।। १६ ।।
माया तदीयां ज्ञानशस्त्रेण छित्वा भक्त्या हरेः स्मरणं त्वं कुरुष्व ।
यद्भक्तिपूर्वं स्मरणं नाम विष्णोः तत्सर्वथा पापहरं च मातः ।। १७ ।।
यो वा भक्त्या स्मरणं नाम विष्णोः करोत्यसौ पापहरो भविष्यति ।
अयं देहो दुर्लभः कर्मभूमौ तत्रापि विष्णोः स्मरणं दुर्लभं च ।। १८ ।।
आयुर्गतं व्यर्थमेव त्वदीयं शीघ्रं भज(स्व) श्रीनिवासस्य पादम् ।
उपदिश्यैवं मातरं पुत्रवर्यो दैत्यावेशात्सोऽभवद्वै तपस्वी ।। १९ ।।
चतुर्मुखं प्रीणयित्वा च भक्त्या ह्यवध्यत्वं प्राप तस्मान्महात्मा ।
ततो भूमिं कटवद्वेष्टयित्वा निन्ये तदा दैत्यवर्यो महात्मा ।। २० ।।
श्रीमुष्णदेशे प्रादुरासीद्धरिस्तु वराहात्मा विष्णुरेवाशु सुभ्रु ।
भित्वा चाब्धिं विविशे तं महात्मा रसातले संस्थितं भूतलं च ।। २१ ।।
स्वदंष्ट्राग्रे स्थापयित्वा जगाम तदागमादागतो दैत्यवर्यः ।
तं कर्णमूले ताडयित्वा जघान [1]प्रसादयामास च पूर्ववद्ध्रुवम् ।। २३ ।।

सदिग्गजान् स्थापयित्वा च विष्णुः श्रीमुष्णे वै संस्थितः श्रीवराहः ॥
तदा हरिश्चिन्तयामास विष्णुः भक्ता मदीया मानुषं देहमाप्य ॥ २४ ॥
आराधयिष्यन्ति च मां क्व चैते तेषां दया कुत्र वाऽहं करिष्ये ।
एवं हरिश्चिन्तयित्वा सुकन्ये वैकुण्ठलोकादचलं शेषसंज्ञम् ॥ २५ ॥
वीन्द्रस्कन्धे स्थापयित्वा स्वयं च समागतोऽभूद्भूतलं भूतलेशः
सुवर्णमुखरीतीरमारभ्य गरुडध्वजः ।
कृष्णवेण्याश्च पर्यन्तं स्थापयामास तं गिरिम् ॥ २६ ॥
गिरेः पुच्छे तु श्रीशैलं मध्यमेऽहोबलं स्मृतम् ।
मुखं तु श्रीनिवासस्य क्षेत्रं च समुदाहृतम् ॥ २७ ॥
अल्पेन तपसाभीष्टं सिध्यत्यस्मिन् महाचले ।
गङ्गादिसर्वतीर्थानि पुण्यानि ह्यत्र सन्ति वै ॥ २८ ॥
य एनं सेवते नित्यं श्रद्धाभक्तिसमन्वितः ।
ज्ञानार्थी ज्ञानमाप्नोति द्रव्यार्थी द्रव्यमाप्नुयात् ॥ २९ ॥
पुत्रार्थी पुत्रमाप्नोति नृपो राज्यं च विन्दति ।
यं यं कामयते मर्त्यस्तं तमाप्नोति सर्वदा ॥ ३० ॥
चिन्तितं साध्यते यस्माच्चिन्तामणिमिमं विदुः ।
केचिद् ज्ञानप्रदत्वाच्च ज्ञानाद्रिरिति तं विदुः ॥ ३१ ॥
सर्वतीर्थमयत्वाच्च तीर्थाद्रिरिति तं विदुः ।
पुष्करिण्यास्तु बाहुल्यात् गिरावस्मिन् सरांस्युत ॥ ३२ ॥
पुष्कराद्रिरिति प्राहुरेवं तत्त्वार्थवेदिनः ।
शातकुम्भस्वरूपत्वात्कनकाद्रिं च तं विदुः ॥ ३३ ॥
वैकुण्ठादागतत्वेन वैकुण्ठाद्रिरिति स्मृतः ।
अमृतैश्वर्यसंयुक्तो व्यङ्कटाद्रिरिति स्मृतः ॥ ३४ ॥

वेङ्कटेशस्य शैलस्य माहात्म्यं यावदस्ति हि ।
तावद्वक्तुं समग्रेण न समर्थश्चतुर्मुखः ॥ ३५ ॥
वेङ्कटाद्रौ परां भक्तिं ये कुर्वन्ति दिने दिने ।
पंगुर्जंघाल एव स्यादचक्षुः पद्मलोचनः ॥ ३६ ॥
मूको वाग्मी भवेद्देवि बधिरः श्रावको भवेत् ।
वन्ध्या तु बहुपुत्री च निर्धनः सधनो भवेत् ॥ ३७ ॥
एतत्सर्वं गिरौ भक्तिमात्रेणैव भवेद् ध्रुवम् ।
तत्त्वतो वेंकटाद्रेस्तु स्वरूपं वेत्ति कः कविः ॥ ३८ ॥
तस्मादस्य गिरेः पुण्यं माहात्म्यं वेत्ति कः पुमान् ।
मायावी परमानन्दं त्यक्त्वा वैकुण्ठमुत्तमम् ॥
स्वामिपुष्करिणीतीरे रमया सह मोदते ॥ ३९ ॥
कल्याणाद्भुतगात्राय कामितार्थप्रदायिने ।
श्रीमद्वेङ्कटनाथाय श्रीनिवासाय ते नमः ॥ ४० ॥
श्रीस्वामिपुष्करिण्याश्च माहात्म्यं श्रुणु कन्यके ।
स्वामिपुष्करिणीमध्ये श्रीनिवासोऽस्ति सर्वदा ॥ ४१ ॥
स्नानं कुर्वन्ति ये तत्र तेषां मुक्तिः करे स्थिता ।
तिस्रः कोट्यर्धकोटीश्च तीर्थानि भुवनत्रये ॥ ४२ ॥
तानि सर्वाणि तत्रैव सन्ति तीर्थे हरेः सदा ।
तत्तीर्थं श्रीनिवासाख्यं सर्वदेवनमस्कृतम् ॥ ४३ ॥
तदेव श्रीनिवासस्य मन्दिरं परिकीर्तितम् ।
तद्दर्शनादेव हे कन्ये यान्ति पापानि भस्मसात् ॥ ४४ ॥
एकैकस्नानमात्रेण सत्सङ्गो भवति ध्रुवम् ।
सत्सङ्गात् ज्ञानमासाद्य ज्ञानान्मोक्षं च विन्दति ॥ ४५ ॥

अधिकारिणां भवेदेवं विपरीतमयोगिनाम् ।
तीर्थानां स्नानमात्रेण मोक्षं यान्तीति ये विदुः ॥ ४६ ॥
ते सर्वे ह्यसुरा ज्ञेयास्ते यान्ति ह्यधमां गतिम् ॥ ४७ ॥
श्रीनिवासस्य तीर्थेऽस्मिन् वायुकोणे च कन्यके
आस्ते वायुः सदा विष्णोः पूजां कर्तुमनुत्तमाम् ॥ ४८ ॥
वायुतीर्थं च तत्प्रोक्तं हस्तद्वादशकान्तरम् ।
हस्तषट्कप्रमाणं च पश्चिमे समुदाहृतम् ॥ ४९ ॥
ये वैष्णवा वैष्णवदासवर्याः स्नानं कुर्युस्तत्र पूर्वं सुकन्ये ।
मध्वान्तस्थः श्रीनिवासस्तु नित्यमत्र स्नानात्प्रीयते वै दयालुः ॥ ५० ॥
ये मध्वतीर्थे स्नातुमिच्छन्ति देवि रुद्रादयो वायुभक्ता महान्तः ।
सदा स्नानं तत्र कुर्वन्ति देवि प्रातः काले चोदयात्पूर्वमेव ॥ ५१ ॥
ये वायुतीर्थे विसृजन्ति देहजं मलं मूत्रं वमनं श्लेश्मकं च ।
येऽपानशुद्धिं लिङ्गशुद्धिं च कन्ये कुर्वन्ति ते ह्यसुरा कीर्तिताश्च ॥ ५२ ॥
श्रुण्वन्ति ये भागवतं पुराणं किं वर्णये तस्य पुण्यं तु देवि ।
ये कृष्णमन्त्रं तु जपन्ति देवि *ह्यष्टाक्षरं मन्त्रवरं सुगोप्यम् ॥ ५३ ॥
तेषां हरिः प्रीयते केशवोऽलं मध्वान्तस्थो नात्र विचार्यमस्ति ।
एवं दानं तत्र कुर्वन्ति ये वै द्विजाग्र्याणां वैष्णवानां विदां च ॥ ५४ ॥
तेषां पुण्यं नैव जानन्ति देवा जानात्येव श्रीनिवासो हरिस्तु ।
शालग्रामं वायुतीर्थे ददन्ति तेषां पुण्यं वेत्ति स व्यंकटेशः ॥ ५५ ॥
सुदुर्लभो वायुतीर्थेऽभिषेको निष्कामबुध्या वैष्णवानां च देवि ।
तथैव तीर्थे दुर्लभं तत्र देवि श्रीमद्भागवतश्रवणं विष्णुदासैः ॥ ५६ ॥
तथैव तीर्थे दुर्लभं तत्र देवि शालग्रामस्य द्विजवर्ये च दानम् ।
जम्बूफलाकारसुनीलवर्णं मुखद्वयं चक्रचतुष्टयान्वितम् ॥ ५७ ॥

---

*षडक्षरं इति पाठश्चेत्साधु इति भाति ।

सुकेसरैः संयुतं स्वणचिह्नध्वजाङ्कुशैर्वज्रचिह्नैर्यवैश्च ।
जानार्दनीं मूर्तिमाहुर्महान्तो दानं तस्या दुर्लभं तत्र तीर्थे ॥ ५८ ॥

अत्युत्तमं मूर्तिदानं तु भद्रे सुदुर्लभं परमं नात्र लोभः ।
सुदुर्लभं बहुदोग्ध्र्याश्च गृष्टेर्दानं तथा वस्त्ररत्नादिकानाम् ॥ ५९ ॥

अत्युत्तमं द्रव्यदानं च देवि स्वापेक्षितं दानमाहुर्महान्तः ।
स्वस्यानपेक्षं फल्गुभूतं च वस्तु दानं तस्य व्यर्थमाहुर्महान्तः ॥ ६० ॥

अत्युत्तमं गृष्टिदानं च पुण्यं नैवाप्नोति दुग्धदोहां च गां च ।
अत्युत्तमे वस्तुनि त्यागबुद्धिः सुदुर्घटा परमा वै जनानाम् ॥ ६१ ॥

अत्युत्तमं भागवतस्य पुस्तकं सुदुर्घटं वायुतीर्थे च कन्ये ।
सुदुर्लभं वैष्णवैस्तत्त्वविद्भिः हरेर्विचारं वायुतीर्थे च देवि ॥ ६२ ॥

श्रीनिवासस्य तीर्थस्य चोत्तरस्यां दिशि स्थितम् ।
चन्द्रतीर्थमिति प्रोक्तं तत्रास्ते चन्द्रमाः सदा ॥ ६३ ॥

श्रीनिवासस्य पूजां च तत्र स्थित्वा करोत्ययम् ।
तत्र स्नानं प्रकुर्वन्ति संगवे ये च कन्यके ॥ ६४ ॥

गुरुतल्पादिपापेभ्यो मुच्यन्ते नात्र संशयः ।
तत्र स्नात्वा पूर्वभागे शालग्रामं ददाति यः ॥ ६५ ॥

ज्ञानद्वारा मोक्षमेति नात्र कार्या विचारणा ।
दधिवामनमूर्तेश्च दानं तत्र सुदुर्लभम् ॥ ६६ ॥

बदरीफलमात्रं तु वर्तुलं नीलवर्णकम् ।
प्रसन्नवदनं सूक्ष्मं सुस्निग्धं कन्यके शुभे ॥ ६७ ॥

चक्रद्वयसमायुक्तं गोपुरैः पंचभिर्युतम् ।
चापबाणसमायुक्तं आसने कुण्डलाकृतिम् ॥ ६८ ॥

वनमालामुखयुतं मूर्धसाहस्रसंयुतम् ।
रौप्यबिन्दुसमायुक्तं सव्ये भद्रार्धमात्रकम् ॥ ६९ ॥
चन्द्रेण सहितं देवि दधिवामनमुच्यते ।
एतादृशं कलौ नृणां दुर्लभं बहुभाग्यकम् ॥ ७० ॥
लक्ष्मीनारायणसमां तां मूर्तिं विद्धि भामिनि ।
सुदुर्लभं तस्य मूर्तेश्च दानं तच्चन्द्रतीर्थे श्रवणं दुर्घटं च ।
सम्यक् स्वरूपं दधिवामनस्य सुदुर्घटं श्रवणं वैष्णवाच्च ॥ ७१ ॥
तत्र स्नात्वा वामनस्य स्वरूपश्रवणाद्धिदुर्दानफलं समं च ।
दशहस्तप्रमाणं तु चन्द्रतीर्थमुदाहृतम् ॥ ७२ ॥
तत्र स्नानं नृणां देवि कलावत्यन्तदुर्लभम् ।
ईशानचन्द्रयोर्मध्ये कौबेरं तीर्थमुत्तमम् ॥ ७३ ॥
अष्टहस्तप्रमाणं च तत्तीर्थं समुदाहृतम्
मध्याह्ने दुर्लभं स्नानं नृणां तत्र सुदुर्लभम् ॥ ७४ ॥
तत्र स्थित्वा कुबेरस्तु सदा भजति वै हरिम् ।
वराहमूर्तिदानं तु शालग्रामस्य दुर्लभम् ॥ ७५ ॥
जम्बुफलप्रमाणं तु पृष्ठं वै कुक्कुटांडवत् ।
वदनं वलयाकारं प्रमाणं चणकादिवत् ॥ ७६ ॥
देवस्य वामभागे च मध्यदेशं विहाय च ।
चक्रद्वयसमायुक्तं ऊर्ध्वदेशे च भामिनि ॥ ७७ ॥
सुवर्णबिन्दुना युक्तं भूवराहमिति स्मृतम् ।
तादृशं भूवराहं च दुर्लभं च कलौ नृणाम् ॥ ७८ ॥
तत्र स्नात्वा भूवराहस्य मूर्तेर्दानं दत्वा श्रवणं चापि कृत्वा ।
तत्र स्थितं भूवराहं च दृष्ट्वा स वै नरः कृतकृत्यो हि लोके ॥ ७९ ॥

तत्र स्नात्वा भूवराहस्य मूर्तेः श्रुणोति यो लक्षणं सम्यगेव ।
स तेन पुण्यं समुपैति देवि स मुक्तिभाङ्नात्र विचार्यमस्ति ॥ ८० ॥

ईशानकोणे श्रीनिवासस्य देवि रौद्रं तीर्थं परमं पावनं च ।
तत्र स्थित्वा रुद्रदेवो महात्मा पूजां करोति श्रीनिवासस्य मूर्तिम् ॥ ८१ ॥

हस्ताष्टकं तत्प्रमाणं वदन्ति तत्र स्नानं वैष्णवैः कार्यमेव ।
तत्र स्नात्वा प्रयतो वै मुरारेः कथां दिव्यां श्रुणुयादादरेण ॥ ८२ ॥

स्नानं पानं तत्र दानं च कुर्याल्लक्ष्मीनृसिंहप्रीतये देवि नित्यं ।
बदरीफलमात्रं च वर्तुलं बिन्दुसंयुतम् ।
देवस्य वामभागे तु चक्रद्वयसमन्वितम् ॥ ८३ ॥

सुवर्णरेखासंयुक्तं किंचिद्रक्तसमन्वितम् ।
नीलवर्णं सवदनं पद्मरेखादिचिह्नितम् ॥ ८४ ॥

लक्ष्मीनृसिंहं तं विद्धि भुक्तिमुक्तिप्रदायकम् ।
एतादृशं गण्डिकायाः शिलाया मूर्तेर्दानं दुर्घटं विद्धि देवि ॥ ८५ ॥

तत्र स्नात्वा श्रीनृसिंहस्वरूपं लक्ष्मीपतेः श्रुणुयाद्भक्तिनम्रः ।
मूर्तेर्दानात्फलमाप्नोति देवि सत्यं सत्यं नात्र विचार्यमस्ति ॥ ८६ ॥

ईशानशक्रयोर्मध्ये ब्रह्मतीर्थमुदाहृतम् ।
दुर्लभं मानुषाणां तु स्नानं सर्वार्थसाधकम् ॥ ८७ ॥

शालग्रामस्य दानं तु दुर्लभं तत्र वै नृणाम् ।
लक्ष्मीनारायणस्यैव मूर्तेर्दानं सुदुर्लभम् ॥ ८८ ॥

स्थूलमौदुम्बरसमं तत्प्रमाणमुदाहृतम् ।
सव्ये दक्षिणपार्श्वे च समयोः पुष्कलान्वितम् ॥
गोखुरैश्च समायुक्तं वज्रपुंखैश्च संयुतम् ॥ ८९ ॥

चणकप्रवेशमात्रं तु वदनं समुदाहृतम् ।
सव्ये दक्षिणपार्श्वे च समयोः पुष्कलान्वितम् ॥ ९० ॥

गोयूथवत्सवर्णं च चतुश्चक्रसमन्वितम् ।
गोखुरैश्च समायुक्तं सुवर्णकिणसंयुतम् ॥ ९१ ॥

वनमालासमायुक्तं वज्रपुंखैश्च संयुतम् ।
एतादृशीं हरेर्मूर्तिं लक्ष्मीनारायणं विदुः ॥ ९२ ॥

कलौ नृणां तस्य लाभो दुर्लभः संस्मृतो भुवि ।
दानं च सुतरां देवि दुर्लभं किं वदामि ते ॥ ९३ ॥

ब्रह्मतीर्थे च संस्नात्वा श्रोतव्या वै हरेः कथा ।
गण्डिकायाः शिलायाश्च लक्ष्मीनारायणस्य तु ॥ ९४ ॥

लक्षणं यो विजानाति तदा तत्सदृशं भुवि ।
प्राप्नोत्येव न सन्देहो नात्र कार्या विचारणा ॥ ९५ ॥

श्रीनिवासस्य तीर्थस्य पूर्वे स्यादिन्द्रतीर्थकम् ।
श्रीनिवासस्य पूजां तु कर्तुमास्ते शचीपतिः ॥ ९६ ॥

शालग्रामशिलादानं कर्तव्यं श्रोत्रियाय वै ।
शालग्रामशिलादानं हत्याकोटिविनाशनम् ॥ ९७ ॥

तस्मिंस्तीर्थे तु यो देवि सीतारामाभिधां शिलाम् ।
ददाति भूतले भद्रे भूपतेः सदृशो भवेत् ॥ ९८ ॥

सीतारामशिला देवि द्विविधा संप्रकीर्तिता ।
पंचचक्रयुता काचित् षट्चक्रेण च संयुता ॥ ९९ ॥

तत्रापि षट्चक्रयुता ह्युत्तमा संप्रकीर्तिता ।
पंचचक्रयुतायाश्च फलं द्विगुणमीरितम् ॥ १०० ॥

कुक्कुटांडप्रमाणं च सुस्निग्धं नीलवर्णकम् ।
वदनत्रयसंयुक्तं षट्चक्रैः केसरैर्युतम् ।। १०१ ।।

स्वर्णरेखासमायुक्तं ध्वजवज्रांकुशैर्युतम् ।
एतादृशं तु वै भद्रे सीतारामाभिधं स्मृतम् ।। १०२ ।।

वदने वदने देवि सीतारामं सकोशकं ।
दुर्लभं तु कलौ नृणां स्वसाम्राज्यप्रदं शुभम् ।। १०३ ।।

इन्द्रतीर्थे महादेवि सीतारामाभिधा शिला ।
या तद्दानं दुर्लभं तन्नाल्पस्य तपसः फलम् ।। १०४ ।।

दानस्य शक्त्यभावे तु श्रोतव्यं लक्षणं हरेः ।
शालग्राशिलादानाद्यत्फलं तत्फलं भवेत् ।। १०५ ।।

आग्नेयकोणे श्रीनिवासस्य देवि तीर्थं त्वास्ते वह्निसंज्ञं प्रशास्तम् ।
स वह्निदेवः श्रीनिवासस्य पूजां कर्तुं ह्यास्ते सर्वदा तीर्थमध्ये ।। १०६ ।।

यो वा तीर्थे वह्निसंज्ञे च देवि भक्त्या स्नानं कुरुतेऽजं स्मरन् हि ।
ज्ञानद्वारा मोक्षमाप्नोति देवि तत्र स्नानं दुर्लभं वै नृणां च ।। १०७ ।।

ज्ञात्वा स्नानं दुष्करं तीर्थराजे भक्तिस्तस्मिन् दुर्लभा चैव देवि ।
शालग्रामं तच्छिलायाश्च दानं सुदुर्लभं वासुदेवाभिधायाः ।। १०८ ।।

ह्रस्वं तथा वर्तुलं नीलवर्णं सूक्ष्मं मुखं मुखचक्रं सुशुद्धम् ।
सुवेणुयुक्तं वासुदेवाभिधेयं दानं कलौ दुर्लभं तस्य भद्रे ।। १०९ ।।

दाने तस्याः शक्त्यभावे च भद्रे स्नात्वा तीर्थे वासुदेवाभिधस्य ।
सम्यक् श्राव्यं लक्षणं वै शिलायास्तयोस्तुल्यं फलमाहुर्महान्तः ।। ११० ।।

दक्षिणे श्रीनिवासस्य यमतीर्थं च संस्मृतम् ।
तत्रास्ते यमराजस्तु पूजां कर्तुं हरेः सदा ।। १११ ।।

तत्र स्नानं च दानं चाप्यक्षयं परमं स्मृतम् ।
शालग्रामशिलादानं कार्यं तत्र शुभानने ।। ११२ ।।

पट्टाभिरामसंज्ञायाः शिलाया दानमिष्यते ।
तच्चूतफलवत्स्थूलं वदनत्रयसंयुतम् ।। ११३ ।।

शिरश्चक्रेण रहितं सप्तचक्रैः समन्वितम् ।
नीलवर्णं स्वर्णरेखं गोखुराद्यैः समन्वितम् ।। ११४ ।।

पट्टवर्धनरामं तु दुर्लभं बहुभाग्यदम् ।
पट्टवर्धनरामं तु यो ददाति च तत्र वै ।। ११५ ।।

पट्टाभिषिक्तो भवति नात्र कार्या विचारणा ।
श्रीनिवासस्य नैर्ऋत्ये नैऋत्यं तीर्थमुत्तमम् ।। ११६ ।।

आस्ते हि निर्ऋतिस्तत्र पूजां कर्तुं च सर्वदा ।
तत्र स्नानं प्रकर्तव्यं पुनर्जन्म न विद्यते ।। ११७ ।।

शालग्राशिलायाश्च पुरुषोत्तमसंज्ञिकाम् ।
मूर्तिं ददाति यो मर्त्यः स याति परमां गतिं ।। ११८ ।।

औदुम्बरफलाकारं प्रसन्नवदनं शुभम् ।
चक्रद्वयसमायुक्तं शिरश्चक्रसमन्वितम् ।। ११९ ।।

सुवर्णबिन्दुसंयुक्तं वज्राङ्कुशसमन्वितम् ।
तन्मूर्तिदानं दुर्लभं तत्र देवि प्रीणाति यस्माच्छ्रीनिवासो महात्मा ।। १२० ।।

यदा दानं दुर्घटं स्याच्च देवि तदा श्रोतव्यं लक्षणं तस्य मूर्तेः ।
पाशिनैर्ऋतयोर्मध्ये शेषतीर्थं परं स्मृतम् ।। १२१ ।।

तत्र स्नात्वा शेषमूर्तिं प्रददाति द्विजातये ।
स याति परमं लोकं पुनरावृत्तिवर्जितम् ।। १२२ ।।

औदुम्बरफलाकारं कुण्डलाकृतिमेव च ।
शेषवद्वन्दनं तस्य तस्मिंश्चक्रद्वयं स्मृतम् ॥ १२३ ॥
फणान्तमेकचक्रेण संयुतं च सवल्मिकं ।
किंचिद्रक्तसमायुक्तं नैल्यवर्णं सगोखुरम् ॥ १२४ ॥
सुप्ता प्रबुद्धा द्विविधा शेषमूर्तिरुदाहृता ।
फणोन्नता प्रबुद्धा स्यात् सुप्ता ह्रस्वफणोन्नता ॥ १२५ ॥
तत्रापि दुर्लभा सुप्ता महाभाग्यकरी स्मृता ।
इह लोके परत्रापि मोक्षदा नात्र संशयः ॥ १२६ ॥
नवचक्रादुपक्रम्य विंशत्यन्तं च यत्र सः ।
अनन्त इति विज्ञेयो ह्यनन्तफलदायकः ॥ १२७ ॥
विश्वम्भरः स विज्ञेयो विंशत्यूर्ध्वं वरानने ।
तत्रापि केसरैश्चक्रैर्लक्षणैश्च समन्वितम् ॥ १२८ ॥
कलौ तु दुर्लभं नृणां तद्दानं चातिदुर्लभम् ।
स्नानं कृत्वा शेषतीर्थे विशुद्धेनैव चेतसा ॥ १२९ ॥
एतेषां लक्षणं श्रुत्वा प्रयाति परमां गतिम् ।
ततः परं महाभागे वारुणं तीर्थमुत्तमम् ॥ १३० ॥
तत्रास्ते वरुणो देवः पूजां कर्तुं हरेः सदा ।
तत्र स्नानं प्रकर्तव्यं दातव्यं दानमुत्तमम् ॥ १३१ ॥
शिंशुमारं च मत्स्यं च त्रिविक्रममथापि वा ।
दातव्यं भूतिकामेन तीर्थेऽस्मिन्वरवर्णिनि ॥ १३२ ॥
जम्बूफलसमाकारा पुच्छे सूक्ष्मा सबिन्दुका ।
चक्रत्रया च वदने पुच्छोपरि सचक्रका ॥ १३३ ॥
श्रीवत्सबिन्दुमालाढ्या मत्स्यमूर्तिरुदाहृता ।
पुच्छादधश्चक्रयुतं शिंशुमारमुदाहृतम् ॥ १३४ ॥

वक्रचक्रयुतश्चेत्स्यात् त्रिविक्रम उदाहृतः ।
एतेषां लक्षणं श्रुत्वा वारुणे तीर्थ उत्तमे ॥ १३५ ॥

एतद्दानफलं प्राप्य मोदते विष्णुमन्दिरे ।
पूर्वोक्ता मूर्तयो यस्मिन् गृहे तिष्ठन्तिं भामिनि ॥ १३६ ॥

भागीरथी तीर्थवरा सन्निधत्ते न संशयः ।
स्वामिपुष्करिणीस्नानं दुर्घटं तु कलौ नृणाम् ॥ १३७ ॥

तत्र स्थितानां तीर्थानां स्नानं चाप्यतिदुर्घटम् ।
शालग्रामशिलादानं दुर्घटं च तथा स्मृतम् ॥ १३८ ॥

स्वामिपुष्करिणीतीरे कन्यादानं सुदुर्घटम् ।
दुर्घटं कपिलादानं भक्ष्यदानं सुदुर्घटम् ॥ १३९ ॥

स्वामिपुष्करिणीतीर्थे तीर्थेवन्येषु भामिनि ।
स्नानं कुरु यथान्यायं शय्यादानं तथा कुरु ॥ १४० ॥

जैगीषव्येन मुनिना त्वेवमुक्ता च कन्यका ।
स्वामिपुष्करिणीस्नानं सा चकार घृतव्रता ॥ १४१ ॥

तीर्थेष्वन्येषु सुस्नाता दानं चक्रे सुभामिनी ।
उवास तत्र सा देवी त्रिसप्तकदिनानि च ॥ १४२ ॥

स्वामिपुष्करिणीतीर्थमहिमानं श्रुणोति यः ।
स याति परमां भक्तिं श्रीनिवासे जगन्मये ॥ १४३ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे (वें)व्यङ्कटगिरिमाहात्म्ये स्वामिपुष्करिण्यादितीर्थ-तत्रत्यदेव-तदीयशालग्रामलक्षण- तद्दानादिवर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥

॥ अष्टाविंशोऽध्यायः ॥

श्रीकृष्ण उवाच

सा गता स्नातुकामाऽथ नदीं पापविनाशिनीम् ।
पप्रच्छ तं गुरुं विप्रं विनयावनता सुधीः ॥ १ ॥
किंनामेयं नदी विप्र किं कार्यं वद चात्र मे ।
जैगीषव्यस्त्वेवमुक्तो वाक्यमेतदुवाच ह ॥ २ ॥

जैगीषव्य उवाच

श्रुणु भद्रे प्रवक्ष्यामि माहात्म्यं पापनाशनम् ।
इयं नदी महाभागे सदा पापविनाशिनी ॥ ३ ॥
ब्रह्महत्यादिपापौघो यत्र स्नानेन नश्यति ।
प्रत्यक्षं दृश्यते ह्यत्र स्नानं कर्तुं समुद्यतैः ॥ ४ ॥
जलं चाशुभ्ररूपेण पापैश्च परिदृश्यते ।
यावच्छुभ्रोदकं नैव तावत्स्नानं च कारयेत् ॥ ५ ॥
यावच्छुभ्रोदकं नैव तावत्पापं न नश्यति ।
शुद्धोदके समायाते पापं नष्टमिति ध्रुवम् ॥ ६ ॥
कलावित्थं विशालाक्षि महिमा दृश्यते भुवि ।
अत्र स्नानं प्रकर्तव्यं दातव्यं दानमुत्तमम् ॥ ७ ॥
ततश्च ज्ञानमासाद्य विष्णुलोकं स गच्छति ।
गुरुस्त्रीगमनाच्चन्द्र अहल्यायां गतो हरिः ॥ ८ ॥
सुरापानाच्च शुक्रस्तु सुवर्णहरणाद्बलिः ।
ब्रह्महत्याश्च रुद्रस्तु नृगो दत्तापहारतः ॥ ९ ॥
सूतस्य हननाद्रामो निर्मुक्तो ह्यत्र भामिनि ।
नानेन सदृशं तीर्थं न भूतं न भविष्यति ॥ १० ॥

स्नानं कुरु महाभागे तेन सिद्धिं ह्यवाप्स्यसि ।
जैगीषव्येण मुनिना पित्रा च सह कन्यका ॥ ११ ॥
स्नानं चकार विधिवदुदतिष्ठच्च भामिनी ।
यावच्च पौरुषं सूक्तं तावत्कालं व्यतिष्ठत ॥ १२ ॥
पश्चाज्जप्त्वा महामन्त्रं वेंकटेशाभिधं परम् ।
द्विजातीन् प्रीणयित्वा सा वस्त्रद्रव्यादिभूषणैः ॥ १३ ॥
तस्माच्च प्रययौ देवी कुमारीतीर्थमुत्तमम् ।
कुमारीमहिमानं च श्रुत्वा स्नानं चकार सा ॥ १४ ॥
पुनरावृत्य सा देवी ह्यन्तरा विरजा नदीम् ।
दृष्ट्वा पप्रच्छ सा देवी जैगीषव्यं गुरुं प्रभुम् ॥ १५ ॥
किंसंज्ञकेयं विप्रेन्द्र किं कार्यं ह्यत्र मे वद ।
जैगीषव्यः पृष्ट एवमुवाच करुणानिधिः ॥ १६ ॥
इयं भागीरथी कन्ये आयाति ह्यन्तरेण तु ।
अतः सा प्रोच्यते ह्यन्तर्गङ्गेति परमर्षिभिः ॥ १७ ॥
कन्ये ह्यस्यास्ति सलिलं श्रीनिवासप्रियं सदा ।
अत्र स्नानं यः करोति स याति परमां गतिम् ॥ १८ ॥
स्नानं चकार सा कन्ये जले परमपावने ।
दानादिकं तथा ज्ञात्वा जजाप परमं मनुम् ॥ १९ ॥
श्रीनिवाससमीपं तु पुनरागत्य भामिनी ।
अङ्गप्रदक्षिणं चक्रे भक्त्या वेंकटनायकम् ॥ २० ॥
ब्राह्मणादीन् प्रीणयित्वा वस्त्रगन्धादिभूषणैः
पुनः परदिने प्रातः स्वामिपुष्करिणीजले ॥ २१ ॥
स्नानं कृत्वा महाभाग ययौ तुम्बुरुसंज्ञकम् ।
पप्रच्छ तं गुरुं देवी तीर्थं किन्नामकं वद ॥ २२ ॥

जैगीषव्य उवाच

इदं तुम्बुरुकाभिज्ञं नारि वै वरवर्णिनि ।
पुरा तुम्बुरुणा साकं नारदस्तपसि स्थितः ॥ २३ ॥
अत्र प्रादुरभूद्विष्णुर्नारदस्य हिताय च ।
स्नानं यः कुरुते ह्यत्र स याति परमां गतिम् ॥ २४ ॥
अत्र स्नानं मनुष्याणां सर्वेषां दुर्लभं कलौ
अत्र स्नानं मनुष्याणां नाल्पस्य तपसः फलम् ॥ २५ ॥
तत्र स्नात्वा च पीत्वा च दत्वा दानान्यनेकशः ।
पुनरागत्य सा देवी श्रीनिवासं ननाम ह ॥ २६ ॥
तस्मिन् दिने ब्राह्मणांश्च तर्पयामास भामिनी ।
स्वामिपुष्करिणीं प्राप्य दीपान्प्राज्वालयत्सती ॥ २७ ॥
सोपानेषु महाभागा दीपावलिभिरंजसा ।
प्रीणयामास देवेशं श्रीनिवासं जगद्गुरुम् ॥ २८ ॥
पुनः परदिने प्राप्ते शक्रतीर्थमनुत्तमम् ।
कपिलाख्योर्ध्वदेशे तु तत्तीर्थं पावनं स्मृतम् ॥ २९ ॥
तत्र स्नात्वा महाभागा तदूर्ध्वं सा ययौ खग ।
विष्वक्सेनसरस्तत्र सर्वपापविनाशनम् ॥ ३० ॥
तत ऊर्ध्वं महाभागा ययौ तत्र ददर्श सा ।
पंचायुधानां तीर्थानि तेषु स्नानं चकार सा ॥ ३१ ॥
तदूर्ध्वं चाग्निकुण्डं स्याद्दुरारोहं ततोऽग्रतः ।
तस्योपरि ब्रह्मतीर्थं ब्रह्महत्याविमोचनम् ॥ ३२ ॥
सप्तर्षीणां तदूर्ध्वं तु पुण्यतीर्थं च सत्फलम्
दशाधिकफलं तेषां तीर्थानामुत्तरोत्तरम् ॥ ३३ ॥

एतेषां चैव माहात्म्यं को वा वक्तुमिहार्हति ।
ऋषितीर्थेषु सा कन्या चचार तप उत्तमम् ॥ ३४ ॥

ममावतारपर्यन्तं चरित्वा तप उत्तमम्
योगधारणया देहं त्यक्त्वा जाम्बवतो गृहे ॥ ३५ ॥

जाता जाम्बवती नाम ववृधे तस्य वेश्मनि ।
तस्याः पिता जाम्बवान्स ममाऽदात्कन्यकां तदा ॥ ३६ ॥

रुद्रानन्तरजा ज्ञेया मम भार्या खगेश्वर ।
य इदं परमाख्यानं वेङ्कटाद्रेर्महागिरेः ॥ ३७ ॥

को वा वर्णयितुं शक्तो मदन्यः पुरुषो भुवि ।
वेङ्कटेशस्य नैवेद्यं सदा लक्ष्मीः करोति वै ॥ ३८ ॥

ब्रह्मा पूजयते नित्यमेवं शास्त्रस्य निर्णयः ।
नैवेद्यभक्षिणां पुंसामुपहासं न कारयेत् ॥ ३९ ॥

स्वस्य प्रशस्त्यभावे तु नैवेद्यं च गुडादिकं ।
ग्राह्यमेव न सन्देहो ह्यन्यथा नरकं व्रजेत् ॥ ४० ॥

श्रीनिवासात्परो देवो न भूतो न भविष्यति ।
स्वयं वा पाचयित्वान्नं घृतपक्वादिकं तथा ॥ ४१ ॥

श्रीनिवासस्य नैवेद्यं दत्वा भोजनमाचरेत् ।
इदं तु परमं गोप्यं तवोक्तं च खगेश्वर ॥ ४२ ॥

न च कस्यापि वक्तव्यं गोप्यत्वात्खगसत्तम ।
इतः परं प्रवक्ष्यामि तारतम्यं श्रुणु प्रभो ॥ ४३ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे कन्याकृतनानातीर्थयात्रानिरूपणं नाम अष्टाविंशोऽध्यायः ॥ २८ ॥

॥ एकोनत्रिंशोऽध्यायः ॥

या पूर्वसर्गे दक्षपुत्री सती तु रुद्रस्य पत्नी दक्षयज्ञे स्वदेहम् ।
विसृज्य सा मेनकायां च जज्ञे धराधराद्धिमवतो वै सकाशात् ॥ १ ॥

सा पार्वती रुद्रपत्नी खगेन्द्र या शेषपत्नी वारुणी नाम पूर्वा ।
सैवागता बलभद्रेण रन्तुं द्विरूपमास्थाय महापतिव्रता ॥ २ ॥

श्रीरित्याख्या चेन्दिरावेशयुक्ता तस्या द्वितीया प्रतिमा पेयरूपा ।
यदा शेषो नररूपेण वीन्द्र तपश्चचार विष्णुना सार्धमेव ॥ ३ ॥

तदैव देवी वारुणी शेषपत्नी तपश्चक्रे चेन्दिराप्रीतये च ।
तदा प्रीता चेन्दिरा सुप्रसन्ना ह्युवाच तां वारुणीं शेषपत्नीम् ॥ ४ ॥

यदा रामो वैष्णवांशेन युक्तः संपत्स्यते भूतले रौहिणेयः ।
ममावेशात्संयुता त्वं तु भद्रे श्रीरित्याख्या बलभद्रस्य रन्तुम् ॥ ५ ॥

संपत्स्यसे नात्र विचार्यमस्तीत्युक्त्वा सा वै प्रययौ विष्णुलोकं ।
लक्ष्म्यावेशात् श्रीरितीड्यां समाख्यां लब्ध्वा लोके शेषपत्नी बभूव ॥ ६ ॥

यदावेशो बहुलः स्याद्धरेश्च तदा रामः श्र्यभिधासंगमेव ।
करोति वीन्द्र सर्वथा वै रमायास्तदावेशो ह्यस्ति न संशयो हि ॥ ६ ॥

या रेवती रेवतस्यैव पुत्री सा वारुणी बलभद्रस्य पत्नी ।
रामेण रन्तुं सर्वदा वारुणी तु पुत्रीत्वमाप्ता हन्त तस्यैव सुभ्रूः ॥ ८ ॥

एवं त्रिरूपा वारुणी शेषपत्नी द्विरूपभूता पार्वती रुद्रपत्नी ।
सौपर्णिनाम्नी तव पत्नी खगेन्द्र यास्तास्तिस्रः षट् च विष्णोश्च स्त्रीभ्यः ॥ ९ ॥

द्विगुणाधमा रुद्रशेषादिकेभ्यो दशाधमा त्वं विजानीहि पौत्रे ।

गरुड उवाच

नीचाया जाम्बवत्याश्च शेषसाम्यं च कुत्रचित् ।
श्रूयते च मया कृष्ण निमित्तं ब्रूहि मे प्रभो ॥ १० ॥

उमायाश्च तथा रुद्रः सदा दशगुणाधिकः ।
एवं त्वयोक्तं भगवन्निश्चयार्थं मम प्रभो ॥ ११ ॥

रेवती श्रीयुता श्रीश्च पेयरूपा च वारुणी ।
सौपर्णी पार्वती चैव तिस्रः शेषाच्छतावराः ॥ १२ ॥

इत्यपि श्रूयते कृष्ण कुत्रचिन्मधुसूदन ।
निमित्तं ब्रूहि मे कृष्ण तव शिष्याय सुव्रत ॥ १३ ॥

श्रीकृष्ण उवाच

नीचाया जाम्बवत्याश्च तदन्येषां खगाधिप ।
उत्तमानां च साम्यं तु ह्युत्तमावेशतो भवेत् ॥ १४ ॥

अवराणां गुणस्यापि ह्युत्तमानामधीनता ।
अस्तीति द्योतनायैव शतांशाधिक्यमुच्यते ॥ १५ ॥

यथा मयोच्यते वीन्द्र तथा जानीहि नान्यथा ।
तदनन्तरजान्वक्ष्ये श्रुणु काश्यपजोत्तम ॥ १६ ॥

चतुर्दशसु चेन्द्रेषु सप्तमो यः पुरन्दरः ।
वृत्रादीनां शरीरं तु पुरमित्युच्यते बुधैः ॥ १७ ॥

तं दारयति वज्रेण यस्मात्तस्मात्पुरन्दरः ।
चतुर्दशसु चेन्द्रेषु मन्त्रद्युम्नस्तु षष्टकः ॥ १८ ॥

मन्त्रानष्ट महावीन्द्र देवो द्योतयते यतः ।
मन्त्रद्युम्नस्ततो लोके उभावप्येक एव तु ॥ १९ ॥

मन्त्रद्युम्नावतारोऽभूत् कुन्तीपुत्रोऽर्जुनो भुवि ।
विष्णोर्वायोरनन्तस्य चेन्द्रस्य खगसत्तम ॥ २० ॥

पार्थश्चतुर्भिः संयुक्त इन्द्र एव प्रकीर्तितः ।
चतुर्ष्वपि च वायोश्च विशेषोऽस्ति सदाऽर्जुने ॥ २१ ॥

वालिनामा वानरस्तु पुरन्दर इति स्मृतः ।
चन्द्रवंशे समुत्पन्नो गाधिराजो विचक्षणः ॥ २२ ॥
मन्त्रद्युम्नावतारः स विश्वामित्रपिता स्मृतः ।
वेदोक्तमन्त्रा गाः प्रोक्ता धिया सन्धारयेद्यतः ॥ २३ ॥
अतो गाधिरिति प्रोक्तस्तदर्थं भूतले ह्यभूत् ।
इक्ष्वाकुपुत्रो यो वीन्द्र विकुक्षिरिति विश्रुतः ।. २४ ॥
स एवेन्द्रावतारोऽभूत् हरिसेवार्थमेव च ।
विशेषेण हरिं कुक्षौ विज्ञानाच्च हरेः सदा ॥ २५ ॥
अतो विकुक्षिनामाऽसौ भूलोके विश्रुतः सदा ।
रामपुत्रः कुशः प्रोक्त इन्द्र एव प्रकीर्तितः ॥ २६ ॥
वाल्मीकिऋषिणा यस्मात्कुशेनैव विनिर्मितः ।
अतः कुश इति प्रोक्तो जानकीनन्दनः प्रभुः ॥ २७ ॥
मन्त्रद्युम्नः पुरेन्द्रस्तु गाधिर्वाली तथार्जुनः ।
विकुक्षिः कुश एवैते सप्त चेन्द्राः प्रकीर्तिताः ॥ २८ ॥
यः कृष्णपुत्रः प्रद्युम्नः काम एव प्रकीर्तितः ।
प्रकृष्टप्रकाशरूपत्वात् प्रद्युम्न इति नामवान् ॥ २९ ॥
यो रामभ्राता भरतः काम एवाभवद्भुवि ।
रामाज्ञां भरते यस्मात् तस्माद्भरतनामकः ॥ ३० ॥
चक्राभिमानी कामस्तु सुदर्शन इति स्मृतः ।
ब्रह्मयुक् कृष्णपुत्रस्तु साम्बो जाम्बवतीसुतः ॥ ३१ ॥
कामावतारो विज्ञेयः सन्देहो नात्र विद्यते ।
यो रुद्रपुत्रः स्कन्दस्तु काम एव प्रकीर्तितः ॥ ३२ ॥
रिपूनाक्रन्दते नित्यं अतः स्कन्द इति स्मृतः ।
यो वा सनत्कुमारस्तु ब्रह्मपुत्रः खगाधिप ॥ ३३ ॥

कामावतारो विज्ञेयो नात्र कार्या विचारणा ।
सुदर्शनश्च भरतः प्रद्युम्नः साम्ब एव च ॥ ३४ ॥
सनत्कुमारः स्कन्दश्च षडेते कामरूपकाः ।
अतश्च हीन्द्रकामावप्युमादिभ्यो दशावरौ ॥ ३५ ॥
तयोर्मध्ये तु गरुड काम इन्द्राधमः स्मृतः ।
अहंकारभवः प्राणः अहंकारिकसंज्ञकः ॥ ३६ ॥
मरुत्स्वाद्यः स विज्ञेयः कामेन्द्राभ्यां दशाधमः ।
तदनन्तरजान्वीन्द्र श्रुणु वक्ष्ये समासतः ॥ ३७ ॥
श्रवणान्मोक्षमाप्नोति महापापाद्विमुच्यते ।

इति श्रीगरुडपुराणे ब्रह्मकाण्डे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

॥ त्रिंशोऽध्यायः ॥

कामपुत्रोऽनिरुद्धोऽपि हरेरन्यः प्रकीर्तितः ॥ १ ॥

स एवाभूत् हरेः सेवां कर्तुं रामानुजो भुवि ।
शत्रुघ्न इति विख्यातः शत्रून् सूदयते यतः ॥ २ ॥

अनिरुद्धः कृष्णपुत्रात्प्रद्युम्नाद्योऽजनिष्ट ह ।
संकर्षणादिरूपैस्तु त्रिभिराविष्ट एव सः ॥ ३ ॥

एवं द्विरूपो विज्ञेयो ह्यनिरुद्धो महामतिः ।
कामभार्या रतिर्यातु द्विरूपा संप्रकीर्तिता ॥ ४ ॥

रुक्मपुत्री रुक्मवती कामभार्या प्रकीर्तिता ।
अतिप्रकाशयुक्तत्वात् तस्माद्रुक्मवती स्मृता ॥ ५ ॥

दुर्योधनस्य या पुत्री लक्षणा सा रतिः स्मृता ।
कृष्णपुत्रस्य भार्या सा लक्षणैः संयुतत्वतः ॥ ६ ॥

लक्षणाभिधया भूमौ दुष्टवीर्योद्भवा ह्यपि ।
एवं द्विरूपा विज्ञेया कामभार्या रतिः स्मृता ॥ ७ ॥

स्वायम्भुवो ब्रह्मपुत्रो मनुस्त्वाद्यो गुरोः समः ।
राजधर्मेण विष्णोश्च जातः प्रीणयितुं हरेः ॥ ८ ॥

बृहस्पतिर्देवगुरुर्महात्मा तस्यावतारास्त्रय आसन् खगेन्द्र ।
रामावतारे तारसंज्ञो बभूव ह्यम्भोजजावेशयुतो बृहस्पतिः ॥ ९ ॥

देवावतारान् वानरांस्तारयित्वा श्रीरामदिव्याचरितान्यवादीत् ।
अतो ह्यसौ तारनामा बभूव ह्यंगत्वमाप्तुं रामदेवस्य भूम्याम् ॥ १० ॥

कृष्णावतारे द्रोणनामा बभूव ह्यम्भोजावेशयुतो बृहस्पतिः ।
यस्माद्द्रोणात्सम्बभूवेति हेतोस्तस्मादसौ द्रोणसंज्ञो बभूव ॥ ११ ॥

भूभारभूतानुद्धतौ ह्यङ्गभूतो विष्णोः सेवां कर्तुमेवास भूमौ ।
बृहस्पतिः पवनावेशयुक्तः स उद्धवश्चेत्यभिधानमाप ॥ १२ ॥

यस्मादुत्कृष्टो हरिरत्र सम्यगतो ह्यसौ बुधवन्नाम चाप ।
सखा ह्यभूत्कृष्णदेवस्य नित्यं महामतिः सर्वलोकेषु पूज्यः ॥ १३ ॥

दक्षिणाङ्गुष्ठजो दक्षो ब्रह्मपुत्रो महामतिः ।
कन्याः सृष्ट्वा हरेः प्रीणन्नास भूमौ प्रजापतिः ॥ १४ ॥

पुत्रानुत्पादयितुं दक्षस्त्वतो दक्ष इति स्मृतः ।
शचीं भार्यां देवराजस्य विद्धि तस्या ह्यवतारं श्रुणु सम्यक् खगेन्द्र ।
रामावतारे नाम तारा बभूव सा वालिपत्नी केवला सा शची हि ॥ १५ ॥

रामान्मृते वालिसंज्ञे पतौ हि सुग्रीवसंगं सा चकाराथ तारा ।
अतो नागात्स्वर्गलोकं च तारा ह्युवास सा ह्यन्तरिक्षे च पापा ॥ १६ ॥

कृष्णावतारे सैव तारा च वीन्द्र बभूव भूमौ वीरसेनस्य पुत्री ।
चित्राङ्गदेति ह्यभिधा स्याच्च तस्याः सामीप्यमस्यास्त्वर्जुनेनैव नासीत् ॥ १७ ॥

उत्पादयित्वा बभ्रुवाहं च पुत्रं तस्यां त्यक्त्वा ह्यर्जुनो वै महात्मा ।
अतश्चोभे तारचित्रांगदे च शचीरूपे नात्र विचार्यमस्ति ॥ १८ ॥

पुलोमजा मन्त्रद्युम्नस्य भार्या या कौशिका गाधिराजस्य भार्या ।
विकुक्षिभार्या सुमतिश्चेति संज्ञा कुशस्य पत्नी कान्तिमतीति संज्ञा ॥ १९ ॥

एताः सप्त ह्यवताराश्च शच्या जानीहि वै नास्ति विचारणात्र ।
शची रतिश्चानिरुद्धो मनुर्दक्षो बृहस्पतिः ।
षडन्योन्यसमाः प्रोक्ताः अहंकाराद्दशाधमाः ॥ २० ॥

अथ यः प्रवहो वायुर्मुख्यवायोः सुतो बली ।
स वायुषु महानद्य स वै कोणाधिपस्तथा ॥ २१ ॥

नासिक्यश्च स एवोक्तो भौतिकश्च स एव तु ।
अतिवाहः स एवोक्तो यतो गम्यो मुमुक्षुभिः ॥ २२ ॥
दक्षादिभ्यः पंचगुणादधमः संप्रकीर्तितः ।

गरुड उवाच

प्रवहश्चेति संज्ञां स किमर्थं प्राप तद्वद ॥ २३ ॥
अर्थः कश्चास्ति तन्नाम्नः प्रतीतस्तं वदस्व मे ।
गरुडेनैवमुक्तस्तु भगवान् देवकीसुतः ॥ २५ ॥
उवाच परमप्रीतः संस्तूय गरुडं हरिः ॥

कृष्ण उवाच

प्रकर्षं हरितत्त्वानि वहते सर्वदा यतः ॥ २६ ॥
अतः प्रवहनामासौ कीर्तितः पक्षिसत्तम ।
सर्वोत्तमो विष्णुरेवेति नान्यो ब्रह्मादयस्तदधीनाः सदाऽपि ।
मयोक्तमेतत्तु सत्यं न मिथ्या गृह्णामि हस्तेनोरगं कोपयुक्तम् ॥ २७ ॥
सर्वं सत्यं यदि मिथ्या भवेत्तु तर्हि ह्यसौ दंशतु मे ह्यहीन्द्रः ।
एवं ब्रुवन्नुरगं कोपयुक्तं समग्रहीन्नादशत् सोऽपि सर्पः ॥ २८ ॥
एतस्य वै धारणादेव वीन्द्र स वायुपुत्रः प्रवहेत्याप संज्ञाम् ।
ये वा लोके विष्णुमूर्तिं विहाय दैत्यस्वरूपान् रेणुकादीन् कुदेवान् ॥ २९ ॥
तेषां तथा तत्पितृणां च पूजां कुर्वन्ति सत्यं व्यर्थमेव भवेद्धि ।
एतत्सर्वं यदि मिथ्या भवेत्तु तदा त्वसौ दंशतु मामहीन्द्रः ॥ ३० ॥
पितृस्थितं प्रविहायैव यस्तु पितॄनुद्दिश्य केवलं यः करोति ।
स पापात्मा नरकान्वै प्रयातीत्यतद्वाक्यं सत्यमेतद्ब्रवीमि ॥ ३१ ॥

न श्रीः स्वतन्त्रा नापि विधिः स्वतन्त्रो न वायुदेवो नापि शिवः स्वतन्त्रः ।
तदन्ये नो गौरिपुलोमजाद्याः किं वक्तव्यं नात्र लोके स्वतन्त्राः ॥ ३२ ॥

लोके स्वतन्त्रः परमो विष्णुरेव सत्यं सत्यं भुजमुद्धृत्य सत्यम् ।
एतत्सत्यं यदि मिथ्या भवेत्तु तदा त्वसौ दंशतु मामहीन्द्रः ॥ ३३ ॥

जीवश्च सत्यः परमात्मा च सत्यः तयोर्भेदः सर्वदा सत्य एव ।
जडश्च सत्यः जडजीवादिभेदः सत्यः सदा जडविष्ण्वोश्च भेदः ॥ ३४ ॥

भेदः सत्यः सर्वजीवेषु नित्यं सत्या जडानां च भिदा सदाऽपि ।
एतत्सत्यं यदि मिथ्या भवेत्तु तदा त्वसौ दंशतु मामहीन्द्रः ॥ ३५ ॥

एवं ब्रुवन्नुरगं कोपयुक्तं समग्रहीन्नादशत् सोऽपि सर्पः ।
एतस्य वै धारणादेव वीन्द्र स वायुपुत्रः प्रवहेत्याप संज्ञाम् ॥ ३६ ॥

द्वयोः स्वरूपं प्रविदित्वैव पूर्वं यः स्वीकरोति द्वयमेव नित्यं ।
स्नानादिकं च प्रकरोति नित्यं स पापात्मा नैव मोक्षं प्रयाति ॥ ३७ ॥

तस्माद्द्वयं प्रविहायैव नित्यं सुखी भवेन्नात्र विचार्यमस्ति ।
एतत्सत्यं यदि मिथ्या भवेत्तु तदा त्वसौ दंशतु मामहीन्द्रः ॥ ३८ ॥

गरुड उवाच

किं तद्द्वयं देवदेवेश किंवा तत्कारणं कीदृशं मे वद त्वम् ।
द्वयोस्त्यागः कीदृशो मे वद त्वं त्यागात्सुखं कीदृशं ब्रूहि देव ॥ ३९ ॥

कृष्ण उवाच

द्वयं चाहुस्त्विन्द्रिये द्वे बलिष्ठे देहे ह्यस्मिन् शिश्नजिह्वे सुदुष्टे ।
अवान्तरे श्रोत्रनेत्रे खगेन्द्र द्वयं चाहुस्तत्स्वरूपं च वक्ष्ये ॥ ४० ॥

श्रोत्रस्वभावो लोकवार्ताश्रुतौ च ह्यतीव मोदस्त्वादरास्वादने च ।
हरेर्वार्ताश्रवणे दुःखजालं श्रोत्रस्वभावो जडता तन्द्रिता च ॥ ४१ ॥

नेत्रस्वभावो दर्शने स्त्रीनराणां ह्यत्यादरान्नास्ति निद्रादिकं च ।
हरेर्भक्तानां दर्शने दुःखरूपो विष्णोः पूजादर्शने दुःखजालम् ॥ ४२ ॥

द्वयोः स्वरूपं प्रविदित्वैव पूर्वं पुनः पुनः स्वीकरोत्येव मूढः ।
शिश्नं मौर्ख्याच्चैव कुत्रापि योनौ प्रवेशयेत्सर्वदा ह्यादरेण ॥ ४३ ॥

भयं च लज्जा नैव चास्ते वधूनां तथा नृणां वनितानां यतीनाम् ।
स्वस्त्रीऋतौ ह्यनिषिद्धे दिनेऽपि सुवामयज्ञेन स्वभावश्च वीन्द्र ॥ ४४ ॥

रसास्वभावो भक्षणे सर्वदाऽपि ह्यनर्पितस्यान्नभक्ष्यस्य विष्णोः ।
तथोपहारस्य च तत्स्वभावः ह्यभक्षाणां भक्षणे तत्स्वभावः ॥ ४५ ॥

अलेह्यलेहस्य च तत्स्वभावः पातुं त्वपेयस्य च तत्स्वभावः ।
द्वयोः स्वरूपं प्रविचार्य मूढः पुनः पुनः स्वीकरोत्येव नित्यम् ॥ ४६ ॥

तस्य स्नानं व्यर्थमाहुश्च यस्मात्तस्मात्त्याज्यं तद्द्वयोः कार्यमेव ।
अभिप्रायं ह्येतमेवं खगेन्द्र जानीहि त्वं प्रवहस्यैव तत्त्वम् ॥ ४७ ॥

भार्याद्वयं ह्यविदित्वा स्वरूपं स्वीकृत्य चैकां प्रविहायैव चैकाम् ।
स्नानादिकं कुरुते मूढबुद्धिः व्यर्थं चाहुर्मोक्षभागी न चैव ॥ ४८ ॥

एतत्सर्वं यदि मिथ्या भवेत्तु तदा त्वसौ दंशतु मामहीन्द्रः ।

गरुड उवाच

भार्याद्वयं किं वद त्वं ममापि तयोः स्वरूपं किं वद त्वं मुरारे ॥ ४९ ॥

तयोर्मध्ये ग्राह्यभार्यां वद त्वमग्राह्यभार्यां चापि सम्यग्वद त्वम् ।

कृष्ण उवाच

बुद्धिश्च पत्नी सा द्विरूपा खगेन्द्र दुष्टा चैका त्वपरा सुष्ठुरूपा ॥ ५० ॥

तयोर्मध्ये दुष्टरूपा कनिष्ठा ज्येष्ठा तु या सुष्टुबुद्धिस्वरूपा ।
कनिष्ठया नष्टतां याति जीवः सुनिष्ठतां ज्येष्ठया यान्ति योग्य ॥ ५१ ॥

कनिष्ठायाः श्रुणु वक्ष्ये स्वरूपं श्रुत्वा तस्यास्त्यागबुद्धिं कुरुष्व ।
जीवं य वै प्रेरयन्ती कनिष्टा काम्यं धर्मं कुरुते सर्वदाऽपि ॥ ५२ ॥

क्व ब्राह्मणाः क्वच विष्णुर्महात्मा क्व वै कथा क्व च यज्ञाः क्व गावः ।
क्व चाश्वत्थः क्व च स्नानं क्व शौचमेतत्सर्वं नाम नाशं करोति ॥ ५३ ॥

मूढं पतिं रेणुकां पूजय त्वं मायादेव्या दीपदानं कुरुष्व ।
सुभैरवादीन् भज मूढ त्वमद्य हरिद्राचूर्णं धारय सर्वदाऽपि ॥ ५४ ॥

ज्येष्ठाष्टम्यां ज्येष्ठदेवीं भजस्व भक्त्या सूत्रं गलबन्धं कुरुष्व ।
बनदाष्टम्यां मरिगदं भजस्व तथा सूत्रं स्वगले धारयस्व ॥ ५५ ॥

दीपस्तम्भं सुदिने पूजयस्व तत्सूत्रमेव स्वगले धारयस्व ।
महालक्ष्मीदिवसे चाद्यलक्ष्मीं सम्यक्पूजां कुरु त्वं हि भक्त्याऽथ जीव ॥ ५६ ॥

लक्ष्मीसूत्रं स्वगले धारय त्वं महालक्ष्मीवान्भवसीत्युत्तरत्र ।
विवाहमौंजीदिवसे भाग्यकामः सुगुग्गुलान् धारयस्वातिभक्त्या ॥ ५७ ॥

सुवासिनीं पूजय त्वं हि भक्त्या गन्धैः पुष्पैर्धूपदीपैः पते त्वम् ।
वरार्तिक्यं कांस्यपात्रे निधाय कुर्वार्तिक्यं देवतानां सदा त्वम् ॥ ५८ ॥

पिचुमन्दपात्राणि वितत्य भूमौ नम त्वं क्षम्यतां चेति चोक्त्वा ।
महादेवीं पूजयस्वाद्य भक्त्या सद्वैष्णवानां मा ददस्वाप्यथान्नम् ॥ ५९ ॥

सद्वैष्णवानां यदि वान्नं ददासि भाग्यं च ते पश्यतो नाशमेति ।
स्ववामहस्ते वेणुपत्रं निधाय दीपं धृत्वा सव्यहस्ते पते त्वम् ॥ ६० ॥

उत्तिष्ठ भोः पंचगृहेषु भिक्षां कुरुष्व सम्यक् प्रविहायैव लज्जाम् ।
आदौ गृहे षड्रसान्नं च कृत्वा जगज्जाया भोजनं त्वं कुरुष्व ॥ ६१ ॥

तच्छेषान्नं भोजयित्वा पते त्वं तासां चरणे शरणं त्वं कुरुष्व ।
तासां हस्तं पुस्तके स्थापयित्वा त्राहीत्येवं तन्मुखैर्वाचयस्व ॥ ६२ ॥

त्वं खड्गदेवं पूजयस्वाद्य भर्तः तत्सेवकान् पूजयस्वाद्य सम्यक् ।
तैः सार्धं श्वानशब्दं कुरुष्व हरिद्राचूर्णं सर्वदा त्वं च धत्स्व ॥ ६३ ॥

कुरुष्व त्वं भीमसेनस्य पूजां पञ्चामृतैः षोडशभिश्चोपचारैः ।
तत्कौपीनं रौप्यजं कारयित्वा समर्पय त्वं दीपमालां कुरुष्व ॥ ६४ ॥

तद्दासवर्यान् भोजस्वाद्य भक्त्या गर्ज त्वं हि भीम भीमेति सुष्ठु ।
तद्दासवर्यान् मोदयस्व स्ववस्त्रैः मद्यैर्मांसद्रव्यजालेन नित्यम् ॥ ६५ ॥

महादेवं पूजयस्वाद्य सम्यङ् महारुद्रैरतिरुद्रैश्च सम्यक् ।
हरेत्युक्त्वा जंगमान् पूजय त्वं शैवागमे निपुणान् शूद्रजातान् ॥ ६६ ॥

शाकम्भरीं विवशः शाकजातान् सुपाचयित्वा च गृहे गृहे ।
ददस्व भक्त्या परमादरेण स्वलंकृतः संस्तुवंस्तद्गुणांश्च ॥ ६७ ॥

कुलालदेवं पूजयस्वाद्य भक्त्या त्वं दृग्भ्यां वै तद्दिने शम्भुबुध्या ।
तद्भक्तवर्यान् पूजय त्वं हि सम्यक् तत्पादमूले वन्दनं त्वं कुरुष्व ॥ ६८ ॥

सुपंचम्यां मृण्मयीं शेषमूर्तिं पूजां कुरु त्वं क्षीरजालादिकैश्च ।
सुनागपाशं हि गले च बद्ध्वा तच्छेषान्नं भुंक्ष्व भुंक्ष्वेति नित्यम् ॥ ६९ ॥

दिने चतुर्थे पूजय त्वं सुभक्त्या सुमृण्मयाज्जनितं वै गणेशं ।
दूर्वाङ्कुरैर्मोदकैः पूजयित्वा च भर्तः तन्नैवेद्यं भुंक्ष्व भुंक्ष्वाद्य सुष्ठु ॥ ७० ॥

इत्यादिकं प्रेरयित्वा पतिं सा जीवं नष्टं प्रकरोत्येव नित्यम् ।
तस्याः संगाज्जीवरूपः पतिस्तु सम्यग् दुःखं इहलोके परत्र ॥ ७१ ॥

तस्याः सङ्गं सुविदूरे विसृज्य ज्येष्ठासङ्गं कुरु सम्यक्सदा त्वं ।
सुबुद्धिरूपा त्वीरयन्ती जगाद भजस्व विष्णुं परमादरेण ॥ ७२ ॥

हरिं विनाऽन्यं न भजस्व नित्यं सा रेणुका त्वां तु न पालयिष्यति ।
अदृष्टनामा हरिरेव नित्यं फलप्रदो यदि न स्यात्खगेन्द्र ॥ ७३ ॥

जुगुप्सितां श्रुत्यनुक्तां च देवीं पतिद्रुहां सर्वदा सेवयित्वा ।
तस्याः प्रसादात्कुष्ठभगन्दराद्यैः भुक्त्वा दुःखं संयमिनीं प्रयासि ॥ ७४ ॥

तदा कुदेवी कुत्र गता वदस्व मे ह्यतः पते त्वं न भजस्व देवीम् ।
पते भज त्वं ब्राह्मणान् वैष्णवांश्च संसारदुःखात्तारकान् सुष्ठुरूपान् ॥ ७५ ॥

शौचादिकं प्रविहायैव कष्टं मायादेव्या भजनात् किं वद त्वम् ।
ज्येष्ठाष्टम्यां ज्येष्ठदेवीमलक्ष्मीं लक्ष्मीति बुद्ध्या पूजयित्वा च सम्यक् ॥ ७६ ॥

तस्याः सूत्रं गलबद्धं च कृत्वा नानादुःखं ह्यनुभूयाः पते त्वम् ।
यदा पते यमदूतैश्च पाशैर्बद्ध्वा च सम्यक् ताड्यमानैः कशाभिः ॥ ७७ ॥

तदा ह्यलक्ष्मीः कुत्र पलायिताऽसावतो मूलं विष्णुपादं भज त्वम् ।
पते भज त्वं सर्वदा वायुतत्त्वं न चाश्रयेस्त्वं सूक्ष्मस्कन्दं च मूढ ॥ ७८ ॥

दत्वा तस्मै नवनीतं च भक्त्या तदुच्छिष्टं भक्षयित्वा पते हि ।
तस्याश्च सूत्रं गलबन्धं च कृत्वा इहैव दुःखान्यनुभूय चास्से ॥ ७९ ॥

यदा पते यमदूतैश्च पाशैर्बद्धश्च सम्यक् ताड्यमानः कशाभिः ।
तदा स्कन्दः कुत्र पलायतेऽसावतो मूलं विष्णुपादं भज त्वम् ॥ ८० ॥

दीपस्तम्भं पूजयित्वा पते त्वं सूत्रं च बद्ध्वा स्वगले च भक्त्या ।
तदा बद्ध्वा यमदूतैश्च पाशैर्दीपस्तम्भैस्ताड्यमानस्तु सम्यक् ॥ ८१ ॥

दीपस्तम्भः कुत्र पलायितोऽभूदतो मूलं विष्णुपादं भज त्वम् ।
लक्ष्मीदिने पूजयित्वा च लक्ष्मीं सूत्रं तस्याः स्वगले धारितस्त्वम् ॥ ८२ ॥

यदा पते यमदूतैश्च पाशैर्बद्ध्वा सम्यक् ताड्यमानः कशाभिः ।
तदा लक्ष्मीः कुत्र पलायितासावतो मूलं विष्णुपादं भज त्वम् ॥ ८३ ॥

विवाहमौंजीदिवसे मूढबुद्धे सुगुग्गुलान् धारयित्वा सुभक्त्या ।
वरान्नार्तिक्यं कांस्यपात्रे निधाय कृत्वार्तिक्य उद उदेति शब्दम् ॥ ८४ ॥

तथा वसित्वा पिचुमन्दस्य पत्रं प्रनृत्य चैव परमादरेण ।
यदा तदा यमदूतैश्च पाशैर्बद्ध्वा बद्ध्वा ताड्यमानश्च सम्यक् ॥ ८५ ॥

तव स्वामिन् कुलदेवी महात्मन् पलायिता कुत्र मे तद्वद त्वम् ।
जलदेवीं पूजयित्वा च सम्यक् कण्ठाभरणैर्विधुराणां च केशैः ॥ ८६ ॥

सन्तिष्ठमाने यमदूता बलिष्ठाः सन्ताड्यमाने मुसलैर्भिन्दिपालैः ।
यदा तदा कुत्र पलायिता सा केशैर्विहीना लम्बकर्णं च कृत्वा ॥ ८७ ॥

स्ववामहस्ते वेणुमात्रं निधाय दीपं धृत्वा सव्यहस्ते च मूढः ।
गृहे गृहे भैक्षचर्यां च कृत्वा सन्तिष्ठमाने स्वगृहं च देवी ॥ ८८ ॥

यदा तदा यमदूतैश्च मूढ दीपैः सहस्रैर्दह्यमानश्च सम्यक् ।
निर्नासिका रेणुका मूढबुद्धे पलायिता कुत्र सा मे वद त्वम् ॥ ८९ ॥

सदा मूढ खड्गदेवं च भक्त्या तद्भक्तवर्यान् पूजयित्वा च सम्यक् ।
तैः सार्धं त्वं श्वानवद्गर्जयित्वा सन्तिष्ठमाने स्वगृहे चैव नित्यम् ॥ ९० ॥

यदा तदा यमदूतैश्च सम्यक् सन्ताड्यमानस्तत्र शब्दं प्रकुर्वन् ।
सन्तिष्ठमाने भक्तवर्यं विहाय तदा देवः कुत्र पलायितोऽभूत् ॥ ९१ ॥

पार्थक्येन भीमसेनप्रतीकं पंचामृतैः पूजयित्वा च सम्यक् ।
सुरौप्यजं नेत्रकौपीनमेवं दत्वा मूढ तिष्ठमाने गृहे स्वे ॥ ९२ ॥

यदा तदा यमदूतैश्च सम्यक् सन्ताड्यमाने यममार्गे च मूढः ।
भीमः स वै कुत्र पलायितोऽभूदतो मूलं विष्णुपादं भज त्वम् ॥ ९३ ॥

महादेवं पूजयित्वा च सम्यक् हरेत्युक्त्वा स्वगृहे विद्यमाने ।
यदा गृहं दह्यते वह्निना तु तदा हरः कुत्र पलायितोऽभूत् ॥ ९४ ॥

शाकम्भरीदिवसे सर्वशाकान् सुपाचयित्वा ब्राह्मणान् भोजयित्वा ।
यदा तदा यमदूता बलिष्ठाः सन्दह्यमाने ब्राह्मणैः सार्धमेव ॥ ९५ ॥

शाखामृगीवत्सा कुदेवी महात्मन् पलायिता कुत्र मे हि वद त्वम् ।
कुलालदेवं पूजयित्वा च भक्त्या कार्पासं वै तेन दत्तं गृहीत्वा ॥ ९६ ॥

सन्तिष्ठमाने यमदूतैश्च सम्यक् सन्दह्यमाने ताड्यमाने कुठारैः ।
कुलालदेवं श्मश्रुदंष्ट्रं च नेत्रं विहाय वै कुत्र पलायितोऽभूत् ॥ ९७ ॥

यदा पंचम्यां मृण्मयं शेषमूर्तिं संपूज्य भक्त्या विद्यमाने गृहे स्वे ।
तदा बद्ध्वा यमदूताश्च सम्यक् सन्नह्यमाने नागपाशैश्च बद्ध्वा ॥ ९८ ॥

स्वभक्तवर्यं प्रविहाय नागः पलायितः कुत्र वै संवद त्वम् ।
दर्वाङ्कुरैर्मोदकैः पूजयित्वा विनायकं पंचखाद्यैस्तथैव ॥ ९९ ॥

सन्तिष्ठमाने यमदूतैश्च सम्यक् सन्ताड्यमाने तप्तदण्डैश्च मूढ ।
दन्तं विहायैव च विघ्नराजः पलायितः कुत्र मे संवद त्वम् ॥ १०० ॥

विवाहकाले पिष्टदेवीं सुभक्त्या संपूजयित्वा विद्यमाने गृहे स्वे ।
यदा तदा यमदूतैश्च बद्ध्वा विष्ठाकूपे पात्यमाने च मूढ ॥ १०१ ॥

विष्ठादेवी पीड्यमानं च भक्तं विहाय सा कुत्र पलायिताऽभूत् ।
विवाहकाले रजकस्य गेहं गत्वा सम्यक् प्रार्थयित्वा च मूढ ॥ १०२ ॥

यत्स्तम्भसूत्रं कलशे परीत्य पूजां कृत्वा विद्यमाने गृहे स्वे ।
यदा तदा यमदूताः स्वभक्तं तत्स्तम्भसूत्रं तस्य मुखे निधाय ॥ १०३ ॥

सन्ताड्यमाने स्तम्भसूत्रस्य देवी पलायिता कुत्र मे संवद त्वम् ।
विवाहकाले पूजयित्वा च सम्यक् चण्डालदेवीं भक्तवर्यांश्च तस्याः ॥ १०४ ॥

तद्भक्तवर्यैः शूर्पमध्ये च नीरैः संसेचयित्वा विद्यमाने गृहे स्वे ।
यदा तदा यमदूताश्च बद्ध्वा सन्ताड्यमाने चर्मणा मूढबुद्धे ॥ १०५ ॥

चण्डालदेवी कुत्र पलायिता सा सुमूढबुद्धे विष्णुपादं भज त्वम् ।
ज्वरादिभिः पीड्यमाने च पुत्रे गृहे स्थितं ब्रह्मदेवं च सम्यक् ॥ १०६ ॥

धूपैर्दीपैर्भक्ष्यभोज्यैश्च पुष्पैः पूजां कृत्वा तिष्ठमाने गृहे स्वे ।
यदा तदा यमदूतैश्च बद्ध्वा सन्ताड्यमाने वेणुपाशादिभिश्च ॥ १०७॥

स ब्रह्मदेवः क्व पलायितोऽभूत् सुमूढबुद्धे विष्णुपादं भज त्वम् ।
सन्तानार्थं बृहतीं पूजयित्वा गले बद्ध्वा बृहतेर्वै फलं च ॥ १०८ ॥

सन्तिष्ठमाने यमदूताश्च बद्ध्वा सन्ताड्यमांने बृहती कण्टकैश्च ।
तदा देवी बृहती मूढबुद्धे पलायिता कुत्रौ मे तद्वद त्वम् ॥ १०९ ॥

भजस्व मूढ परमं च दैवतं नारायणं तारकं सर्वदुःखात् ।
संक्षुद्रदेवेषु मतिं च मा कुरु नच श्रुणु त्वं फल्गुवाक्यं तथैव ॥ ११० ॥

संक्षुद्रदेवान् भिन्दिपाले निधाय विसृज्य चैवं दूरदेशे महात्मन् ।
सन्दग्ध्य त्वं स्वकुलाचारधर्मान् संपातने नरके हेतुभूतान् ॥ १११ ॥

पुनीहि गात्रं सर्वदा मूढबुद्धे हरेः पादाब्जन्यतीर्थैः पवित्रैः ।
हृदि स्थितां चौर्यमुद्रां विहाय कृत्वा भूषां विष्णुमुद्राभिरग्र्याम् ॥ ११२ ॥

सदा मूढ हरिवार्तां भज त्वं ह्यायुर्गतं व्यर्थमेवं कुबुध्या ।
सद्वैष्णवानां संगमो दुर्लभश्च शुद्धं ज्ञानं तारतम्यस्वरूपम् ॥ ११३ ॥

हरिं गुरुं ह्यनुसृत्यैव नित्यं गतिं स्वीयां तेन जानीहि मूढ ।
दग्ध्वा दुष्टां बुद्धिमेवं च मूढ सुबुद्धिरूपं मां भज त्वं हि नित्यम् ॥ ११४ ॥

मया सार्धं सद्गुरुं प्राप्य सम्यग्वैराग्यपूर्वं तत्त्वजातं विदित्वा ।
तेनैव मोक्षं प्राप्नुहि भर्तृवर्य वायोर्लक्ष्म्याः संप्रसादाच्च विष्णोः ॥ ११५ ॥

इत्याशयं मनसा सन्निधाय तथा चोक्तं भक्तवर्यो मदीयः
अतो भक्तः प्रवहेत्येव संज्ञामवाप वीन्द्र प्रकृतं त्वं श्रुणुष्व ॥ ११६ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे तारतम्यनिरूपणद्वारा
विष्णोरेवोपास्यत्वमित्यर्थनिरूपणं नाम त्रिंशोऽध्यायः ॥ ३० ॥

॥ एकत्रिंशोऽध्यायः ॥

कृष्ण उवाच

प्रवहानन्तरान्वक्ष्ये श्रुणु पक्षीन्द्रसत्तम ।
यो धर्मो ब्रह्मणः पुत्रो ह्यादिसृष्टौ तदुद्भवः ॥ १ ॥

सज्जनान्सौम्यरूपेण धारणाद्धर्मनामकः ।
स एव सूर्यपुत्रोऽभूद्यमसंज्ञामवाप सः ॥ २ ॥

पापिनां शिक्षकत्वात्स यम इत्युच्यते बुधैः ।
यमलोके द्विरूपेण ह्यास्ते स हरिसेवकः ॥ ३ ॥

यमः संयमतामास्ते धर्तृणा धारकोऽपि च ।
चतुर्दशसु चेन्द्रेषु तृतीयेन्द्रः स सत्यजित् ॥ ४ ॥

यम एव स विज्ञेयः सत्यरूपाभिधं हरिम् ।
भक्त्या जितत्वाच्च खग सत्यजिन्नामकोऽभवत् ॥ ५ ॥

गरुड उवाच

कया भक्त्या च भगवन् जितवान् सत्यनामकम् ।
एतद्ब्रूहि महाभाग शिष्याय तव विस्तरात् ॥ ६ ॥

कृष्ण उवाच

यमश्च सत्यजिद्भूत्वा हरौ भक्तिं चकार सः ।
छित्वात्मदार सुतगेहपशुस्वकोशमुख्येषु मौक्तिकसुरत्नसुसर्ववस्तुषु ।

भक्तिं चकार परमस्य पदारविन्दे ब्रह्मादिभिर्हृदि धृते परमादरेण ।
लक्ष्म्या सदा परमभक्तिप्रवृद्धया च संलालिते भगवतश्चरणारविन्दे ॥ ८ ॥

वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्ये भागीरथीसुजनके च मलादिदूरे ।
श्रीविष्णुपादव्यतिरिक्तेषु नित्यं श्रीब्रह्मरुद्रादिपदादिकेषु ॥ ९ ॥

क्रमेण भक्तिं प्रचकार सत्यजित् ह्यापद्यपिनैव विवर्जितोऽसौ ।
स्वदेहसंस्थं पुरुषं पुराणं विचारयामास सदा स सत्यजित् ॥ १० ॥

इदं शरीरं परमास्वतन्त्रं ह्यन्ते च विड्भस्मसकीटसंज्ञितम् ।
यावच्छरीरे ह्यभिमानश्चकास्ति तावद्भयं संसरणं च तावत् ॥ ११ ॥

यावच्छरीरावयवेषु पुष्टिस्तावच्च संगो विषयेषु नित्यं ।
यावच्च संगो विषयेषु तावत् तावच्च कामो ह्यभिवर्धतेऽस्मिन् ॥ १२ ॥

संवर्धमानेषु च कामवृत्तिषु क्रोधस्तु नित्यं प्रविजायतेऽस्मिन् ।
संवर्धमाने क्रोधजाले शरीरे तस्मान्मोहो जायतेऽस्मिन् शरीरे ॥ १३ ॥

तस्मान्मोहाज्जायतेऽस्मिन् सरीरे स्मृतिभ्रंशो जायते वै शरीरे ।
स्मृतिभ्रंशाद्बुद्धिनाशो भवेद्धि बुद्धेर्नाशात् नश्यते विष्णुमार्गात् ॥ १४ ॥

अतोऽभिमानं वर्जयित्वा शरीरे पादारविन्दे भक्तिकामश्च विष्णोः ।
त्यक्त्वा देहे ह्यभिमानं च सत्यजिद्धृत्वा विष्णोर्हृदि पादारविन्दम् ॥ १५ ॥

तपश्चचार परमं चोत्तमं च संवत्सरं दिव्यसाहस्रमेव ।
सम्यक् तपो विघ्नविकर्तुकामा दुर्बुद्धिरूपा कलिभार्या समागात् ॥ १६ ॥

कामक्रोधौ लोभमोहौ मदश्च मात्सर्योऽपि कलिपुत्राश्च सर्वे ।
समागमंत्सत्यजितस्तपश्च सन्नाशितुं वीर्यबलोपपन्नाः ॥ १७ ॥

दुर्बुद्धिरूपा प्ररुरोद तस्मिन् गात्रे स्वपुत्रैश्च समन्विता सा ।
पते मदीयं वचनं श्रुणुष्व चास्मान् विसृज्यैव तपः करोषि ॥ १८ ॥

विष्णुस्तु ते किं प्रददाति सत्फलं तेनैव पूर्तिर्न च मे भवेद्धि ।
तवैव सङ्गं न करोमि नित्यं शौचादिकं ह्यसमर्था च कर्तुम् ॥ १९ ॥

न धौतवस्त्रं च वसामि नित्यं स्नानं सदा नैव करोमि मन्दा ।
निर्माल्यशेषं न विधारयामि भस्मादिकं चैव विधारयामि ॥ २० ॥

नैवेद्यशेषं तुलसीविमिश्रितं न वै भुंजे मूढपते सदाऽपि ।
मद्योग्यमन्नं पर्युषितं च भर्तुः सुतैलयुक्तं च पलांडुसंयुतम् ।। २१ ।।
विहाय चान्नं विष्णुपादारविन्दे कथं करोषि स्नेहमनुत्तमं च ।
सुतप्तमुद्रां न धारयिष्ये पृष्ठस्थकच्छं दन्तशुद्धिं च त्यक्ष्ये ।। २२ ।।
एकादशी नैव कर्तुं समर्था चैकादश्यां मैथुनं नैव त्यक्ष्ये ।
मदीयगात्रं सुकृशं चैव जातं पुत्रा मदीयाः सुकृशाश्च जाताः ।। २३ ।।
त्वदीयगेहे यदि नित्यं वसामि पुत्रैः साकं नाशमायामि मूढ ।
उदीर्य सा सत्यजितो गृहं तु त्यक्त्वा ययौ पुत्रगणैश्च साकम् ।। २४ ।।
यस्मिन् गृहे काम्यधर्माश्च नित्यं कुर्वन्ति तस्मिन् प्रविवेश पुत्रैः ।
तदागमत्सत्यजितो वरं च दातुं शचीशः स शिवेन चोदितः ।। २५ ।।
प्रलोभितं वरदानैश्च तं तु ह्यागत्य चोचे सत्यजितं महाप्रभुम् ।
उत्तिष्ठ धर्म त्वदभीष्टं वरं च वृणुष्व शीघ्रं मत्सकाशाच्च देव ।। २६ ।।
तदैव रुद्रोऽपि समागतश्च तदैव वायुश्च समागतोऽभूत् ।
इन्द्रस्य वाक्यं च तदैव श्रुत्वा ददर्श चाग्रे पुरुषत्रयं च ।। २७ ।।
के चैव यूयं वदत स्वरूपं इति श्रुतश्चेन्द्र ह्युवाच तं प्रभुम् ।
अहं चेन्द्रस्त्वपरस्तु रुद्रस्तृतीयोऽसौ परमो मातरिश्वा ।। २८ ।।
दास्यामि ते चाश्वगजादिकं च ह्यनर्घ्यरत्नं वस्त्रगृहादिकं च ।
इत्युक्तोऽसौ सत्यजिद्वै महात्मा ह्युवाच चेदं हरिपादं च स्मृत्वा ।। २९ ।।

सत्यजिदुवाच

कर्ता च सर्वजगतः परमो हरिस्तु
तेनैव दत्तमखिलं च सदैव भाग्यम् ।
कर्ता च चैव जगतः पुरुषाच्च भिन्नो जीवः
समस्तसुखदुःखफलादिकानाम् ।। ३० ।।

तस्मात्क्षमैव परमो भवतां च धर्मो दिष्टानुसारिफलदस्तु हरिश्चनम्यः ।
एवमुक्तो मघोनस्तु तूष्णीमास तदा खग ॥ ३१ ॥

समक्षं रुद्रदेवस्य मातरिश्वाऽब्रवीद्वचः ।

वायुरुवाच

भो धर्म विष्णुर्विश्वकर्ता च नित्यं स्वतन्त्रत्वात्सत्यमेवोक्तमङ्ग ॥ ३२ ॥

विष्णोरन्यः सर्वकर्ता च नैव तदीयत्वात्सर्वदा सूत्रवच्च ।
इदं त्वदीयं मन्मतं चैवमेवेत्येवं शश्वन्नैव कार्यात्र शंका ॥ ३३ ॥

यद्यप्येवं विष्णुरेव पृथिव्यां स्वतन्त्रत्वात्सर्वकर्ता तथापि ।
जीवस्यापि कर्तृता चास्ति देव न विष्णुवत्तदधीनत्वमस्ति ॥ ३४ ॥

तत्रापि वक्ष्ये तव युक्तिं महात्मन्नहरहः सन्ध्यामुपासीत नित्यम् ।
इत्यादिश्रुत्या विहितं कर्मजातं तत्तद्वर्णैः कार्यमस्योचितं च ॥ ३५ ॥

तत्तत्सर्वं कार्यमेवेह पुंसां निषिद्धमन्यत्त्याज्यमेवं च यत्नात् ।
यद्यप्यस्ति कर्तृता चैव विष्णोस्तथाप्यस्ति कर्तृता हर्यधीना ॥ ३६ ॥

जीवः सदा चेश्वराधीनकर्ता विधेर्निषेधस्य च गोचरत्वात् ।
जीवस्य कर्तृत्वमनेन प्राप्तं हरेरधर्मं च कथं ब्रवीषि ॥ ३७ ॥

तत्रापि वक्ष्ये श्रुणु धर्म परात्मन् जीवः सदापीश्वरप्रेरणायाः ।
अधीनयत्नोऽपि च कर्तृभावात् पराधीनां कर्तृतां स्वीकुरुष्व ॥ ३८ ॥

अतोऽन्यथा त्वं यदि मन्यसे च विधेर्निषेधस्य च को वदस्व ।
अतस्तयोर्निर्विषयत्वमेव स्याद्वा हरेर्वापि विषयत्वं सदा स्यात् ॥ ३९ ॥

पराधीना कर्तृता चास्ति जीवे सत्यं नित्यं त्वं विजानीहि धर्म ।
एतच्च कर्म पुरुषस्य नित्यं प्रत्यक्षसिद्धं च तथा प्रयत्नः ॥ ४० ॥

प्रत्यक्षसिद्धेन च कर्मणैव तेनानुमेया प्रेरणा केशवस्य ।
नांगीकरोषि प्रेरणां केशवस्य ह्यकारणादेव भवेच्च कार्यम् ॥ ४१ ॥

तस्माज्ज्ञानी विहितं चापि कर्म सदा कुर्वन् विष्णुना प्रेरितो हि ।
तेनैव विष्णोर्गतिमाप्नोति सम्यक् ज्ञानं लब्ध्वा कारणं दैवमेव ॥ ४२ ॥

मत्वा चेत्थं विहितं कर्मजातं हित्वा मत्वा कर्तृता नास्ति चेति ।
निरयं वापि तामसीं वै गतिं च प्राप्नोत्येवं नात्र विचार्यमस्ति ॥ ४३ ॥

विष्णोर्वशत्वं जीवसङ्घस्य नित्यं ज्ञातव्यं एवं नरकाद्भीरुणा च ।
कार्यत्वेन विहितं कर्मजातं स्वस्य स्वयं स्वेन कार्यमेव स्वयोग्यम् ॥ ४४ ॥

जीवस्य कर्तृत्वमथो हरेश्च ह्यवश्यमेतत् सुविजानीहि नित्यं ।
अंगीकार्यं ज्ञानसिध्यर्थमेव प्रामाणिकत्वाच्च सुधर्मराज ॥ ४५ ॥

जीवस्थिता कर्तृता सर्वदैषा करोमीति ह्यनुभूतेश्च सिद्धा ।
प्रत्यक्षसिद्दा ह्यत एषा च धर्म हीशाधीनत्वे चागमं त्वं श्रुणुष्व ॥ ४६ ॥

नान्योऽस्ति कर्ता स हि सर्वस्य कर्तेत्यादिरूपादीश्वराधीनता स्यात् ।
विमतं सर्वं चेश्वराधीनमेव सदा जन्यत्वाद् भृत्यवच्चैव राज्ञः ॥ ४७ ॥

सर्वस्य विश्वस्य हरेर्वशत्वं लिङ्गागमाभ्यां प्रमितं सदापि ।
प्रत्यक्षसिद्धं जीवकर्तत्वमेव चैतद्द्वयं नैव हेयं कदाचित् ॥ ४८ ॥

एवं विवेकी सर्वदा चैव जानन् कार्यं कर्म कुरुते वै तथैव ।
कार्यस्यास्य कर्मणः प्रेरकं च विष्णुं जानन् सर्वदा विष्णुबुद्ध्या ॥ ४९ ॥

एतादृशो ह्यधिकारस्थजीवो भवेत्प्रमाणत्रितयानुगुणी । *

प्रारब्धशेषं भोक्तुमेवं स धर्मः स एवाभूद्वायुयुक्तः खगेन्द्र ।
माण्डव्यशापाच्च यमो बभूव विद्यारतत्वाद्विदुरो नाम चासीत् ॥ ६१ ॥

य एवासीत्सत्यजिन्नाम धर्मः स एवाभूद्वायुयुक्तः खगेन्द्र ।
युधिष्ठिराख्यो विष्णुभक्तः पृथिव्यां भोक्तुं साम्राज्य सौम्यरूपेण चैव ॥ ६२ ॥
क्रोधादिरूपान् जेतुशीलोऽस्ति युद्धे ह्यतो युधिष्ठिरेत्येव संज्ञामवाप ॥ ६३ ॥

---

*मूलपुस्तके एतत्श्लोकानन्तरं विद्यमानाः श्लोकाः अतीव अस्पष्टाः अनन्विताश्च वर्तन्ते ।

एते हि वीन्द्रं चत्वार यम एव प्रकीर्तिताः ।
रामावतारे सूर्यसूनुः खगेन्द्र सुग्रीवाख्यो ब्रह्मयुक्तः स सूर्यः ॥ ६४ ॥
स एव सूर्यः पुनरेव भूम्यां कृष्णावतारे कर्णसंज्ञो बभूव ।
विष्णोः सदा सन्निधानाच्च वीन्द्र महाबली चास्त्रवेत्ता बभूव ॥ ६५ ॥
एवं द्विरूपः सूर्य एवेति नित्यं विजानीयात्तत्र भक्तिश्च कार्या ।
रामावतारे योऽङ्गदो वालिपुत्र इन्द्राविष्टो रामभक्तो महात्मा ॥ ६६ ॥
स्वायंभुवाख्यस्य मनोश्च पत्नी शतरूपाख्या विष्णुभक्ता सदैव ।
चत्वार एते प्रवहात्सदैव द्विगुणाधमा विष्णुभक्ताः सदैव ॥ ६७ ॥
ततस्तु वरुणो देवः सूर्यादीनामनन्तरः ।
वरुणावताराश्चत्वारः मण्डूको वसुषेणकः ॥ ६८ ॥
महाभिषक् शन्तनुश्च क्रमेणैवाभवन् भुवि ।
मण्डूकरूपी वरुणस्तुष्टाव हरिमव्ययम् ॥ ६९ ॥
चतुर्धावस्थितं देहे श्रुणु रूपचतुष्टयम् ।
विश्वं च तैजसं प्राज्ञं तुरीयं च चतुष्टयम् ॥ ७० ॥
दक्षिणास्थिस्थितो विश्वः जीवजाग्रत्प्रदः सदा ।
पूर्णत्वात् विश्वसंज्ञोऽसौ तैजसश्चापि स स्मृतः ॥ ७१ ॥
दक्षिणाक्षिस्थितो वायुर्दक्षिणाक्षिस्थितं हरिम् ।
वामाक्षिसंस्थितां लक्ष्मीं दक्षिणांसे निधाय च ॥ ७२ ॥
दक्षिणाक्षिस्थितं जीवं दीपवच्च प्रकाशकम् ।
वामस्कन्दे निधायैव कण्ठदेशो स्थितं हरिम् ॥ ७३ ॥
तैजसाख्यं ययौ धीमान् तदधीनं करोत्यसौ ।
तैजसो वायुना सार्धं जीवस्यैव प्रदर्शयन् ॥ ७४ ॥
स्वप्नांश्च वासनाजन्यान् पदार्थांश्च विधाय च ।
ततो वायुश्च तं जीवं कण्ठस्थं तैजसं विभुम् ॥ ७५ ॥

पूर्ववत्स्कन्धमारोप्य प्रययौ हृदि संस्थितम् ।
प्राज्ञाख्यं परमात्मानं तत्समीपे निधाय च ॥ ७६ ॥

प्राज्ञस्यालिङ्गनं चैव यदा जीवः करोति च
तदा वायुर्हरिं ध्याति सुप्तो भूर्भूरिति प्रभुम् ॥ ७७ ॥

सुप्त इत्युच्यते जीवो ह्यभूरित्यसुराः स्मृताः ।
तुरीयोऽपि हरिवार्योदक्षिणस्कन्धमारुहत् ॥ ७८ ॥

जीवस्तु सव्यस्कन्धं तु तदा जीवं मृतं विदुः ।
चतुर्धावस्थितं देहे मण्डूको ह्यस्तुवन् हरिम् ॥ ७९ ॥

मण्डं सूक्ष्मं तु विज्ञेयं उ इत्युत्कृष्टवाचकम् ।
कस्तु मस्तकवाची स्यात् कं सुखं च समीरितम् ॥ ८० ॥

सूक्ष्मोत्कृष्टमस्तकत्वान्मण्डूक इति स स्मृतः ।
ब्रह्मशापात्तु वरुणो महाभिषगभूद्भुवि ॥ ८१ ॥

इलायां च नृपो भूत्वा हरिं नारायणाभिधम् ।
महाभिषेकविधिना पूजयामास सोऽब्धिपः ॥ ८२ ॥

अतो महाभिषङ्नाम प्राप भूम्यां खगाधिप ।
स एव शन्तनुर्नाम बभूव पृथिवीतले ॥ ८४ ॥

रामावतारे वरुणः सुषेणोऽभूच्च वानरः ।
रामकार्यस्य सिध्यर्थं रामभक्तो बभूव ह ॥ ८५ ॥

सुपूर्णसद्गुणे विष्णौ चेष्टते सर्वदा यतः ।
अतः सुषेणनामासौ वरुणः परिकीर्तितः ॥ ८६ ॥

पादपादार्धतो हीनः यमादिभ्यः खगाधिप ।
तदनन्तरजान् वक्ष्ये श्रुणु काश्यपसत्तम ॥ ८७ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे अंशावतरणपूर्वक तारतम्यकथनं नाम एकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ द्वात्रिंशोऽध्यायः ॥

श्रीकृष्ण उवाच

यो ब्रह्मणोऽंगादभवत्स नारदः प्रारब्धभोगं जन्म शूद्रत्वमाप ।
यो मुक्तियोग्यान् नित्यसंसारिणश्च तमोयोग्यान् सुखदुःख च मध्यं ॥ १ ॥

ददाति यस्मान्नारदाख्यां समाप सेवा हरेर्ह्ययमेवं सदैव ।
नरसम्बन्धात् ज्ञानमाहुर्महान्तो योग्यस्य जीवस्य ददाति नित्यम् ॥ २ ॥

अतो ह्यसौ ब्रह्मपुत्रो महात्मा संज्ञां वीन्द्र नारदेति ह्यवाप ।
यदा गतः संयमनीं च द्रष्टुं तत्र स्थितान् ददृशे मुक्तियोग्यान् ॥ ३ ॥

अवैष्णवान् सङ्गदोषेण वीन्द्र चैकादश्यां भोजनं कुर्वतश्च ।
एतादृशान्वदने सन्निधाय ह्ययोरसे तप्तरूपांश्च जीवान् ॥ ४ ॥

दृष्ट्वा दृष्ट्वा मोक्षयोग्यांश्च जीवान् हा हा कृत्वा प्रययावग्रतश्च ।
तत्रापि जीवान् पापिनां सङ्गिसङ्गात् सद्वैष्णवानां दूषमाणान् हरेश्च ॥ ५ ॥

शिलातले प्रविधायैव जिह्वां सन्ताड्यमानान् मुसलैर्गण्डग्राव्णैः ।
यो वैष्णवान् क्रूरबुध्या च क्रोधात्संपश्यतां वीन्द्र चक्षुःसु तन्त्रम् ॥ ६ ॥

सन्तप्तसूचीः पूरयित्वा च बद्ध्वा सन्ताड्यमानान् ददृशे पापसंघान् ।
कांश्चित्तत्रापश्यन्नारदस्तु वेश्यादासीसंगमे चैव सक्तान् ॥ ७ ॥

तेषां शिश्नं वृषणं गण्डशैले सन्ताड्यमानान् मुसलैश्चूर्णयित्वा ।
अन्यत्राऽपि ददृशे नारदस्तु संछिद्यमानान् क्रकचैर्द्वेषयुक्तान् ॥ ८ ॥

मातापितॄन् द्रुह्यमाणांश्च वीन्द्र सुतैलवस्त्रैर्वेष्टयित्वा च दहतः ।
अधारितं तप्तमुद्राश्च एभिः सन्ताड्यमानांश्च तथा शिलोल्मुखैः ॥ ९ ॥

अन्यत्र चैवं ददृशे नारदस्तु गुरुद्रुहः परिघैस्ताड्यमानान् ।
ये दम्पत्योर्विरसं चक्रुरेवं सन्दह्यमानान् किंकरैर्विस्फुलिङ्गैः ॥ १० ॥

अनर्पितानां भोजिनो वै नरांश्च सन्तप्तशैले दह्यमानांश्च सम्यक् ।
तेषां जिह्वा तैलयन्त्रे निधाय संपीड्यमानान् ददृशे तान्मुनीन्द्राः ॥ ११ ॥

ये भक्तिपूर्वेण हरेश्च तीर्थं न स्वीचक्रुः पावके दग्धगात्राः ।
यैर्भोजनानन्तरमर्पितं हरेस्तुलसीपत्रं भक्षितं नैव तांश्च ।

सन्दह्यमानांश्च यमस्य लोके परिघैस्तप्तैर्मुद्गरैश्चापि नित्यम् ॥
शालग्रामस्पर्शहीनान्नरांश्च कुम्भीपाके दह्यमानान् ददर्श ।
अश्रुण्वतां हरिवार्तां सदैव ह्यसीपत्रे छिद्यमानांश्च देहान् ॥ १४ ॥

महामन्त्रान् प्रविहायैव नित्यं जपन्तस्तानन्यदेवस्य मन्त्रान् ।
तेषां जिह्वा छेदयित्वाऽतिघोरं संपीड्यमानान् ददृशे*नारदस्तु ॥ १५ ॥

एकैकानामाऽपि च पापसंघान् दहेद्धि वै भक्तिपूर्वं स्मृतं हि।
नाम्नां विष्णोर्गरणं नैव पुंसा समस्ततीर्थैर्बहुभिर्व्रतैश्च किम् ॥ १६ ॥

सर्वत्र देशे सर्वकालेषु तेषाममङ्गलं नास्ति नास्त्येव नित्यं ।
सर्वाणि नामानि च यौगिकानि गूढानि विष्णोः पठितानि वेदैः ॥ १७ ॥

तान्येव नामानि गृह्णाति चात्र संमोचितुं यमपाशाच्च पापात् ।
एवमेव हि शब्दाश्च प्रसिद्धिरपि लौकिकी ॥ १८ ॥

वाचकत्वं प्रधानस्य त्वितरस्य तदन्वयात् ।
विष्णावेव प्रसिद्धानि नामान्येव ह्यगायत ॥ १९ ॥

नृसिंह नारायण वासुदेव गोविन्द विष्णोऽच्युत माधवेति ।
हरे मुकुन्द श्रीधर श्रीनिवास दामोदरः पद्मनाभो वटुश्च ॥ २० ॥

कूर्मो झषः शिंशुमारो वराहो धन्वन्तरिः कृष्णरामस्तु कृष्णः ।
नामानि विष्णोश्च प्रगायमाने विंशच्च संख्यानि मुनीश्वरेण ॥ २१ ॥

---

*ददर्श इत्यर्थः ।

श्रुत्वा च सर्वे यातने (नारके) पच्यमाना मुक्ता ययुर्मन्दिरं वै मुरारेः ।
यमपाशविमुक्ता ये सर्वे ते ह्यधिकारिणः ॥ २२ ॥

उत्तमास्ते विजानीयात्संगदोषेण[1] पापिनः ।
यातनस्थाश्च सर्वेऽपि न मुक्ता यमपाशतः ॥ २३ ॥

अभक्त्या श्रुण्वतां नाम पापनिर्हरणाय वै ।
समर्था न भवत्येव यतो ह्यनधिकारिणः ॥ २४ ॥

भक्तेन पठितं नाम ह्यभक्तेन श्रुतं यदि ।
पापनिर्हरणे नैव समर्थो भवति ध्रुवम् ॥ २५ ॥

विपरीतज्ञानजनकं भवत्येव न संशयः ।
फलं च विपरीतं स्यान्नात्र कार्या विचारणा ॥ २६ ॥

भक्तेन पठितं नाम नित्यसंसारिणा श्रुतम् ।
सन्देहज्ञानजनकं तथा मिश्रफलप्रदम् ॥ २७ ॥

हरिभक्तेन मौढ्यादि तामसानां च मिश्रिणाम् ।
गतिर्भविष्यतीत्येवं बुध्या भक्त्या च वै खग ॥ २८ ॥

सम्यक् सुपठितं नाम दुःखदायि न संशयः ।
अभक्तपठितं नाम भक्तेन तु श्रुतं यदि ॥ २९ ॥

दुःखं सुबहुलं वीन्द्र नरको भुज्यते तदा ।
अभक्तपठितं नाम ह्यभक्तपठिता कथा ॥ ३० ॥

अभक्तपठिता वेदा अभक्तपठिता स्तुतिः ।
अभक्तपठितं मन्त्रं अभक्तपठितं वचः ॥ ३१ ॥

अभक्तपक्वं चान्नं हि हरिभक्तस्य वै खग ।
इहलोके यातने च महादुःखप्रदो भवेत् ॥ ३२ ॥

सुगायनमभक्तैश्च पठितं दुःखदं भवेत् ।
अवैष्णवकृतं दानं हरिभक्तस्य दुःखदम् ॥ ३३ ॥

अभक्तैश्च कृतं तीर्थं हरिभक्तस्य दुःखदम् ।
अवैष्णवकुलोत्पन्ना कन्या ग्राह्या तु वैष्णवैः ॥ ३४ ॥

दोषो नास्ति ग्रहीतृणां यदि सा तूत्तमा भवेत् ।
शालग्रामशिलादानमवैष्णवकृतं खग ॥ ३५ ॥

दोषो नास्त्येव तद्दानाद् वैष्णवानां खगेश्वर ।
अभक्तैश्चाहृतं पुष्पं तुलसीं च खगेश्वर ॥ ३६ ॥

महद्दुःखं भवेत्तेन भक्तस्यापि न संशयः ।
कन्यादानं वैष्णवैस्तु नाभक्ताय खगेश्वर ॥ ३७ ॥

सर्वथा नैव दातव्यं ह्यापद्यपि महामते ।
वराभावे यदि खग सभार्याय प्रदापयेत् ॥ ३८ ॥

तदभावे यदि खग श्रीनिवासाय वा ददेत् ।
नावैष्णवाय दातव्यं कन्यादानं तु सर्वथा ॥ ३९ ॥

कन्यां कनकसंपन्नां कनकाभरणभूषिताम् ।
दास्यांमि विष्णुभक्ताय विष्णुलोकजिगीषया ॥ ४० ॥

विक्रीणित्वा यो ददाति स्वकन्यां स पापात्मा सत्कुलीनोऽपि वीन्द्र ।
विंशत्कुलैः सार्धमेवं खगेन्द्र स मज्जति पूयशोणादिरूपे ॥ ४१ ॥

अतो नैव विक्रयं वै सुतायाः कुर्यादेवं कन्यकादानमेव ।
देयं रौप्यं वस्त्रजाम्बूनदं च वाचा यस्तु याचते मूढबुध्द्या ॥ ४२ ॥

कन्याक्रयीत्येवमाहुर्महान्तः द्रव्य तदर्थं याचते सोऽपि तद्वत् ।
सुदुर्घटं वैष्णवैः श्रोत्रियाय कन्यादानं करणं चाहुरार्याः ॥ ४३ ॥

सुभूषणैर्भूषिता कन्यका च देया वीन्द्र श्रोत्रियाय द्विजाय ।
कन्याक्रयी गोक्रयी विष्णुमूर्तेस्तथा शिलाया गण्डिकायाः क्रयी च ॥ ४४ ॥

पुण्यस्यापि पुस्तकस्यापि वीन्द्र तथा वेदानां विक्रयी सप्त चैते ।
चण्डालसंज्ञा ग्राममध्ये खगेन्द्र ह्येषां गतिर्नैव जाने खगेन्द्र ॥ ४५ ॥

अतस्तु नारदश्चापि मोक्षस्यैवाधिकारिणः ।
समुद्धर्तुं तदा सम्यग् हरिनामान्यगायत ॥ ४६ ॥

यश्चाध्यायमिमं पुण्यं श्रुणोति श्रद्धयान्वितः ।
स याति परमं लोकं प्रसादान्नारदस्य च ॥ ४७ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे पुण्यपापविचारकथनं

नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

॥ त्रयस्त्रिंशोऽध्यायः ॥

यो वह्निरासीत्पूर्वसर्गे खगेन्द्र वागिन्द्रियाद्ब्रह्मणः संप्रसूतः ।
स एवाग्निः संबभूव पृथिव्यां रामावतारे वानरो नीलसंज्ञः ॥ १ ॥

सुनीलवर्णान्नीलसंज्ञामवाप निलीयते हृदि विष्णुर्ह्यतो वा ।
स एवाग्नी रामपुत्रो बभूव लवेति संज्ञामभवच्च वीन्द्र ॥ २ ॥

लेलिह्यते सर्वदा रामनाम ह्यतश्चासौ लव इत्येव संज्ञाम् ।
स एवाग्निर्द्रुपदस्यैव राज्ञः सत्कुण्डमध्यादुत्थितः कृष्णभक्तः ॥ ३ ॥

धृष्टत्वरूपाद्योतनत्वाच्च वीन्द्र धृष्टद्युम्नेत्येव संज्ञामवाप ।
नीलो लवो द्रुपदस्यापि पुत्रो ह्येते त्रयश्चाग्निरेवेति विद्धि ॥ ४ ॥

यो जरानामको व्याधः स भृगुः पक्षिसत्तम ।
पादप्रहारदोषेण जराग्रस्तो बभूव ह ॥ ५ ॥

अतो जरानामकोऽभूत् कृष्णस्य वधकाम्यया ।
भृशं शीघ्रं समुद्दिष्टं गतिर्गमनमुच्यते ॥ ६ ॥

कार्यार्थं त्वरया याति ह्यतो भृगुरुदीरितः ।
पुरा भृगुर्वरुणस्यैव पुत्रः जगाम द्रष्टुं वृत्रहणं शचीपतिम् ॥ ७ ॥

तदा भृगुर्ददृशे विष्णुभक्तं शचीपतिं नारदाद्यैश्च युक्तम् ।
नमस्कारं तस्यकृत्वा खगेन्द्र तत्रोपविष्टे ह्यासने वारुणिस्तु ॥ ८ ॥

तस्यां सभायां देवतानामृषीणां विवादोऽभूद्धरिसर्वोत्तमत्वे ।
केचिच्चाहू रुद्रदेवस्य श्रैष्ठ्यं अन्ये चाहुर्ब्रह्मणो श्रेष्ठतां च ॥ ९ ॥

केचिच्चाहुर्विष्णुरेवेति तत्र ह्येवं विवादश्च बभूव तत्र ।
इन्द्रादयो देवसंघाश्च सर्वे ऋष्यादयो नारदाद्याश्च वीन्द्र ॥ १० ॥

विचार्य सर्वे च भृगोः समक्षं संप्रेषणं चैव चक्रुस्तदर्थे ।
ब्रह्मादिषु त्रिषु मध्ये सदाऽपि को वा श्रेष्ठः कोऽधमः कश्च मध्यः ॥ ११ ॥

निर्णेतुं हि वारुणिर्वै महात्मा ययौ कैलासं प्रथमं शीघ्रमेव ।
तत्र स्थितं भूतसंघैश्च साकं तथा पार्वत्या मर्मवाक्यैर्हसन्तम् ॥ १२ ॥

दृष्ट्वोवाच रुद्रदेवं खगेन्द्र लज्जा नास्ति तव कथं महेश ।
लज्जां विहायैव कथं विनोदं करोषि पत्न्या सह लोकमध्ये ॥ १३ ॥

स चैवमुक्तो भगवान्महेशः सुक्रोधदीप्तो ह्यभवत् क्षणेन ।
त्रिशूलमुद्यम्य हि हन्तुमेव ययौ च शीघ्रं च पिशाचनाथः ॥ १४ ॥

तदा च देवी पार्वती रुद्रदेवं हस्ते गृहीत्वा तमुवाच देवी ।
अयं भृगुर्ब्राह्मणो विष्णुभक्तो न हन्तव्यः क्रोधबुध्या महात्मन् ॥ १५ ॥

सद्ब्राह्मणान् पाति विष्णुः सदैव नारायणः सर्वजगन्निवासः ।
क्रोधः सर्वहरः शत्रुः क्रोधश्चाण्डाल उच्यते ॥ १६ ॥

तत्रापि ब्राह्मणे क्रोधः समूलं हि विनश्यति ।
तत्रापि श्रोत्रिये क्रोधः समूलं हि विनश्यति ॥ १७ ॥

तस्मात्क्रोधो न कर्तव्यो ब्राह्मणे गोषु सर्वथा ।
एवमुक्तः स रुद्रस्तु पार्वत्या च स्वभार्यया ॥ १८ ॥

क्रोधं त्यक्त्वा सस्वजे च ह्युपविश्य महामतिः ।
रुद्रस्वरूपं ज्ञात्वा स जगाम ब्रह्मणो गृहम् ॥ १९ ॥

ब्रह्माणं ददृशे तत्र सरस्वत्या समन्वितम् ।
तं दृष्ट्वा च भृगुः प्राह नालोक्यं ते मुखं सदा ॥ २० ॥

यतः पंचमुखच्छेदादङ्गहीनोऽसि सर्वथा ।
एवमुक्तस्तु भृगुणा क्रोधाद्धन्तुं समाययौ ॥ २१ ॥

न क्रोधार्होऽपि क्रोधीव दर्शयामास वै विधिः ।
विष्णुः सर्वोत्तमो देव इति दर्शयितुं प्रभुः ॥ २२ ॥

अतः क्रोधादयो दोषा नै चिन्त्या अजे गुरौ ।
ब्रह्मापि शमयामास स्वक्रोधं स्वेन तेजसा ॥ २३ ॥

तदा जगाम वैकुण्ठं द्रष्टुं नारायणं प्रभुम् ।
तदा नारायणो देवो जानन्नप्याशयं भृगोः ॥ २४ ॥

शिश्ये स सुप्तिहीनोऽपि वक्ष ऊर्ध्वं विधाय च ।
तदा भृगुः समागत्य पदा वक्षस्यताडयत् ॥ २५ ॥

भृगुणा ताडितो विष्णुरुत्थाय ददृशे भृगुम् ।
पादसंवहनं चक्रे स्वाङ्कमारोप्य तस्य वै ॥ २६ ॥

वीजयामास व्यजनं लक्ष्मीः बुद्ध्यनुसारिणी ।
भृगुपादस्थितान् पांसून् लिलिम्पे स्वमुखे हरिः ॥ २७ ॥

भृगोः पादं संगृहीत्वा मस्तके ह्यक्ष्णयोर्हृदि ।
निधाय प्रार्थयामास चोवाच मधुसूदनः ॥ २८ ॥

विष्णुरुवाच

श्रुणु लक्ष्मि ब्राह्मणानां महिमा पापनाशकः ।
श्रवणादेव मे प्रीतिर्भवत्येव न संशयः ॥ २९ ॥

समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥ ३० ॥

आपद्घनध्वान्तसहस्रभानवः समीहितार्थार्पणकामधेनवः ।
समस्ततीर्थाम्बुपवित्रमूर्तयो रक्षन्तु मां ब्राह्मणपादपांसवः ॥ ३१ ॥

विप्रौघदर्शनात्क्षिप्रं क्षीयन्ते पापराशयः ।
वन्दनान्मङ्गलावाप्तिरर्चनादच्युतं पदम् ॥ ३२ ॥

आधिव्याधिहरं नृणां मृत्युदारिद्र्यनाशनम् ।
श्रीपुष्टिकीर्तिदं वन्दे विप्रश्रीपादपङ्कजम् ॥ ३३ ॥

मया दृष्टो भृगुवर्यस्य पादो मया स्पृष्टं पादपद्मं द्विजस्य ।
अद्यैवाहं कृतकृत्योऽस्मि भद्रे ह्यद्यैवेह सर्वतीर्थावगाहः ॥ ३४ ॥

कृतो देवि मम गात्रं तु भद्रे सुपावितं ब्राह्मणपादस्पर्शात् ।
अद्यैव मे वसतयः पाविताश्च ह्यद्यैव त्वं भागवती च सुपावितासि ॥ ३५ ॥

नाहं बिभेमि सर्वथा ह्यम्भ्रणेश्च मायाबलाद् ब्रह्मदण्डाद्बिभेमि ।
नाहं बिभेमि शूलपाणेश्च शूलान्नाहं बिभेमि सुरराजस्य वज्रात् ॥ ३६ ॥

नाहं बिभेमि यमदण्डाच्च सुभ्रु नाहं बिभेमि वरुणस्य पाशात् ।
नाग्न्यर्कसोमानिलवित्तपास्त्रात् शंके भृशं ब्रह्मकुलावमानात् ॥ ३७ ॥

यथा मया मानिता ब्राह्मणाश्च तथा सर्वैर्माननीया हि नित्यं ।
एवं धर्मान् प्रथयितुं भक्तवर्गे न मेऽस्ति किंचित्तेन कृत्यं च देवि ॥ ३८ ॥

एवं चोक्त्वा देवदेवश्च विष्णुर्भृगुं प्राह धर्मसेतुर्महात्मा ।
भृगो पदं ते कोमलं पूतरूपं वक्षो मदीयमतिकाठिण्यरूपम् ॥ ३९ ॥

मदीयवक्षस्ताडनात्ते पदे च ह्यतीव दुःखं प्रापिते ह्यद्य सुष्ठु ।
ममापराधं क्षम्यतां विप्रवर्य ह्युक्त्वा चैव प्रणनामातिभक्त्या ॥ ४० ॥

ततो भृगुः प्रययौ व्रीडितश्च श्रीवत्सेति लक्ष्म विष्णोश्च जातम् ।
गत्वा भृगुः शम्बरारेः सभायामुवाच चेन्द्रं ऋषिदेवैर्युतं च ॥ ४१ ॥

सर्वोत्तमो विष्णुरेवेति नित्यं तस्मात्पश्चात् ब्रह्मवायू सदैव ।
तस्माद्रुद्रः क्रोधसंवर्जितात्मा ह्यतो हरेः सदृशः कोऽपि नास्ति ॥ ४२ ॥

यदा पूर्वं त्र्यम्बकस्य समीपं गत्वैवोचे मर्मभूतं च वाक्यम् ।
श्रुत्वा सोऽपि क्रोधसंवर्धितात्मा त्रिशूलेन हन्तुमभ्यागतो हि ॥ ४३ ॥

तदा देवी पार्वती तस्य क्रोधं संशान्तयामास च सान्त्वनेन ।
अतो रुद्रो ह्यधमः सर्वदैव निर्णीतं हि नात्र विचार्यमस्ति ॥ ४४ ॥

पश्चादहं ब्रह्मसमीपमेव गत्वैवोचे नर्मभूतं च वाक्यम् ।
मदीयवाक्यश्रवणादेव सोऽपि क्रोधाद्धन्तुमुदतिष्ठत्सभायाम् ॥ ४५ ॥

क्रोधं स्वकीयं स्वयमेव तावत्संशान्तयामास ततः स मध्यमः ।
ततः पश्चाद्विष्णुसामीप्यमेव गत्वा विष्णोर्वक्षसि ताडितं मया ॥ ४६ ॥

सन्ताडितश्चापि पदा स देवः विहाय क्रोधं विष्णुदेवो महात्मा ।
मां सान्त्वयित्वा च ततो हरिस्तु सर्वोत्तमेति निश्चितं वै मयैव ॥ ४७ ॥

तदा देवा वारुणेर्वाक्यसंघात् सर्वोत्तमत्वं निश्चयांचक्रुरेवं ।
पादप्रहाराद्दोषयुक्तो भृगुस्तु जरानाम व्याधसंज्ञो बभूव ॥ ४८ ॥

कृष्णावतारे कृष्णपुत्रं च साम्बं सुगुर्विणीवच्चक्रुरेवं कुमाराः ।
तत्रागतान् द्विजवर्यांश्च तेऽपि पृष्ट्वा सर्वेऽवंचयन् ब्राह्मणांश्च ॥ ४९ ॥

गर्भिण्येषा भवतः प्रष्टुमेव विलज्जति ब्रूत वै विप्रवर्याः ।
गर्भस्थपुत्रविषये विमतिं च तेऽपि तदैवोचुः प्रेरिता विष्णुनैव ॥ ५० ॥

इयं कन्या मुसलं खण्डभूतं प्रसूत एवात्र न विचारणा हि ।
तेनैव सर्वं यादवानां कुलं च विनाशमायाति न संशयोऽत्र ॥ ५१ ॥

तदा कुमारा मोचयित्वा च वस्त्रं ददृशुश्च सर्वे मुसलं खण्डभूतम् ।
वित्वा तदा सर्वकुमारकाश्च सुदुःखयुक्ताश्चोग्रसेनाय चोचुः ॥ ५२ ॥

तदोग्रसेनश्चिन्तयित्वा खगेन्द्र पिष्टं कृत्वा प्राक्षिपद्वै समुद्रे ।
मुखस्थितं चायसं घर्षयित्वा तलेषु शिष्टं प्राक्षिपन् वै समुद्रे ॥ ५३ ॥

मत्स्योऽग्रसच्चायसं तस्य पिष्टं तरङ्गाश्च प्राक्षिपन् तस्य तीरे ।
ऐरं जातं नाशने यादवानां जराव्याधो जगृहे तं च मत्स्यम् ॥ ५४ ॥

तत्कुक्षिस्थं चायसं तीक्ष्णभूतं संरोपयामास शरस्य चाग्रे ।
अतो जराख्यो व्याधरूपी खगेन्द्र भृगोः स्वरूपं हि विदुर्महान्तः ॥ ५५ ॥

या सा प्रसूतिर्भृगुभार्या खगेन्द्र प्रकर्षेण सूतिकर्त्री सुतानाम् ।
अतः प्रसूतिसंज्ञका सा बभूव हरेर्भक्ता भक्तवर्यस्य दासा ॥ ५६ ॥

वह्निः प्रसूतिर्भृगुरेते त्रयश्च पादोनभूता वरुणादेव वीन्द्र ।
एते त्रयः प्रवहादेव नित्यं द्विगुणाधमा नात्र विचार्यमस्ति ॥ ५७ ॥

तथा मित्राद्विगुणाच्चाधिका च शतावरा दक्षसंज्ञा खगेन्द्र ।
भृग्वादीनां यः स्वरूपं श्रुणोति तेषां प्रसादाज्ज्ञानमाप्यैव विष्णोः ॥ ५८ ॥

मोक्षं याति नात्र विचार्यमस्ति प्रीणाति नित्यं श्रीनिवासोऽपि तस्य ।

इति श्रीगरुडपुराणे ब्रह्मकाण्डे भृगुचरित्रकथनं

नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

॥ चतुस्त्रिंशोऽध्यायः ॥

विश्वामित्रो गाधिपुत्रो मनीषी विश्वस्य मित्रादाप संज्ञां खगेन्द्र ।
विश्वं सर्वं ब्रह्मणा निर्मितं च मिनोति निर्माणसुत्राणनं च ॥ १ ॥
अतो विश्वामित्र इत्येव संज्ञामवाप लोके विष्णुभक्तो हि नित्यम् ।
यो वा वसिष्ठो ब्रह्मपुत्रः खगेन्द्र प्राणाज्जातो ब्रह्मणो विष्णुभक्तः ॥ २ ॥
इष्टं विष्णुं स्ववशे यः करोति ह्यतो वसिष्ठेति बभूव वीन्द्र ।
मरीचिर्मानसः पुत्रो ब्रह्मणः परमेष्ठिनः ॥ ३ ॥
मरीचयो ज्ञानरूपाः खगेन्द्र यस्यास्यद्वाराद्गलन्तीत्येव दृष्ट्वा ।
अतो मरीचिर्वामतोऽभूत्खगेन्द्र भक्तः सदा हरिपादारविन्दे ॥ ४ ॥
विरिंचाक्ष्णोरभवच्चात्रिसंज्ञो आनन्दरूपो विष्णुरेनं सदैव ।
त्राति ह्यस्मादत्रिसंज्ञो बभूव गाथां तदीयां श्रुणु वीन्द्र भक्त्या ॥ ५ ॥
पुरा ह्यत्रिं जनयित्वा विरिंचिस्तस्मिन्नेव प्रविहायैव यातः ।
तदा ह्यत्रिर्मनसा विष्णुमेव संचिन्तयामास श्रियः पतिं गुरुम् ॥ ६ ॥
तस्मिन् दिने जनितं वै मुनिं च सम्यक् द्रष्टुं चाययुर्वायुमुख्याः ।
इन्द्रादयोऽप्यागतास्तं च द्रष्टुं बालः कथं जीवति चैक एव ॥ ७ ॥
आदौ चेन्द्रः कृपया तं च बालं वने स्थितं सिहव्याघ्रादियुक्ते ।
उवाच बालं रक्षकस्तेऽद्य को वा कथं कुरुषे जीवयात्रां वनेऽस्मिन् ॥ ८ ॥
महादरिद्रोऽसि सुजन्मकाले मातापितृभ्यां त्याजितश्चैव बाल ।
स चैवमुक्तो वज्रिणां ब्रह्मपुत्रो ह्युवाच देवं वचनं चार्यवच्च ॥ ९ ॥

बाल उवाच

मम त्राता चान्य एवास्ति नित्यं काले काले ह्यन्नपानादिकं च ।
अन्तर्व्याप्तो विष्णुरेवेह नित्यं स चैव मां त्वां च रुद्रादिकानाम् ॥ १० ॥
विष्णोर्दया यदि गच्छेन्मयीश तदा मरिष्ये नात्र विचार्यमस्ति ।
वनेषु सुप्तं दिष्टरूपो हरिस्तु संरक्षति व्याघ्रऋक्षादिकेभ्यः ॥ ११ ॥

गृहेषु सुप्तं पुत्रमित्रादिकैश्च तन्मध्य, एकं संगृहीत्वैव याति ।
शचीशातः सर्वदा वै मुरारिर्ब्रह्मादिकान् चेतनाचेतनांश्च ॥ १२ ॥

क्षणे क्षणे रक्षति नाशकश्च ह्यस्वातन्त्र्याद्विष्णुरन्योऽस्ति को वा ।
अहं महाभागवतो हि बालः सुच्छत्रभूतो हरिरास्ते पिता मे ॥ १३ ॥

वयोगतस्यापि शचीपते तव न सन्ति पित्रादय एव सुष्ठु ।
अतो दरिद्रस्तु त्वमेव नित्यं यतो न जानासि श्रियःपतिं हरिम् ॥ १४ ॥

कर्मानुसारेण पुरार्जितेन योग्यानुसारेण ममास्ति भाग्यं ।
योग्यानुसारेण तवास्ति भाग्यं भाग्यं तु भक्त्यादिकमेव मुख्यम् ॥ १५ ॥

माता च विष्णुश्च पिता हरिस्तु सखा च कृष्णो बान्धवो वामनश्च ।
व्यासो गुरुः श्रीनिवासस्तु मित्रं नारायणः कुलदेवः सदाऽपि ॥ १६ ॥

आचार्यभूतो यज्ञनामा हरिस्तु दानादिरूपो जामदग्न्यस्तु रामः ।
धन्वन्तरी रक्षको मां त्वपथ्याद् मार्गे वराहो रक्षकः सर्वदैव ॥ १७ ॥

वनेषु नित्यं रक्षको नारसिंहः विदिक्षु दिक्षूर्ध्वमधः समन्तात् ।
बालेन्द्रयोः कुर्वतोश्चैवमित्थं परस्परं हरितत्त्वे विवादम् ॥ १८ ॥

कालो गतो वत्सरार्धः खगेन्द्र बाधा नासीत् क्षुत्तृषादेस्तयोर्हि ।
क्षुधादिकाः पीडयन्त्येव नित्यं निरुद्यमं हरितत्त्वे खगेन्द्र ॥ १९ ॥

तदैवागात् त्र्यम्बको वै महात्मा वृको भूत्वा व्याघ्रसमो बले च ।
बालं दृष्ट्वा वृकरूपो हरस्तु पदा भूमिं विददारोरुवेगात् ॥ २० ॥

इन्द्रोऽपि दृष्ट्वा क्रोधयुक्तं वृकं च ह्युवाच बालं भीषयन् भीषणाय ।

इन्द्र उवाच

हे वत्स त्वां बाल भोक्तुं वृकोऽयं समागतः किं प्रकरोषि चाद्य ॥ २१ ॥

अत्रैवाहं यदि वर्ते च बाल हनिष्यति मां च न संशयोऽत्र ।
तदोवाच बालको वै महात्मा स्मृत्वा स्मृत्वा नारसिंहं मुकुन्दम् ॥ २२ ॥

बाल उवाच

पलायस्व शीघ्रमेवं च शक्र त्वत्पक्षेऽपि रक्षको नास्ति विष्णुः ।
मत्पालको हरिरास्ते नृसिंहो मध्वान्तस्थो हृदये संस्थितश्च ॥ २३ ॥
एवं चोक्त्वा बालके संस्थिते तु तदागमन्मातरिश्वा महात्मा ।
शुनश्च रूपं पूर्वमेवापि वीन्द्र धृत्वा नृसिंहं सामगानैः स्तुवंश्च ॥ २४ ॥
सुरक्षितं बालकं वै खगेन्द्र दृष्ट्वा शुना प्राणपरीप्सयैव ।
पलायितो दूरदेशे वृकस्तु तदाऽगमच्छेषदेवो महात्मा ॥ २५ ॥
सर्पो भूत्वा कृष्णवर्णो महात्मा विभीषितं बालकस्यैव वीन्द्र ।
तदाऽगमत्खगरूपं गृहीत्वा सरोजयोनिः पुत्रसंरक्षणाय ॥ २६ ॥
पक्षस्य वातेन विशीर्णितोऽभूत् तदा चक्रे पुत्रनामाब्जयोनिः ।
आनन्दात्मा हरिरेवं सदैव तव त्राता चात्रिनामा ह्यतस्त्वम् ॥ २७ ॥
अतो ह्यत्रिः श्रीनिवासस्य भक्तो ब्रह्मादिदेवैर्मानितो लालितश्च ।
यो विष्णुभक्तो ह्यङ्गिरा ब्रह्मणस्तु मुखाज्जातं नन्दरूपं वचश्च ॥ २८ ॥
अतोऽङ्गिरा नाम बभूव लोके श्रीविष्णुभक्तो निर्जितो हीन्द्रपाणिः ।
यो विष्णुदासः पुलहो ब्रह्मणस्तु नाभेस्तु जातः श्रीनिवासैकनिष्ठः ॥ २९ ॥
जरादिभिः पालितं गात्ररूपं सुनिर्मितं हरिणा पंचभूतैः ।
तदैव सम्यग् हननं यः करोति ज्ञानादिकृच्छ्रेण हरेश्च भक्त्या ॥ ३० ॥
अतो ह्यसौ पुलहाख्यो बभूव सखा हरेः कृष्णनिष्ठः सदैव ।
यो वा पुलस्त्यो रामभक्तः सदैव श्रोत्रेन्द्रियाद्ब्रह्मणः संप्रसूतः ॥ ३१ ॥
योग्यानुसारं पूर्णसुखं छिनत्ति ह्यतोऽरिषड्वर्गगणः पुलः स्मृतः ।
त्यजत्यसौ तं सदा वै खगेन्द्र ह्यतः पुलस्त्येति च प्राप संज्ञाम् ॥ ३२ ॥
नारायणे भक्तियुतः क्रतुश्च कराज्जज्ञे ब्रह्मणो औरसस्तु ।
विशेषेण क्रियते पंचयज्ञो नारायणे चार्पणं सर्वदाऽपि ॥ ३३ ॥

अतः क्रतुर्नाम बभूव तस्य श्रीविष्णुदासो वायुदासः खगेन्द्र ।
अतश्चैते ब्रह्मपुत्राश्च सप्त श्रीविष्णुपादे च रताः सदैव ।। ३४ ।।
वैवस्वतो सूर्यपुत्रो मनुश्च विश्वामित्रो नवसंख्याश्च सर्वे ।
परस्परं समभूताः खगेन्द्र बह्नेः सकाशादवराः सदैव ।। ३५ ।।
मित्रात् किंचिच्चाधिकाः सर्वदैव जानीहि त्वं नात्र विचार्यमस्ति ।
आख्यानमेतद्गुणनिर्णयात्मकं श्रुणोति भक्त्या परमादरेण ।। ३६ ।।
मरीचिमुख्यादिमहाप्रसादात् स याति विष्णोर्मन्दिरं देवपूज्यम् ।।

इति श्रीगरुडपुराणे ब्रह्मकाण्डे विश्वामित्रादीनां जन्मचरित्रवर्णनं नाम चतुस्त्रिंशोऽध्यायः ।। ३४ ।।

॥ पञ्चत्रिंशोऽध्यायः ॥

यो द्वादशादित्यसंज्ञेषु मित्रश्चैकः सूर्यः कश्यपस्यैव पुत्रः ।
पाय्वात्मकश्चैव विष्णोर्हि भक्तः वर्षाकाले प्रमिनोत्येव वृष्टिम् ॥ १ ॥
तया प्रजास्त्राति नित्यं खगेन्द्र ह्यतश्चासौ मित्रसंज्ञामवाप ।
मित्रावतारो भीष्मको नाम राजा राड्वंशयुक्तः कृष्णभक्तः पृथिव्यां ॥ २ ॥
या विष्णुभक्ता गुरुभार्या च तारा मित्रस्य पुत्री मित्रवत् सा सती च ।
पातिव्रत्यं चोत्तमानां हि स्त्रीणां उपदेष्टुत्वात्तारकत्वाच्च तारा ॥ ३ ॥
तारा पृथिव्यां कृपिसंज्ञा बभूव द्रोणस्य भार्या ह्यत्रिऋषेः शरद्वतः ।
पातिव्रत्यं द्रोणरूपे गुरौ च सम्यक् चक्रे भूतले विष्णुभक्ता ॥ ४ ॥
यदा द्रोणो सर्वदानोज्झितः सन् शिलोंछवृत्त्या चोपजीवन् तदा हि ।
कृपिस्तदा संचकारैव नित्यं द्रोणान्तस्थं प्रीणयामास वीन्द्र ॥ ५ ॥
यदा द्रोणो कृच्छ्रचान्द्रायणं च मासोपवासं च तथा खगेन्द्र ।
तदा कृपी कृच्छ्रचान्द्रायणं च चकार विष्णुं प्रीणयामास तेन ॥ ६ ॥
कदाऽपि वस्त्रं नापि द्रोणः स वीन्द्र ह्यलंकारान् सुतरां नैव चाप ।
अथापि यस्याश्चेतसि पक्षिवर्य विकारं वै नाभवत्काऽपि काले ॥ ७ ॥
तस्य प्रभावाच्च विष्णोः प्रसादात् विधोः सकाशाद्दोषयुक्ताऽपि तारा ।
सुसाधुजानां स्मृतियोग्या बभूव सदा वीन्द्र पंचकन्यासु मध्ये ॥ ८ ॥
कोणाधिपो यो निर्ऋतिर्विष्णुभक्तः प्रवहस्यैव चोत्तमः पुत्र एव ।
विष्णुद्रुहो दुर्जनान्सर्वदैव ह्यत्तीति यस्मान्निर्ऋतिः सम्बभूव ॥ ९ ॥
रामावतारे दुर्मुखो वानरस्तु बभूव भूम्यां निर्ऋतिं तं हि विद्धि ।
विष्णुद्रुहो राक्षसान् सर्वदैव दृष्ट्वा दृष्ट्वा दुर्मुखं वै करोति ॥ १० ॥
अतो ह्यसौ दुर्मुखो नाम चाभूद्रामांघ्रिनिष्ठः सर्वदा वै खगेन्द्र ।
घटोत्कचो रुद्रयुक्तो बभूव हिडिम्बिपुत्रो भीमवीर्योद्भवोऽभूत् ॥ ११ ॥

कोणाधिपं निर्ऋतिं तं च विद्धि महाबली कृष्णभक्तः पृथिव्याम् ।
या भानुपुत्री प्रावही विष्णुनिष्ठा प्रवहस्य भार्या मित्रवत्सा च देवी ॥ १२ ॥
स्वभर्तृवद्वहति विष्णुधर्ममतोऽपि सा प्रावहीत्याप संज्ञाम् ।
स्त्रीणां महाप्रावही विष्णुधर्माननलंकारान् धारयध्वं सदैव ॥ १३ ॥
हरिं गुरुं परमं देवताख्यं सूत्रं कण्ठे धारणात् रेणुकाऽपि ।
तालीं च धृत्वा मुखपद्मेषु नित्यं सन्दृश्यते ब्रह्महत्यादिदोषः ॥ १४ ॥
हत्यादिरूपाः प्रविसृज्यैव तालीं सन्धारयन्तु गलसूत्रं च विष्णुम् ।
त्वदीयपूजां रेणुका नैव नित्यं गृह्णाति तस्या ह्यभिधा वै पिशाचाः ॥ १५ ॥
वृक्षे वृक्षे पूजनं ब्रह्मदेवो न गृह्णाति तस्य संज्ञः पिशाचः ।
शूद्रादिभिः स्थापिते वै प्रतीके पूजां नैव प्रतिगृह्णाति वायुः ॥ १६ ॥
तन्नामको दैत्यवर्यश्च तत्र पूजां गृह्णाति न कुरुध्वं च यूयम् ।
सवोत्तमाख्यं गलसूत्रं विहाय न शोभन्ते ललनाश्चैव यूयम् ॥ १७ ॥
हरेः कथाख्याभरणं विहाय न शोभन्ते ललनाश्चैव यूयम् ।
ललाटदेशे चोर्ध्वपुण्ड्रं गदां च सकुङ्कुमं प्रविहायैव यूयम् ॥ १८ ॥
न शोभन्ते ललनाः सुपापा अतो गन्धान्धारयध्वं मुरारेः ।
यासां जिह्वाग्रे कृष्णमन्त्रं न चास्ति तासां सङ्गं यः करोत्येव नित्यम् ॥ १९ ॥
तेषां क्रिया व्यर्थमाहुर्महान्तः सुरापानां लोकमाहुश्च तासाम् ।
ज्ञानं यासां नास्ति नारायणस्य तासां गतिर्ब्रह्महत्याकृतानाम् ॥ २० ॥
अतो यूयं हरिसर्वोत्तमाख्यं सुकण्ठसूत्रं बन्धयध्वं सदैव ।
अनन्तांशात्सर्वदा न्यूनभूतां लक्ष्म्याख्यकेशं धारयध्वं च यूयम् ॥ २१ ॥
लक्ष्म्याः सकाशात्कोटिगुणैर्विहीनौ विरिंचिवायू वस्त्रयुग्मम् सदैव ।
विधेः सकाशाच्छतगुणैर्विहीना गायत्र्याख्यां धारयध्वं हरिद्राम् ॥ २२ ॥
वायोः सकाशाच्छतगुणैर्विहीनां भारत्याख्यां धारयध्वं सुपुण्ड्रम् ।

वाणेः सकाशाच्छतगुणैर्विहीनां रुद्राख्यरूपां धारयध्वं गदां च ॥
रुद्रसमानं शेषसंज्ञं च यूयं सन्धारयध्वं कुङ्कुमं सर्वदैव ॥ २३ ॥
रुद्रसमानं गरुडाख्यं च यूयं सन्धारयध्वं धूपशेषं च नित्यं ।
शिवस्यैव शतगुणैर्विहीनां पार्वत्याख्यां धारयध्वं च मालाम् ॥ २४ ॥
शेषस्यापि दशगुणैर्विहीनां वारुण्याख्यां धारयध्वं च गन्धम् ।
वीन्द्रस्यैव शतगुणैर्विहीनां सौपर्ण्याख्यां धारयध्वं सुवर्णम् ॥ २५ ॥
यास्तारतम्यज्ञानहीनाश्च सर्वाः केशादिहीना विधवा एव नित्यम् ।
एवं स्त्रीणामवदद्विष्णुधर्ममतः सा वै प्रावहीत्येव संज्ञाम् ॥ २६ ॥
निर्ऋतिर्मित्रतारे च प्रावही च परस्परम् ।
समा इति विजानीहि नात्र कार्या विचारणा ॥ २७ ॥
मरीच्यादिभ्यः सर्वदा न्यूनभूताः सदा पर्जन्याद्विगुणा एव वीन्द्र ।
एषां स्वरूपं यः श्रुणोत्येव नित्यं तेषां प्रसादाद्वायुदेवप्रसादात् ॥ २८ ॥
विष्णोः प्रसादाच्च स याति लोकं सुशाश्वतं श्रीनिवासस्य वीन्द्र ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे अंशावतरणे ताराऽवतारवर्णनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ षट्त्रिंशोऽध्यायः ॥

मित्राद्यनन्तरान्वक्ष्ये श्रुणु काश्यपनन्दन।
श्रवणात्सर्वपापघ्नान् श्रीनिवासपदाश्रयान् ॥ १ ॥

विष्वक्सेनो मुख्यवायोश्च पुत्रो नारायणस्य पार्षदो वै महात्मा।
इनाख्येन स्वामिना संयुतत्वात्सेनो विष्णोर्यस्य प्रत्यक् च नासा ॥ २ ॥

अतो विष्वक्सेनसंज्ञो बभूव विष्ण्वंघ्रिनिष्ठः खेन तुल्यः सदैव।
यावश्विनौ नासिकाख्येन्द्रियस्य नियामकौ विष्णुनस्तश्च जातौ ॥ ३ ॥

गन्धं प्रति ह्याशु संगच्छमानौ ततश्च तावश्विसंज्ञौ हि जातौ ।
यो विघ्नपो रुद्रपुत्रो महात्मा ह्याकाशात्मा वित्तपस्यैव तुल्यः ॥ ४ ॥

पौलस्त्यपुत्रो वित्तपो विष्णुभक्तो विष्णोर्वित्तात्सर्वदा पाति यस्मात् ।
अतो ह्यसौ वित्तपो नाम संज्ञामवाप वीन्द्र श्रीनिवासैकनिष्ठः ॥ ५ ॥

शतस्थमध्ये ह्युक्तशेषाश्च देवाः षडशीतिसंख्याः खेन तुल्याः सदैव ।
मित्रादिभ्यो ह्यधमाः किंचिदेव ज्ञेयो वीन्द्र श्रुणु तेषां मध्ये ह्युशेषावतारान् ॥ ६ ॥

यश्चारुदेष्णो मम पुत्रो महात्मा स एवं पूर्वं विघ्नपो नात्र शङ्का ।
सोमार्हदेवान् शतसंख्यान् श्रुणुष्व तेषां मध्ये ह्युक्तशेषावतारान् ॥ ७ ॥

श्रुणुष्व तेषां नामधेयानि वीन्द्र सर्वेऽपि ते विष्णुपादैकनिष्ठाः
तेषां नाम श्रुण्वतां पापनाशः सम्यक् ज्ञानं जायते सर्वदैव ॥ ८ ॥

ये कोटीनां नवसंख्याकदेवास्तेषां मध्ये शतसंख्येषु वीन्द्र ।
सोमाधिकारो वेदतन्त्रेषु प्रोक्तो द्वे ब्रह्मणी अधिके वीन्द्र विद्धि ॥ ९ ॥

वसवोऽष्टौ द्वादशादित्या रुद्रा एकादश स्मृताः ।
प्रधानवायुना सार्धं पंचाशन्मरुतः स्मृताः ॥ १० ॥

अश्विना हस्यतिश्चेति विपशेषानिरुद्धकाः ।
ब्रह्मब्रह्माण ऋभवो त्रय एकश्च संस्मृताः ॥ ११ ॥

विश्वेदेवा दश प्रोक्ता एक एव पितृत्रयः ।
द्यावापृथिव्यौ चैकैव शतस्थाश्च प्रकीर्तिताः ॥ १२ ॥
सर्वेऽपि विष्णुसक्ताश्च क्रमेण ज्ञानिनः स्मृताः ।
वसूनामष्टनामानि श्रुणु पक्षीन्द्रसत्तम ॥ १३ ॥
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वस्तुविभावसुः ।
एतेऽष्टसंख्या वसवस्तु प्रोक्ता तत्र द्युनामा विष्णुभक्तो महात्मा ॥ १४ ॥
कृष्णावतारे भूतले संप्रजातो ब्रह्मांशयुक्तो भीष्मसंज्ञामवाप ।
श्रीरुक्मिणीजनको वै महात्मा श्रीविष्णुपादाङ्घ्रिनिषेवणोत्सुकः ॥ १५ ॥
यो द्रोणसंज्ञो वसुरासीच्च वीन्द्र स एव जज्ञे नन्दगोपः पृथिव्याम् ।
श्रीकृष्णपादाङ्घ्रिनिषेवणोत्सुकः श्रीविष्णुदासः खेन तुल्यः सदापि ॥ १६ ॥
वह्निस्तूक्तः सप्तसंख्याश्च शेषः सर्वे सदा श्रीनिवासस्य दासाः ।
एकादशानां हरिपादे रतानां तेषां रुद्राणां श्रुणु नामानि वीन्द्र ॥ १७ ॥
भीमोऽभयो रैवतोऽजो महांश्चैव वृषाकपिः ।
अजैकपादहिर्बुध्न विरूपाक्षोग्रनामकौ ॥ १८ ॥
वामश्चैकादशः प्रोक्तो वायुभक्तास्तथा हरेः ।
अजैकपान्नाम रुद्रः पृथिव्यां हरेरङ्गत्वं प्राप्तुमेवं स जज्ञे ॥ १९ ॥
स सोमदत्तात्मज भूरिरुक्तः श्रीविष्णुभक्तः खेन तुल्यश्च वीन्द्र ।
अहिर्बुध्नः सर्वरुद्रैश्च युक्तो भूरिश्रवाख्यः सोमदत्तस्य पुत्रः ॥ २० ॥
विरूपाक्षोऽश्वत्थनामा बभूव श्रीविष्णुभक्तो खेन तुल्यश्च नित्यं ।
तेषां मध्ये बलवान् विष्णुभक्तः भूरिश्रवाः सर्वरुद्रैर्युतत्वात् ॥ २१ ॥
विष्कम्भाख्यो रुद्र एवेह पृथ्व्यां शारद्वतः पुत्रतामाप्य जज्ञे ।
कृपो नाम्ना विष्णुभक्तो महात्मा भीष्मानुवर्ती धृतराष्ट्रानुवर्ती ॥ २२ ॥
यः पत्रतापाख्यरुद्रः स एव बाल्हीकपुत्रत्वमवाप्य जज्ञे ।
स सोमदत्तो हरिभक्तवर्यः वायौ सुनिष्ठः खेन तुल्यः स एव ॥ २३ ॥

स एव रुद्रः पत्रतापाख्यनामा पुनर्जरासन्धसुतत्वमाप ।
स कृष्णभक्तः सहदेवेतिसंज्ञो पाण्डोः पुत्रात्सहदेवाच्च भिन्नः ॥ २४ ॥
यो मूलरुद्रो भवसंज्ञः खगेन्द्र ह्युक्तः शेषाः दशरुद्राः समानाः ।
सोमार्हदेवाः श्रीनिवासस्य भक्ताः मुक्तौ संसार खेन तुल्याश्च वीन्द्र ॥ २५ ॥
आदित्यानां द्वादशानां च वीन्द्र श्रुणुष्व नामानि तथाऽवतारान् ।
विवस्वानर्यमा पूषा त्वष्टा च सविता भगः ।
धाता पर्जन्यवरुणौ मित्रः शक्रो ह्युरुक्रमः ॥ २६ ॥
विवस्वतो यो हरिभक्तवर्यस्तस्यानुजो यः सवितेति नामा ।
स एव जातः सत्यवत्यां च कृष्णान्नाम्ना भानुः श्रीनिवासस्य भक्तः ॥ २७ ॥
यमाविष्टो वीरसेनो महात्मा त्वष्टा नाम्ना सूर्य एवेति विद्धि ।
स वीरसेनो हरिभक्तः पृथिव्यां हरेरङ्गत्वं प्राप्तुमेवाभिजातः ॥ २८ ॥
उरुक्रमो मित्रविवस्वन्तौ च शक्रः शक्रः पर्जन्यो वरुणश्चेति वीन्द्र ।
उक्ता हि ते षड्विधास्ते तु सर्वे शेषाः समस्ताः खेन तुल्याः सदैव ॥ २९ ॥
प्रधानवायुश्चैक एवं खगेन्द्र एकोनपञ्चाशन्मरुतां चैव नामान् ।
श्रुणुष्व वीन्द्र सुप्रधानान्हरेश्च सुभक्तवर्यान् श्रवणात्पापनाशान् ॥ ३० ॥
परावहो मरुतः सौम्यनागौ प्रतीतकूर्मः कृकलो देवदत्तः ।
अपानव्यानौ च उदान एव समानकूर्मौ च धनंजयश्च ॥ ३१ ॥
परावहो विवहः संवहश्च तथाऽवहाद्याः विष्णुभक्ताः सदैव ।
यः पाण्डुराजो विष्णुभक्तो महात्मा परावहो नाम मरुत्स वीन्द्र ॥ ३३ ॥
एषां मध्ये विष्णुभक्तः प्रतीतो स चेकितानो यदुषु प्रजातः ।
एषां मध्ये सौम्यनामा मरुच्च बभूव भूम्यां विपृथुश्चैव राजा ॥ ३४ ॥
प्राणस्य वायोरंशभूतौ खगेन्द्र सर्वोत्तुङ्गो गजनामा बभूव ।
तेषां मध्ये यो ह्यपानाख्यवायुः स एवाभूद्वानरो यो गवाक्षः ॥ ३५ ॥

तेषां मध्ये व्याननामा हि वायोरंशो बभूव गवयो वानरस्तु ।
तेषां मध्ये यः समानाख्यवायुः स एवाभूद्गन्धमादाख्य एव ॥ ३६ ॥

स एव वीन्द्र संबभूव पृथिव्यां शर्वत्राताख्यः श्रीनिवासस्य भक्तः ।
तेषां मध्ये कूर्मनामा मरुच्च स एवाभूत्कुन्तिभोजाख्यराजः ॥ ३७ ॥

तेषां मध्य उद्वहाख्यो मरुच्च स एवाभूद्वीन्द्र परावहाख्यः ।
तेषां मध्ये पंचप्राणादयश्च मरुत्प्रवाहो सप्तसंख्याः प्रधानाः ॥ ३८ ॥

विश्वेदेवानां शृणु नामानि चैव विष्णोर्भक्तानां श्रवणात्पापनाशः ।
पुरूरवार्द्रकौ द्वौ विजानीहि वीन्द्र श्राद्धस्य देवौ विष्णुभक्तौ सदापि ॥ ३९ ॥

धूरिलोचनौ द्वौ च देवौ महात्मन् संकल्पितश्राद्धभाजौ च विद्धि ।
क्रतुदक्षाख्यौ द्वौ च देवौ खगेन्द्र पातश्राद्धे भोजिनौ तौ च विद्धि ॥ ४० ॥

सत्यवस्वाख्यौ द्वौ च देवौ खगेन्द्र नान्दीश्राद्धे भोजिनौ तौ च विद्धि ।
कामः कालो द्वौ च देवौ खगेन्द्र प्रेतश्राद्धे भोजिनौ तौ च विद्धि ॥ ४१ ॥

तेषां मध्ये पुरूरवाख्यदेवो जज्ञे भूम्यां धर्मराजाच्च वीन्द्र ।
प्रतिविन्ध्याख्यश्चित्ररथेन युक्तः श्रीकृष्णभक्तो द्रौपदीगर्भभूतः ॥ ४२ ॥

तेषां मध्ये आर्द्रवाख्यश्च देवो जज्ञे भूम्यां भीमसेनाच्च वीन्द्र ।
श्रुतसोमाख्यो ह्यतिताम्रेण युक्तो श्रीकृष्णभक्तो द्रौपदीगर्भभूतः ॥ ४३ ॥

तेषां मध्ये धुरिसंज्ञस्तु देवो जज्ञे भूम्यामर्जुनादेव वीन्द्र ।
श्रुतकीर्तिनामा स किशोरेण युक्तः श्रीकृष्णभक्ता द्रौपदीगर्भभूतः ॥ ४४ ॥

तेषां मध्ये लोचनाख्यस्तु देवो भूम्यां जज्ञे नकुलादेव वीन्द्र ।
शतानीकः श्रीनिवासस्य भक्तो गोपालाख्यात्संयुतो द्रौपदीजः ॥ ४५ ॥

तेषां मध्ये क्रतुसंज्ञश्च देवो जज्ञे भूम्यां सहदेवाच्च वीन्द्र ।
श्रुतकर्माख्यः बलनाम्ना च युक्तो गन्धर्वेण द्रौपदीगर्भभूतः ॥ ४६ ॥

दक्षादीनां पंचकानां खगेन्द्र ह्यवतारान् वै विद्धि कैकेय पंच ।
ये कैकेयाः पंच ये द्रौपदेयाः परस्परं समभूताः खगेन्द्र ॥ ४७ ॥

बृहस्पतिस्त्वेकपितृत्रयश्च द्वावश्विनौ सोमपानाश्च चैते ।
द्वयोरश्विनोरवतारौ श्रुणुष्व रामावतारे विविदश्चैव मैन्दः ॥ ४८ ॥
उभौ च तावश्विनोरंशभूतौ तयोर्मध्ये विविदश्चेन्द्रयुक्तः ।
ब्रह्मोद्भवौ तौ पुनरेव सूर्याद् बभूवतुस्तौ रामभक्तौ पृथिव्याम् ॥ ४९ ॥
शृङ्गाररूपेण च वायुनैव सुनीतिरूपेण च वायुनैव ।
सम्यक्प्रविष्टौ तु नकुलसहदेवौ माद्रीपुत्रौ अश्विनोरंशभूतौ ॥ ५० ॥
त्रिशिखो विभुरित्येतावश्विनौ परिकीर्तितौ ।
हरिपादारविन्दे तु भक्तौ तौ परिकीर्तितौ ॥ ५१ ॥
अग्निष्वात्ता बर्हिषदः सोम एते त्रयः स्मृताः ।
हरिपादाब्जसन्निष्ठाः सोमपाने सहर्षणाः ॥ ५२ ॥

गरुड उवाच

प्रधानवायुर्वसवो रुद्रादित्या मरुद्गणाः ।
बृहस्पतिऋभुद्यावापृथिव्यावश्विनौ तथा ॥ ५३ ॥
विश्वेदेवाश्च पितरः शतस्था देवताः स्मृताः ।
इति श्रुतं मया कृष्ण तव पुत्रेण ब्रह्मणा ॥ ५४ ॥
ब्रह्मा....शेषश्च विपश्चैवानिरुद्धकः ।
एतांश्च पंचकान् ब्रह्मा प्रविहायावदच्च मां ॥ ५५ ॥
कथं मया तज्ज्ञातव्यं शिष्याय वद विस्तरात् ।

कृष्ण उवाच

ब्रह्मोक्तस्य मयोक्तस्य विवादो नास्ति सर्वथा ॥ ५६ ॥
अभिप्रायं च ज्ञातव्यं उभयोः पक्षिसत्तम ।
ब्रह्मणा विपशेषौ च रुद्रेऽन्तर्भावितौ खग ॥ ५७ ॥
अनिरुद्धं गुरौ वीन्द्र ब्रह्माणी व्यधिकं कृतम् ।

एवं शतस्थदेवानां ब्रह्मणोक्तं तवानघ ॥ ५८ ॥
त्रयाणां च मया वीन्द्र नान्तर्भूतं खगाधिप ।
आदित्येष्वेव गणितं विष्ण्वाख्यमुरुविक्रमम् ॥ ५९ ॥
मूलरूपं च ब्रह्माणमपरं च चतुर्मुखम् ।
इति वीन्द्र ब्रह्मणी द्वे ह्यधिके संप्रकीर्तिते ॥ ६० ॥
अधिकारिवर्गाद्भिन्नौ तु ब्रह्मनारायणाभिधौ ।
प्रविहाय द्वौ तु वीन्द्र शतस्थगणनं कृतम् ॥ ६१ ॥
चतुर्मुखं मुख्यवायौ अन्तर्भूय खगाधिप ।
द्यावापृथिव्यौ द्वौ तत्र शतस्था देवताः स्मृताः ॥ ६२ ॥
चतुर्मुखं पृथक् चेत्स्यात् तदा द्वावेक एव तु ।
एवं शतस्थान् देवांश्च जानीहि खगसत्तम ॥ ६३ ॥
अनुक्तिर्न तु दोषाय संख्यापूर्तिश्च कुत्रचित् ।
मदीयोक्त्यनुसारेण पूरणीयं च तत्र हि ॥ ६४ ॥
सन्देहं संजनयितुं ज्ञानिनामपि चाण्डज ।
व्यासेन तत्र तत्रैव तथैवोक्तमपूर्णताम् ॥ ६५ ॥
इदं च परमं गोप्यं न कस्यापि कथंचन ।
नास्ति तद्विषये वीन्द्र ह्यादरो नास्ति सर्वथा ॥ ६६ ॥
यद्यादरो भवेत्तत्र झटिति मोक्षगो भवेत् ।
अतस्तु ज्ञानिनां वीन्द्र नैपुण्यं नास्ति सर्वथा ॥ ६७ ॥
ज्ञातव्या च मया सम्यगित्थं नास्त्यादरः क्वचित् ।
यथा नैयायिके शास्त्रे शब्दशास्त्रे तथैव च ॥ ६८ ॥
आदरो ह्यस्ति पक्षीन्द्र तथा नास्त्यत्र चादरः ।
यथा कुशलता चास्ति व्याख्याने खगसत्तम ॥ ६९ ॥

तथा तरतमज्ञाने कौशल्यं नास्ति सर्वथा ।
व्याख्यानकुशलास्तेऽपि स्वसिद्धान्तविचारणे ॥ ७० ॥
न वैष्णवास्ते विज्ञेयाः क्रमज्ञाने ह्यनादराः ।
दुर्लभं तरतमज्ञानं वैष्णवानां कलौ खग ॥ ७१ ॥
द्विषड्गुणयुतो वापि चतुर्वेदयुतोऽपि च ।
तारतम्यज्ञानशून्यः सवै शूद्रसमः स्मृतः ॥ ७२ ॥
अनाचारी वेदहीनस्तारतम्यविदेव च ।
तमेव वेदविद्विप्रादुत्तमं विद्धि वै खग ॥ ७३ ॥
तारतम्यविहीनो यो विष्णुः सर्वोत्तमेति च ।
वदन्नपि स वै पापी न प्रीणाति हरिः स्वयम् ॥ ७४ ॥
तारतम्यविहीनस्य वेदानां पठनादपि ।
फलं नास्त्येव भो वीन्द्र यथा सूतकिनस्तथा ॥ ७५ ॥
वेदस्य पठनात्पुण्यं श्रुत्यादावुच्यते खग ।
तारतम्यविहीनानां वैष्णवानामपि द्विज ॥ ७६ ॥
अवैष्णवानां शूद्राणां चाण्डालानां खगेश्वर ।
तारतम्यविहीनानां वैष्णवानामपि द्विज ॥ ७७ ॥
वेदस्य पठनाद्वीन्द्र व्यर्थमेव न संशयः ।
इदं तरतमज्ञानं दुर्लभं वै कलौ नृणाम् ॥ ७८ ॥
एवं शतस्थं जानीयादुक्तान् वक्ष्ये खग श्रुणु ।
मित्रो वह्निश्च वरुणः प्रवहश्चेन्द्र एव हि ॥ ७९ ॥
रुद्रोऽश्विनौ मुख्यवायुः सूर्यश्चैव बृहस्पतिः ।
आहंकारिकप्राणश्च तथा ब्रह्मा चतुर्मुखः ॥ ८० ॥
एवं त्रयोदश ह्युक्ताः शेषाश्च षडशीतयः ।

पर्जन्यस्तु महाभाग षडशीत्यधमः स्मृतः ॥ ८१ ॥

विष्णोर्भक्तानां निर्णयं यः श्रुणोति सुपुण्यात्मा याति तेषां प्रसादात् ।

विष्णोः प्रसादं वायुदेवप्रसादं यात्येव वीन्द्र ज्ञानमाप्नोति नित्यं ॥ ८२ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे देवतातारतम्यकथनं

नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

॥ सप्तत्रिंशोऽध्यायः ॥

उक्तशेषशतस्थान्यानवरान् श्रुणु वै द्विज ।
जयश्च विजयश्चैव प्रचण्डश्चण्ड एव च ॥ १ ॥

नन्दः सुनन्दः कुमुदः कुमुदाक्षस्तथैव च ।
अष्टौ हि द्वारपालाश्च कालाद्या अपि पार्षदाः ॥ २ ॥

तत्त्वाभिमानिदेवेभ्यः ह्यवराः संप्रकीर्तिताः ।
अश्व्यादिभ्यः किंचिदूनाः सदा विष्णुपरायणाः ॥ ३ ॥

तेषां मध्ये विष्णुभक्तो जयस्तु कल्पे पूर्वस्मिन् गर्भसंस्थो महात्मा ।
हरिं स्तुत्वा गर्भवासाच्च दुःखं भुक्त्वा सर्वं द्वारपालत्वमाप ॥ ४ ॥

गरुड उवाच

कोऽयं जयः पूर्वकल्पे गर्भवासे च कीदृशम् ।
दुःखं संप्राप्तवान् कृष्ण गर्भे ज्ञानं च कीदृशम् ॥ ५ ॥

एतद्विस्तार्य मे ब्रूहि शिष्यस्य तव सुव्रत ।
गरुडेनैवमुक्तस्तु कृष्णो वचनमब्रवीत् ॥ ६ ॥

कृष्ण उवाच

पूर्वकल्पे त्वयं वीर ह्यन्तिमे जन्मनि द्विज ।
गर्भस्थोऽभून्महद्दुःखं भोक्तुं प्रारब्धसम्भवम् ॥ ७ ॥

जरायुणा च संवीतो महद्दुःखमवाप्तवान् ।
अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ॥ ८ ॥

गर्भस्थानां च जीवानां सर्वेषामस्ति सर्वदा ।
देवानां च ऋषीणां च मनुष्याणां खगाधिप ॥ ९ ॥

नित्यसंसारिणां दुःखं दैत्यादीनां तथैव च ।
दुःखमस्त्येव सर्वेषां सदा चैवाऽऽपिपीलिकम् ॥ १० ॥

तारतम्यं च ज्ञानेऽस्ति मोक्षस्यैवाधिकारिणाम् ।
तत्त्वाभिमानिनो देवा गर्भे प्रारब्धजं फलम् ॥ ११ ॥

भुंजते वीन्द्र तेषां तु तत्त्वज्ञानं न नश्यति ।
हरितत्त्वं यथाज्ञातं देवैस्तत्त्वाभिमानिभिः ॥ १२ ॥

मनुष्यादिषु गर्भेषु वासकालेऽपि तत्तथा ।
ऋष्युत्तमानां तु तथा यथा तत्त्वाभिमानिनाम् ॥ १३ ॥

उत्तमानामृषीणां च मोक्षस्यैवाधिकारिणाम् ।
अनपरोक्षयुतानां च देवानां खगसत्तम ॥ १४ ॥

मनुष्याणां च सर्वेषां मोक्षस्यैवाधिकारिणाम् ।
ज्ञानमस्त्येव गर्भेषु हरितत्त्वविनिर्णये ॥। १५ ॥

अपरोक्षयुतानां च देवानां मुनिनां तथा ।
अपरोक्षेण वै ज्ञानं हरिं दृष्ट्वा स्तुवन्ति ते ॥ १६ ॥

भूमावुत्पत्तिसमये ह्यपरोक्षेण नश्यति ।
अपरोक्षज्ञानिनां च सर्वेषामधिकारिणाम् ॥ १७ ॥

तत्त्वज्ञानं परोक्षेण गर्भे चास्ति खगाधिप ।
स्तुवन्ति च परोक्षेण तदाप्यस्ति क्रमेण तु ॥ १८ ॥

चतुर्मासं समारभ्यं षण्मासावधि काश्यप ।
सर्वदुःखानि भुंजाना ये तु मोक्षाधिकारिणः ॥ १९ ॥

इत्थं त्वनपरोक्षाणां तन्नास्ति ह्यपरोक्षिणां ।
प्रारब्धदुःखं देवानां तत्त्वानामभिमानिनाम् ॥ २० ॥

गर्भवासे च दुःखं तु नान्यदस्ति खगोत्तम ।
मातृजग्धान्नपानाद्यैर्विण्मूत्रकृमिभिः खग ॥ २१ ॥

दुःखं नास्त्येव देवानां यथाऽस्त्यनपरोक्षिणां ।
देवानां गर्भवासं तु पद्मपत्रमिवाम्भसि ॥ २२ ॥

उत्तमानामृषीणां तु गर्भे गर्भस्थकल्मषम् ।
दृष्ट्वा दृष्ट्वा जुगुप्सन्ते विष्ठामूत्रादिकं तथा ॥ २३ ॥

लेपो नास्ति ऋषीणां तु दुःखं दुर्गन्धसम्भवम् ।
अपरोक्षवतां नृणां विण्मूत्रादिविलेपनम् ॥ २४ ॥

दुःखमाहुर्नृणां वीन्द्र तदन्येषां महात्मनाम् ।
अनपरोक्षवतां वीन्द्र मोक्षस्यैवाधिकारिणाम् ॥ २५ ॥

मातृजग्धान्नपानाद्यैर्विण्मूत्रैः कृमिभिस्तथा ।
सर्वदुःखानि भुंजन्ते नात्र कार्या विचारणा ॥ २६ ॥

तमोऽधिकारिणां वीन्द्र दुःखं तु प्रबलं स्मृतम् ।
ज्ञानं तु सर्वथा तेषां नास्त्येव खगसत्तम ॥ २७ ॥

शतजन्मकृतो द्रोहो हरेर्नारायणस्य च ।
स्मरणं च भवेत्तेषां क्रमेण भवति ध्रुवम् ॥ २८ ॥

तेन दुःखानि विन्दन्ति गर्भे ते ह्यधिकं खग ।
दुःखानुभवकाले तु वदन्त्येवं खगाधिप ॥ २९ ॥

हरिणा पापरूपेण चास्मिन् गर्भे निपात्य हि ।
सर्वथा बाध्यते चेत्थं तस्मात्पापी स एव हि ॥ ३० ॥

निर्मुक्तोऽहं यदा दुःखात्तदा विष्णुं मम द्रुहम् ।
हरिष्यामि न सन्देहो नात्र कार्या विचारणा ॥ ३१ ॥

इत्यादिचिन्तनं तेषां ज्ञानं नास्त्येव सर्वथा ।
नित्यसंसारिणां चापि मिश्रज्ञानविचिन्तनम् ॥ ३२ ॥

दुःखं तु बहुलं तेषां गर्भवासादिसम्भवम् ।
दैत्यानां तु यथा दुःखं तथा नास्त्येव मिश्रिणाम् ॥ ३३ ॥

ज्ञानं तु सर्वथा नास्ति गर्भे संसारिणां खग ।
अतो जयो गर्भवासे स्वयोग्यं दुःखमेव च ॥ ३४ ॥

अनुभूय महादुःखं प्रारब्धजनितं खग ।
सप्तमे मासि ह्युदरे तुष्टाव हरिमव्ययम् ॥ ३५ ॥

जय उवाच

दारापत्यकलत्रगेहविजये कष्टेन संपादितं
द्रव्यं चेदमनर्थमूलमभवत्कीटादिजन्मस्वपि ।
सोऽहं यामि इतः परं भगवतः पादारविन्दं सदा
संसारस्य विमोक्षणे च सुशकं गर्भस्थदुःखच्छिदम् ॥ ३६ ॥

श्रीविष्णोश्चरणारविन्दयुगले शरणं च संकुर्वतः
स्त्रीपुत्रद्रविणादिजन्ममतुलं दुःखं भयं मे कुतः ॥

हित्वाप्यहं बहुषु जन्मसु विश्वमूर्ते
त्वत्पादपद्मयुगलं च युतः कदिन्द्रियैः ।
दुष्कर्मवंचनमपि हरे न करोमि विष्णो
नारायणं निवसितं हृदये नमामि ॥ ३७ ॥

भूतैः सुनिर्मितगृहे हरिणैव दत्ते सम्यक्पतन् हरिगुरोश्चरणं च हित्वा ।
भुंजे च दुःखमतुलं जठरे शयानो विण्मूत्रकूपपतितो भृशतप्तदेहैः ॥ ३८ ॥

स्वेनैव पूर्ण भगवन्मम नास्ति किन्तु दातुं च वस्तु नृहरे तव दासदासः ।
ईदृक् च दुःखमतुलं मम छिन्दि छिन्दि पादारविन्दममलं शरणं व्रजामि ॥ ३९ ॥

एवं स्तुवन् हरिगुरू परमो हि जीवो
नारायणस्य कृपया विजयश्च जज्ञे ।
तस्मिन्सुजन्मनि तपः प्रचकार विष्णोः
सम्यक्प्रसादबलतो हरिद्वारपत्वम् ।।४० ।।

तेनैव वीन्द्र जय इत्यपि नामधेयं प्राप्नोत्सदैव भगवन् स तु विष्णुभक्तः ।
अश्व्यादिकेभ्य स तु ऊनगुणेन किंचिदेवं च विद्धि खगसत्तम भक्तवर्य ।। ४१ ।।

य इदं परमाख्यानं श्रृणोति श्रद्धयान्वितः ।
जयादीनां प्रसादेन स याति परमां गतिम् ।। ४२ ।।

इति श्रीगरुडपुराणे ब्रह्मकाण्डे जीवस्य गर्भवासदुःखवर्णनं नाम सप्तत्रिंशोऽध्यायः ।। ३७ ।।

॥ अष्टत्रिंशोऽध्यायः ॥

प्रधानाग्नेः पावकस्तस्य पुत्रो हरेर्भक्तो ह्यवरः सर्वदापि ।
काला जयादिभ्यस्तु कर्मजानां समः सदा नात्र विचार्यमस्ति ॥ १ ॥

भृगोः पुत्रस्तु च्यवनः पावकस्य समो मतः ।
हरिं च्यवनुते यस्मात्तस्मात् च्यवन ईरितः ॥ २ ॥

विनीतं च हरिं सोऽपि च्यवते च्यवनः स्मृतः ।
पुत्रो बृहस्पतेः साक्षादुचथ्यस्तु हरेः खग ॥ ३ ॥

सर्वोत्तमं हरिं चाहुरुचथेति च तद्विदः ।
तं यापयति यस्मात्स ततश्चोचथ्यनामकः ॥ ४ ॥

उचथ्यस्तु समो ज्ञेयो नारायणपरायणः ।
एकादशमनूनां च नामानि श्रुणु सादरम् ॥ ५ ॥

चतुर्दशसु स्वायम्भुस्तापसस्तु हरिः स्मृतः ।
वैवस्वतस्तृतीयस्तु ह्युक्ता एते खगाधिप ॥ ६ ॥

शेषान् श्रुणु महाभागान् नारायणपरायणान् ।
रैवतस्यान्तरे राजा रैवताख्यो मनुः स्मृतः ॥ ७ ॥

रै तु द्रव्यं च संप्रोक्तं हरेरर्पणयाऽवति ।
अतस्तु रैवतो नाम ह्युचथ्यस्य समो मतः ॥ ८ ॥

चाक्षुषस्यान्तरे राजा चाक्षुषो मनुरुच्यते ।
चक्षुषोऽन्तर्गतं विष्णुं व्यजानाच्चक्षुषः स्मृतः ॥ ९ ॥

रैवतस्य समो ज्ञेयो नारायणपरायणः ।
स्वारोचिषस्यान्तरे तु राजा स्वारोचिषो मनुः ॥ १० ॥

स्वतन्त्रं च हरिं वीन्द्रं सोऽजानाद्रोचिषः सदा ।
अतः स्वारोचिषो नाम चाक्षुषस्य समः स्मृतः ॥ ११ ॥

उत्तमस्यान्तरे राजा ह्युत्तमो नाम वै मनुः ।
हरिज्ञानस्योत्तमत्वात् स्वावरापेक्षया सदा ॥ १२ ॥
अतश्चोत्तमनामासौ स्वारोचिषसमः स्मृतः ।
सावर्णेरन्तरे राजा सावर्ण्याख्यमनुः स्मृतः ॥ १३ ॥
सच्छब्द उत्तमं ब्रूयात् अ इत्यानन्द उच्यते ।
उत्तमानन्दसंरूपं हरिं वर्णयते सदा ॥ १४ ॥
अतः सावर्णिनामासौ ह्युत्तमस्य समो मतः ।
अन्तरे ब्रह्मसावर्णेर्ब्रह्मसावर्णिको मनुः ॥ १५ ॥
उत्तमानन्दपूर्णं च हरिं वर्णयते यतः ।
अतश्च ब्रह्मसावर्णिः सावर्णेश्च मनोः समः ॥ १६ ॥
अन्तरे रुद्रसावर्णे रुद्रसावर्णिको मनुः ।
रुक् द्रावकं च सद्रूपं हरिं वर्णयते सदा ॥ १७ ॥
अतस्तु रुद्रसावर्णिर्हृषीकेशसखः सदा ।
गुणैस्तु ब्रह्मसावर्णिः समानः संप्रकीर्तितः ॥ १८ ॥
अन्तरे वेदसावर्णेर्वेदसावर्णिरिव च ।
वेदेषु प्रतिपाद्यं च ह्युत्तमाख्यं हरिं सदा ॥ १९ ॥
यस्माद्वर्णयते नित्यं देवसावर्णिनामकः ।
समस्तु रुद्रसावर्णेर्हरिपादाब्जसंश्रयः ॥ २० ॥
अन्तरे चेन्द्रसावर्णेरिन्द्रसावर्णिरिव च ।
ऐश्वर्यमुत्तमानन्दं सदा वर्णयते यतः ॥ २१ ॥
अतस्तु चेन्द्रसावर्णिर्विष्णुपादाब्जसंश्रयः ।
समस्तु देवसावर्णेर्गुणज्ञानादिभिस्तथा ॥ २२ ॥
अन्तरे दक्षसावर्णेर्दक्षसावर्णिरिव च ।
उत्तमाख्यं हरिं नित्यं दक्षो वर्णयितुं प्रभुः ॥ २३ ॥

अतस्तु दक्षसावर्णिः पूर्वोक्तस्य समो मतः ।
अन्तरे धर्मसावर्णेर्धर्मसावर्णिरिव च ॥ २४ ॥
धर्माख्यमुत्तमं विष्णुं सदा वर्णयते यतः ।
अतस्तु धर्मसावर्णिः पूर्वोक्तस्य समो मतः ॥ २५ ॥
एते च मनवः सर्वे परस्परसमा मताः ।
मनूनां च समाः सप्त पितरः परिकीर्तिताः ॥ २६ ॥
तथापि कर्मदेवानां समा एव न संशयः ।
वैन्यश्च कार्तवीर्यश्च पृथुश्च शशबिन्दुकः ॥ २७ ॥
प्रियव्रतः ककुत्स्थश्च गयो मान्धात एव च ।
त्रिजन्मभरतश्चैव विधृतिः स्वधृतिर्बलिः ॥ २८ ॥
दिवस्पतिः शुचिश्चैव ह्यद्भुतः शम्भुरेव च ।
सर्वे ते हरिणाविष्टाः हरेर्भिन्ना न संशयः ॥ २९ ॥
गन्धर्वेष्वष्टकं चैव कर्मदेवसमं मतम् ।
बल्याद्या अन्तरे वीन्द्र कर्मदेवत्वमाप्नुयुः ॥ ३० ॥
एवं मिलित्वा सर्वेऽपि चत्वारिंशच्च कीर्तिताः ।
पावकाद्याश्च चत्वारो ह्यधिकाः संप्रकीर्तिताः ॥ ३१ ॥
परस्परसमाः सर्वे वह्नेः शतगुणाधमाः ।
जयादिभ्यः किंचिदूनाः पर्जन्यादधिका मताः ॥ ३२ ॥
प्रह्लादोऽपि महाभाग कर्मदेवसमः स्मृतः ।
प्रकर्षाह्लादयुक्तत्वात् नारदस्योपदेशतः ॥ ३३ ॥
अतः प्रह्लादनामासौ पृथिव्यां खगसत्तम ।

गरुड उवाच

कस्मिन् काले नारदस्तु प्रह्लादस्य महात्मनः ॥ ३४ ॥
उपदिष्टवान् ममाचक्ष्व किं तत्त्वं च वदस्व मे ।

श्रीकृष्ण उवाच

पुरा दैत्यो महानासीद्धिरण्यकशिपुः प्रभुः ॥ ३५ ॥
जयेनैव समाविष्टः कदाचिद्धरिनिष्ठवान् ।
सर्वदा हरिविद्वेषी सदा वैष्णवदूषकः ॥ ३६ ॥
शुचिष्मती तु तद्भार्या पतिव्रतपरायणा ।
दधार गर्भं सा देवी हिरण्यकशिपोः पतेः ॥ ३७ ॥
विरेजे सा तु गर्भेण वैष्णवेन शुचिस्मिता ।
शुचिष्मती स्वगृहे संवसाना हरिं ध्यायन्ती चादरेणैव भक्त्या ।
यदा तदा ह्यागमद् ब्रह्मपुत्रो यदृच्छया गम्यमानोऽनपेक्षः ॥ ३८ ॥
विष्णोश्च भक्तो निजलाभतुष्टो हरेश्च नामानि गृणन् सदैव ।
दिगम्बरो वक्रजटाधरश्च ह्यावर्तनाभिर्वलिवल्गूदरं च ॥ ३९ ॥
प्रलम्बबाहुः पृथुतुङ्गवक्षा निगूढजत्रुःस्वमरोत्तमाभः ।
एतादृशो हरिभक्तो महात्मा ययौ गृहं काश्यपस्यापि ऋद्धम् ॥ ४० ॥
तस्मिन् काले विष्णुविद् काश्यपश्च ययौ मृगार्थं चंपकारण्यमेव ।
शुचिष्मती गर्भिणी स्वे गृहे च बभूव विप्रैः संयुता सा सभायाम् ॥
४१ ॥
मुनिं हि दृष्ट्वा चोत्थिता विप्रवर्यास्तल्लक्षणाज्ञा आसनेभ्यः खगेन्द्र ।
सा गुर्विणी चागताय द्विजाय तस्मै सपर्यां शिरसा जहार ॥ ४२ ॥
आशानिवृत्तो भगवद्दासवर्यो महासने सोपविवेश पूजितः ।
प्रशान्तमासीनमकुण्ठमेधसं शुचिष्मती नारदमभ्युपेत्य ॥ ४३ ॥
मूर्ध्ना प्रणम्यावहिता कृताञ्जलिर्नत्वा गिरा सूनृतयाऽन्वपृच्छत् ।

शुचिष्मत्युवाच

अद्येश नो वसतयः खलु भूरिभागा अद्यैव गावः सुभगा भवदागमेन ।
अद्यैव मे पितृकुलं सुपवित्रितं च ह्यद्यैव मातृसुकुलं च तथा च पत्युः ॥ ४४ ॥

मज्जन्म चाद्य भवदागमनाच्च देव पूतं तथा मदिन्द्रियगणानि पवित्रितानि ।
सन्दर्शनाच्च भवतां स्मरणाच्च पादशौचासनादिभिरलं प्रपुनामि चाद्य ॥ ४५ ॥

सान्निध्यात्ते महायोगिन् पातकानि महान्त्यपि ।
सद्यो नश्यन्ति वै पुंसां गरुडस्यैव चोरगाः ॥ ४६ ॥

अद्य मे भगवान्प्रीतः विष्णुर्ब्रह्मादिवल्लभः ।
अन्यथा दर्शनं चैव चास्माकं तु कथं भवेत् ॥ ४७ ॥

अतोऽस्माकं च भगवान्विष्णोर्नारायणस्य च ।
महिमां ब्रूहि देवर्षे भवतां दर्शनं वृथा ॥ ४८ ॥

न भवेदतः स्वरूपं तु विष्णोर्ब्रूहि यथार्थतः ।

नारद उवाच

नारायणः स्वयं साक्षादेवं पृष्टः पुरा श्रिया ॥ ४९ ॥

यदुवाच पिब त्वं तन्नारायणकथामृतम् ।
परं नारायणं देवं सच्चिदानन्दविग्रहम् ॥ ५० ॥

शुचिष्मति यज त्वं च यदि मोक्षं त्वमिच्छसि ।
एवमुक्तं नारदेन गर्भस्थोऽप्यनुमोदति ॥ ५१ ॥

वैरिणस्तं न हिंसन्ति न बाधन्ते ग्रहाश्च ये ।
यातुधाना न खादन्ति नारायणपरायणम् ॥ ५२ ॥

भक्तिर्दृढा भवेद्यस्य देवदेवे जनार्दने ।
श्रेयांसि तस्य सिध्यन्ति भक्तिमन्तोऽधिकास्ततः ॥ ५३ ॥

तौ पादौ सफलौ देवि विष्ण्वायतनगामिनौ ।
तौ हस्तौ भाग्यनिलयौ विष्णुपूजापरायणौ ॥ ५४ ॥

ते च नेत्रे महाभागे पश्यतो ये जनार्दनम् ।
सा जिह्वा प्रोच्यते सद्भिर्हरिनामपरायणा ॥ ५५ ॥

सत्यं हितं वच्मि सारं सारं वच्मि पुनः पुनः ।
संसारे दग्धसंसारे सारं च हरिपूजनम् ॥ ५६ ॥

सत्यं सत्यं पुनः सत्यं उद्धृत्य भुजमुच्यते ।
वेदशास्त्रात्परं नास्ति न दैवं केशवात्परम् ॥ ५७ ॥

संसारपाशं सुदृढं महामोहप्रदायकं ।
हरिभक्तिकुठारेण छित्वात्यन्तसुखी भवेत् ॥ ५८ ॥

तन्मनः संयतं विष्णौ सा वाणी तत्परायणा ।
ते श्रोत्रे तत्कथासारे पूरिते लोकवन्दिते ॥ ५९ ॥

शरीरं मृत्युसंयुक्तं जीवितं चापि चञ्चलं ।
राज्यादिधनसंग्राह्यसंपदः क्षणभङ्गुराः ॥ ६० ॥

हे जना किं न जानीध्वं आयुषोऽर्धं तु निद्रया ।
हृतं तु भोजनाद्यैश्च कियदायुः समाहृतम् ॥ ६१ ॥

कियदायुः शिशुत्वाच्च वृद्धत्वाच्च कियद्गतम् ।
कियद्विषयभोगैश्च कदा धर्मान् करिष्यत ॥ ६२ ॥

बालभावे च वार्धक्ये न साध्यं चाच्युतार्चनम् ।
वयस्येतान्हि धर्मान् वै कुरुध्वमनहङ्कृताः ॥ ६३ ॥

शरीरं रोगनिलयं मलाद्यैरपि पूरितं ।
किमर्थं शाश्वतधिया पापं कुरुत सर्वदा ॥ ६४ ॥

असारभूते संसारे नानादुःखसमन्विते ।
विश्वासो नात्र कर्तव्यो निश्चितं नाशमेष्यति ॥ ६५ ॥

मानं त्यजताहंकारं कामक्रोधादिकान् जनाः ।
यजध्वं सन्ततं कृष्णं मानुष्यमतिदुर्लभम् ॥ ६६ ॥

अनेककोटिदेहेषु स्थावरादिषु सत्तमम् ।
मानुष्यं प्राप्य यो मर्त्यो सकृन्नार्चयते हरिम् ॥ ६७ ॥

तेषामतीव मूर्खाणां विवेकः कुत्र तिष्ठति ।
आराधितो जगन्नाथो ददात्यभिमतं फलम् ॥ ६८ ॥

कस्तं न पूजयेद्देवं संसाराग्निप्रदीपितः ।
चण्डालोऽपि द्विजाच्छ्रेष्ठो विष्णुभक्तो द्विजाधिकः ॥ ६९ ॥

विष्णुभक्तिविहीनश्च द्विजोऽपि श्वपचाधमः ।
रागद्वेषसमायुक्तो द्विजोऽपि श्वपचाधमः ॥ ७० ॥

तस्मात्कामादिकं देवि त्यक्त्वा भज हरिं परम् ।
तस्मिन् तुष्टे जगत्तुष्टं यतः सर्वगतो हरिः ॥ ७१ ॥

यथा हस्तिपदे मग्नं पदमात्रं प्रलीयते ।
आकाशेन यथा व्याप्तं जगत्स्थावरजङ्गमम् ॥ ७२ ॥

तथैव हरिणा व्याप्तं विश्वमेतच्चराचरम् ।
ध्यातः स्मृतः पूजितो वा नमितो वा जनार्दनः ॥ ७३ ॥

संसारपाशविच्छेदी कस्तं न प्रतिपूजयेत् ।
यन्नामोच्चारणादेव महापातकनाशनम् ॥ ७४ ॥

यं समभ्यर्च्य देवि त्वं लभेथामुक्तिमुत्तमाम् ।
अहो चित्रमहो चित्रमहो चित्रमिदं बत ॥ ७५ ॥

हरिनाम्नि स्थिते लोकः संसारे वर्तते पुनः ।
भूयो भूयोऽपि वक्ष्यामि देवि सत्यं न संशयः ॥ ७६ ॥

नीयमाने यमभटैरशक्तो धर्मसाधने ।
यावन्नेन्द्रियवैकल्यं यावद्व्याधिर्न जायते ॥ ७७ ॥

तावद्दैवार्चनं नित्यं यदि मुक्तिरतो द्विजः ।
मातृगर्भाद्विनिष्क्रान्तः यदा जन्तुस्तदैव हि ॥ ७८ ॥

मृत्युवक्त्रगतो गाढं तस्माद्धर्मपरो भवेत् ।
सत्यं सत्यं पुनः सत्यं उद्धृत्य भुजमुच्यते ॥ ७९ ॥

ढम्भाचारं परित्यज्य पूजयेच्चक्रपाणिनम् ।
विष्णुः सर्वात्मना पूज्यस्त्याज्या एवान्यदेवताः ॥ ८० ॥
ये हि विष्णुं परित्यज्य चान्यदेवमुपासते ।
तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः ॥ ८१ ॥
अहो धैर्यमहो धैर्यमहो धैर्यं नृणामहो ।
विष्णौ स्थिते जगन्नाथे न भजन्ते मदोद्धताः ॥ ८२ ॥
अनाराध्य जगन्नाथं सर्वधातारमच्युतम् ।
संसारसागरे मग्नाः कथं पारं गमिष्यथ ॥ ८३ ॥
अच्युतानन्तगोविन्दनामोच्चारणभेषजम् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदामि ॥ ८४ ॥
नारायण जगन्नाथ वासुदेव जनार्दन ।
इतीरयन्ति ये नित्यं ते वै सर्वत्र वन्दिताः ॥ ८५ ॥
धिग्जन्म भक्तिहीनानां देवदेवे जनार्दने ।
तडिल्लोलश्रिया मत्त श्रणभङ्गुरशालिनाम् ॥ ८६ ॥
आराधयत देवेशं मृत्युपाशविमोचकम् ।
सृष्टिस्तु द्विविधा प्रोक्ता देवासुरविभेदतः ॥ ८७ ॥
हरिभक्तियुता देवास्तद्धीना आसुराः स्मृताः ।
तस्माद्देवि श्रुणु त्वं च हरिभक्तिपरायणा ॥ ८८ ॥
श्रेष्ठा सर्वत्र विख्याता यतो भक्तिः सुदुर्लभा ।
भक्तिं कुरु महादेवे देवदेवे जनार्दने ॥ ८९ ॥
एतच्छ्रुत्वा नारदात्तु गर्भस्थो हि महाप्रभुः ।
प्रकर्षाह्लादसंयुक्तो बभूव हरिवल्लभः ॥ ९० ॥
ततो ययौ मुनिश्रेष्ठः ब्रह्मलोकं तदा खग ।
अथो शुचिष्मती देवी सुषाव पुत्रमुत्तमम् ॥ ९१ ॥

वायुना च समाविष्टं हरिपादाब्जसंश्रयम् ।
हिरण्यकशिपुर्वीन्द्र पुत्रस्य विधिपूर्वकम् ॥ ९२ ॥

जातकर्म तदा चक्रे ब्राह्मणैर्मन्त्रकोविदैः ।
स्मृत्वा स्मृत्वा हरिं विष्णुं नारदस्योपदेशतः ॥ ९३ ॥

अत्याह्लादयुतो यस्मात् तस्माच्चक्रे पिता तदा ।
प्रह्लाद इति तन्नाम तत्स्वरूपमज........ ॥ ९४ ॥

महागुणैः सोऽपि प्रह्लाद एव ह्युपासकोऽभूद्गरुडध्वजस्य ।
श्रीविष्णुनिष्ठः शीलसम्पन्न एव जितेन्द्रियः सत्यसन्धो महात्मा ॥ ९५ ॥

स विष्णुवत्संबभूव द्विजेन्द्र सद्भक्तानामेक एव प्रियश्च ।
विष्णोः साम्यं चोच्यते यत्र कुत्र ब्रह्मादीनामुत्तमानांनृणां च ॥ ९६ ॥

किंचित्साम्यं चेरितं तद्धि विद्धि यावत्साम्यं विद्धि मत्स्यादिकानाम् ।
प्रह्लादस्याप्येतदेवं खगेन्द्र साम्यं हरेरुच्यते किंचिदेव ॥ ९७ ॥

यावत्साम्यं चासुरा एव वीन्द्र विजानन्ति तच्च वाक्यानुसारात् ।
अन्धन्तमः प्रविशन्त्येव सर्वे तथाऽज्ञानान्नात्र विचार्यमस्ति ॥ ९८ ॥

अतो विष्णोः साम्यमुक्तं खगेन्द्र प्रह्लादस्य विष्णुभक्तस्य नित्यम् ।
उद्विग्नचित्तो न बभूव नित्यं बभूव नित्यं व्यसनेषु निःस्पृहः ॥ ९९ ॥

अवस्तुदृक् चैव बभूव नित्यं शब्दादिषु सर्वगुणेषु वीन्द्र ।
नारायणे भगवति यस्य नैसर्गिकी रतिः ॥ १०० ॥

यदा च क्रीडते बालो हरिनिष्ठैकमानसः ।
ग्रहभूतेन हरिणा ग्रस्तः किंचिन्न वेद सः ॥ १०१ ॥

शयानः प्रपिबन्नश्नन्नासीनः पर्यटन् ब्रुवन् ।
न सस्मार ह चान्यानि गोविन्दपरिरम्भितः ॥ १०२ ॥

गोविन्दद्रुहिणो दृष्ट्वा दुःखयुक्तो बभूव ह ।
हरिं च दृष्ट्वा रुदति क्वचिच्च हसत्यथोद्गायति वर्तते च ॥ १०३ ॥

सन्त्यक्तलज्जो तलशब्दं च कुर्वन् गोविन्द दामोदर माधवेति ।
दृष्ट्वा स्वबालस्य विचेष्टितं च विचारयामास पिता महाप्रभुः ॥ १०४ ॥

केनास्य बुद्धिः प्रविनाशिता च यतश्च बालः परपक्षगोऽभूत् ।
प्रह्लादमद्धीर्यभवत्वमित्थं नमः शिवायेति वदस्व नित्यम् ॥ १०५ ॥

सदा द्रुहं मे हरिरूपिणं च स्मर्तव्यमेवं न कदाचन प्रभो ।
एवं स्वपुत्रं सान्त्वयित्वा खगेन्द्र ददौ च पुत्राय फलादिकं च ॥ १०६ ॥

यथैव क्रीडां प्रचकार पूर्वं तथैव क्रीडां प्रचकार सोऽपि ।
नारायणायेति मन्त्रं जपन्तं पुत्रं दृष्ट्वा प्रतताडास्य वक्त्रे ॥ १०७ ॥

पुत्रस्तु नष्टः किमु कर्तव्यमत्र विचारयामास पुनः पुनश्च ।
शण्डश्च मर्कश्च ह्युभौ च पुत्रौ काव्यस्यु दुष्टौ स्वपुरोहितस्य ॥ १०८ ॥

स दैत्यराजः स्वगृहान्तिके च दृष्ट्वा स्वपुत्रं च तयोः सदैव ।
वशं च कृत्वाऽपि प्रोवाच तौ पुनः नमः शिवायेति वदिष्यते यथा ॥ १०९ ॥

तथा कुरुध्वं मम बालकस्य सन्ताडयित्वा प्रविहाय शङ्काम् ।
सन्ताडयामासतुरेव तौ तं सुपाठयोग्यान् शिवनामादिकं च ॥ ११० ॥

यद्यद्धि चोक्तं गुरुणा तच्च सर्वं शुश्राव तं नैव पपाठ बालः ।
स ह्येकदा दैत्यकुमारकैश्च क्रीडन्तमेनं स्वाङ्कमारोप्य पुत्रम् ॥ १११ ॥

पप्रच्छ तात कथ्यतां मे महात्मन् संमन्यते यद्भवान् साधुलोके ।
एवमुक्तस्तु प्रह्लादः स्वपित्रा भगवान् वचः ॥ ११२ ॥

मेघगम्भीरया वाचा चोवाच पितरं प्रभुः ।

प्रह्लाद उवाच

मूढेश्वर दुर्विषयैर्निवेशात् गृहादिषु स्नेहयुजां च देहिनाम् ॥ ११३ ॥

संसारनिर्मूलनसाधनं च मन्ये माहं प्रापतमः प्रधान ।
वक्ष्याम्यहं तच्च श्रुणुष्व साधनं व्यर्थं च जातं तव जन्म मूढ ॥ ११४ ॥

स्वस्यैव नित्यं निरयेषु पातनं गृहान्धकूपं च सदैव हित्वा ।
गत्वा वनं सज्जनसंगमात्रकं नारायणं तारकमाश्रयेत ॥ ११५ ॥

प्रह्लादप्रोक्तं च हरेश्चतत्त्वं सुसज्जनानां च संशिक्षणार्थम् ।
न वै पितुर्ग्राहयितुं तदुक्तं तस्यासुरावेशदुराग्रहत्वात् ॥ ११६ ॥

श्रुत्वा स्वबालस्य वचो दुरात्मा जहास चोच्चं परपक्षगो यतः ।
बालस्य बुद्धिः परबुद्धिभिश्च विभिद्यते नात्र विचार्यमस्ति ॥ ११७ ॥

संधार्यतां गुरुगृहे च विशेषतश्च बालस्य बुद्धिर्हरितत्त्वविदां च मूढैः ।
भिद्यते नैवं तु यथा तथैव यूयं च मे प्रेमयुताश्च नेत्राः ॥ ११८ ॥

ते दैत्ययाजकभवाः परमादरेण श्रुत्वा हिरण्यकशिपोः पुरुषार्थहेतुम् ।
पृच्छन्त एव वचनैश्च सुसामभिश्च भक्तं हरेश्च हरिनामयुतं विशङ्कम् ॥ ११९ ॥

प्रह्लादवत्स कथयस्व ऋतं च तेऽद्य भद्रं भविष्यति मृषा न वदस्व तात ।
केनैव तेऽद्य भवतः परपक्षबुद्धिः संभण्यतां गुरुकुलेषु समुद्भवानाम् ॥ १२० ॥

स्वेनैव वाद्य भवतस्तव बुद्धिभेदः संभण्यतां च कुलनन्दन सद्गुरूणाम् ।
तैरेवमुक्तः प्रह्लादः नारायणपरायणः ॥ १२१ ॥

हसन्नुवाच विप्रांश्च दैत्यपक्षाश्रयान् खग ।

प्रह्लाद उवाच

शैवागमेषु कुशलाश्च मदीयवाक्यं श्रुण्वन्तु मोहितधियो हरिमाययैव ॥ १२२ ॥

विष्णोश्च सर्वविषयेषु सुकर्तृतां च सर्वश्रुतिस्मतिभिरेव सदागमैश्च ।
पुंसां पुनश्च परतः स्वत एव चेति प्रश्नस्तु मां प्रति न शोभत एव सम्यक् ॥ १२३ ॥

यस्माच्च बुद्धिरभवत् विपरीतजन्या तेनैव यान्ति तम एव च दैत्यवर्याः ।
भ्रान्त्या हिरण्यकशिपोश्च स्वतन्त्रतां च युष्माकमेव च तथैव च नान्यथा च ॥ १२४ ॥

मोक्षस्य नैव ह्युपयोगवती च मूढा अन्यो न चैव ह्यहमेव स्वतन्त्रबुद्धिः ।
जीवास्तु नारायणपादसंश्रया भिन्नाः सदा तदधीनाश्च नित्यम् ॥ १२५ ॥

संसारिणां संसृतिवर्जितानां स्वरूपसत्ता कर्तृता मोक्षभागः ।
अवस्थितिर्जीवगतं च सर्वमधीनमेव सर्वदा वै मुरारेः ॥ १२६ ॥

एवं हि सिद्धे परमाथतत्त्वे कुतः स्वातन्त्र्यं भवतां मूढविप्राः ।
मुह्यन्ति यद्वर्त्मनि वेदवादिनी रुद्रादयो हरिभक्ताश्च सर्वे ॥ १२७ ॥

विमुह्यतीव परिदृश्यते च ब्रह्मापि दैत्यांश्च विमोहितुं च ।
प्रसाद एवापि सदाऽस्ति तस्मिन् महाभागवते पूर्णगुरौ च वायौ ॥ १२८ ॥

अतश्च बुद्धिर्हि हरौ निरन्तरं निर्दोषयुक्ता विषयीकरोति ।
एतावदुक्त्वा विरराम बालः विप्राय मूढाय स्वपितुर्हिताय ॥ १२९ ॥

निर्भर्त्स्य तं तौ कुपितौ सुदीनावादाय वेत्रं च समूचतुस्ते ।
बालौ ह्ययं नैव सुपापबुद्धिरस्माकमेव ह्यवदत्संस्कृतश्च ॥ १३० ॥

अतोऽस्य दण्डं ताडनं नैव चान्यदेतावदुक्त्वा ताडयामासतुश्च ।
संगृह्य चैवाशु च दैत्यपुत्रं धर्मार्थकामांश्च सदा गुरुश्च ॥ १३१ ॥

संपाठयामास च दैत्यपुत्रं नमः शिवायेति च मन्त्रमुत्तमम् ।
ज्ञात्वा गुरुः पठितं चैव शिष्यं सन्दर्शयामास च दैत्यवर्यम् ॥ १३२ ॥

मात्राभिषिक्तं समलङ्कृतं च स्वपादमूले पतितं सुरद्विट् ।
दोर्भ्यां समुत्थाप्य चिरं स्वपुत्रं सम्यक् परिष्वज्य हरेश्च भक्तम् ॥ १३३ ॥

स्वाङ्कं समारोप्य सुतस्य मूर्धन्याघ्राय सोऽप्यश्रुकलाम्बुभिश्च ।
आसिंचयन्पुत्रमुवाच दीनः सन्ताडितं गुरुहस्तैश्च सम्यक् ॥ १३४ ॥

प्रह्लाद तातार्य च किंचिदुत्तमं तथा स्वधीतं च गुरोश्च शिक्षया ।
वदस्व सम्यक् परमादरेण कुलं मदीयं च समुद्धर त्वम् ॥ १३५ ॥

प्रह्लाद उवाच

विष्णौ च भक्तिर्नवलक्षणैर्युता शास्त्रे च यस्मिन्प्रतिपादिता च ।
पुंसा तु सा चोत्तमश्लोकविष्णोः समर्पिता धीरुत्तमं चैव मन्ये ॥ १३६ ॥

भक्तेः श्रुणु त्वं नवलक्षणं च भक्त्या श्रुतं मोक्षसुकारणं च ।
श्रुतं ह्यभक्त्या विपरीतसाधनं वक्ष्येऽप्यहं सज्जनानां च तर्तुम् ॥ १३७ ॥

सद्वैष्णवैः पठ्यमानं च शास्त्रं भक्त्या श्रुतं योग्यजनैश्च नित्यं ।
तमेवाहुः प्रथमं लक्षणं च भक्तेर्महाभागवतप्रधानाः ॥ १३८ ॥

सङ्कीर्तनं कीर्तियोग्यान् हरेश्च गुणांश्च नित्यं वैष्णवैः पठ्यमानम् ।
तदेव सङ्कीर्तनमाहुरार्या भक्तेर्द्वितीयं लक्षणं विद्धि दैत्य ॥ १३९ ॥

सद्वैष्णवैः क्रियमाणं च दैत्य विष्णोर्गुणस्मरणं विश्रुतं च ।
तदेवाहुः स्मरणं विष्णुभक्तास्तल्लक्षणं तृतीयं विद्धि भक्तेः ॥ १४० ॥

सद्विष्णुभक्तेः सेव्यमानं च नित्यं श्रीविष्णुपादादिसुसेवनं च ।
तदेव भक्तेर्लक्षणं वै चतुर्थं सद्वैष्णवैरर्चनं पंचमं च ॥ १४१ ॥

सद्वैष्णवैरात्मनिवेदनं च हरेः सदा ह्यष्टमं प्राहुरार्याः ।
सद्वैष्णवैः क्रियमाणं च सख्यं तदेवाहुः सप्तमं चैव विष्णोः ॥ १४२ ॥

सद्वैष्णवैरात्मनिवेदनं च हरेः सदा ह्यष्टमं प्राहुरार्याः ।
सद्वैष्णवैः क्रियमाणं च दास्यं विष्णोश्च तन्नवमं प्राहुरार्याः ॥ १४३ ॥

धर्मार्थकामांश्च विहाय दैत्य भक्त्या हरेः स्मरणं कार्यमेव ।
इदं च मन्ये ह्युत्तमं तात नित्यं ब्रह्मादयो विष्णुदासास्तथैव ॥ १४४ ॥

निशम्य पुत्रस्य वचो हि दैत्यः क्रोधाच्च गात्रं प्रचलन् सुपापः ।
उवाच चेदं गुरुपुत्रमेव रुषा च संप्रस्फुरिताधरश्च ॥ १४५ ॥

हिरण्यकशिपुरुवाच

हे ब्रह्मबन्धो कृतमेवं त्वयैव सत्पुत्रनाशं मामनादृत्य मूढ ।
लोके च सन्ति बहवो ह्यसाधवो न दृष्टपूर्वः सदृशस्त्वैव ॥ १४६ ॥

स एवमुक्तो गुरुपुत्रो महात्मा ह्युवाच दैत्यं च सुपापनिष्ठम् ।

शण्डामर्क उवाच

राजन् मतिस्तस्य स्वरूपभूता न मत्प्रणीता न परप्रणीता ॥ १४७ ॥

तस्माच्च मूढकतमाय च कुप्यसे त्वं गृहं त्वदीयं तु सदा त्यजामि ।
स एवमुक्तो गुरुपुत्रेण वीरः पप्रच्छ पुत्रं पुनरेव पापः ॥ १४८ ॥

गुरोर्मुखीयं न भवेत्सुपाप कस्माच्च ते ह्यसती भ्रान्तिबुद्धिः ।
स एवमुक्तो हरिभक्तवर्यो उवाच दैत्यं हि हरिं च स्मृत्वा ॥ १४९ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे प्रह्लादचरित्रे प्रह्लादं प्रति हिरण्यकशिपूक्तिर्नाम अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

॥ एकोनचत्वारिंशोऽध्यायः ॥

प्रह्लाद उवाच

सत्येव मूढमन्मतिस्त्वन्मतिस्तु ह्यतीव दुष्टा सत्प्रमाणैर्विरुद्धा ।
मतिर्ममास्ते गुरुशिक्षणाच्च नारायणे मत्प्रयत्नाच्च मूढ ॥ १ ॥

भवादृशानां गृहिणां च मूढ कदिन्द्रियैर्विषयांश्चैव दुष्टान् ।
भुञ्जानानां नास्ति कृष्णे मतिश्च नास्त्येव तेषां च गुरुप्रसादः ॥ २ ॥

ये दैत्यवर्यविषयेषु नित्यं प्रतीयमानेषु दुराशयास्तु ।
न ते विदुः स्वार्थगतिं हरिं च ह्यन्धा यथान्धैरुपनीयमानाः ॥ ३ ॥

वक्ष्याम्यहं मूढ गृहव्रतानां संसारकूपाच्च वितर्तुकामिनाम् ।
श्रुणु ह्युपायं विषयेषु निष्ठ काम्यादिधर्मांश्च विसृज्य नित्यम् ॥ ४ ॥

सन्न्यासिनां सद्गुरूणां च संगं श्रीविष्णुसर्वोत्तमंशंसकानाम् ।
तैरेव सज्ज्ञानमवाप्य राजन् संयास्यसि मोक्षगतिं च नान्यथा ॥ ५ ॥

श्रीविष्णुपादं गोपदं चैव हित्वा दुष्टान् विषयान् सर्वदा भोगिनां च ।
तेषां गतिर्नास्ति नास्त्येव मूढ पुनः पुनश्चर्वितचर्वणानाम् ॥ ६ ॥

एवं स्वपुत्रस्य वचोऽभिताडितो रुषा समाविष्टकषायलोचनः ।
पुत्रं च स्वोत्सङ्गत एव वीन्द्र निरस्य भूमौ स उवाच दैत्यः ॥ ७ ॥

सुवध्यतां नैर्ऋतां मे सुतं च ह्येनं च निःसारयत मत्सकाशात् ।
दुष्टश्च पुत्रस्त्याज्य एवाशु विद्वान् लोभाच्च न त्यक्ष्यति यो विमूढः॥८॥

सर्पेण दुष्टं च यथाङ्गमेव छित्वा सुखं यान्ति सुदुःखमन्यथा ।
तस्माद्धि चैष मम पक्षदूषको हन्तव्य एवेह बहुधैरुपायैः ॥ ९ ॥

तै नैर्ऋता दैत्यवर्येण वीन्द्र समुद्दिष्टा शस्त्रशूलासिपाणयः ।
समासीनं भूतले संस्मरन्तं नारायणं दुःखनिवारणं च ॥ १० ॥

सन्ताड्य नन्दन्त उरुक्रमेण छिन्दीति भिन्दीति च वादिनश्च ।
शूलादयस्ते च विचूर्णिताश्च गात्रे च भक्तस्य ह्यरीन्द्रपाणेः ॥ ११ ॥

हस्ताश्च तेषां च सुदुःखिता स्युस्तस्मान्निवृत्ता निर्क्रता विभग्नाः ।
क्व चास्ति दुःखं हरिपादसंगिनां क्व चास्ति भीतिः परतः कुदैवात् ॥ १२ ॥

यस्यास्ति नित्यं परमप्रसादस्तस्मिन्न चास्त्येव ग्रहादिपीडाः ।
यस्मिन् तृतीयस्थस्तथा चतुर्थस्तथाष्टमस्थः शनिरङ्गारको गुरुः ॥ १३ ॥

तथैव जन्मस्थद्वादशस्थाः पीडां न कुर्वन्ति च दासवर्गे ।
तषां क्व चास्ति परमा च शक्तिः संपीडने वै हरिभक्तस्य वीन्द्रम ॥ १४ ॥

तथैव दैत्येन्द्र चोवाच सूदान् तीक्ष्णं विषं चाशु ददध्वमंजसा ।
शुक्राच्च प्राप्तं च ह्यतीव दुःसहं ददुश्च ते भक्ष्यभोज्यादिकेषु ॥ १५ ॥

प्रह्लादस्तु स्वगुरोर्नारदस्य वायोश्च विष्णोः स्मरणाच्च वीन्द्रम् ।
भुक्त्वा चैव जरयामास सुष्ठु वृथैव जातश्च तदीययत्नः ॥ १६ ॥

दिने च तस्मिन् दैत्यवर्यस्य चाश्वो मृतश्च भक्तस्य च पीडनेन ।
तथाऽपि तन्मरणे चैव यत्नं चकार काले विपरीतबुद्धिः ॥ १७ ॥

तदा चोवाच हस्तिपं प्रीतियुक्तं शीघ्रं प्रह्लादं दिग्गजैर्हिंसि च त्वम् ।
स चापि वै दिग्गजानानयित्वा विसर्जयामास सुबालके च ॥ १८ ॥

गजाश्चैनं पीडयामासुरेते पदैर्दन्तैरङ्कुशैस्ताड्यमानाः ।
विशीर्णदन्ताः सुपलायिताश्च सन्ताड्यमाना अपि नाययुः पुनः ॥ १९ ॥

तस्मिन् दिने पट्टगजो मृतश्च विनाशकाले विपरीतबुद्धिः ।
तथापि मूढश्च पुनः प्रयत्नं चकार सूनोर्मरणाय पापः ॥ २० ॥

स कृष्णसर्पांश्च सुदुष्टदर्पान् विसर्जयामास च मन्त्रविद्भिः ।
दन्तैरेव सन्ददंशुश्च भक्तं विशीर्णदन्ताश्च ययुः पराभवम् ॥ २१ ॥

तस्मिन् दिने दैत्यवर्यस्य दन्ता भूमावपतन् सहसा पक्षिवर्य ।
आसन्नमृत्योश्च विशस्यमानं दृष्ट्वापि यत्नं पुनरेव चक्रे ॥ २२ ॥
गिरेर्हि सानोश्च ह्यधोनिपातनं चकार सूनोश्च ह्यतीव पापः ।
तथापि पुत्रो मरणं न चाप नारायणः पाति सुभक्तवर्यम् ॥ २३ ॥
तस्मिन् दिने दैत्यवर्यस्य वीन्द्र जुष्टं किरीटं ह्यपतद्भूतले च ।
तदा चोवाच गुरुपुत्रं स दैत्यः पाशैश्च बद्ध्वा ताडयित्वा च सम्यक् ॥ २४ ॥
संशिक्षयध्वं च सुतं मदीयं नो चेद्युष्मान् ताडयिष्यामि सम्यक् ।
शुक्रस्य पुत्रोऽपि पुनश्च तं प्रभुं संपाठयामास त्रिवर्गरूपम् ॥ २५ ॥
न साधु मेने च गुरोश्च शिक्षां गुरुर्गतः कर्तुमेव स्वकर्म ।
तदा प्रह्लादो दैत्यकुमारकांश्च क्रीडादिषु सक्तमनस्करूपान् ॥ २६ ॥
मदीयवाक्यं श्रुणुत दैत्यपुत्राः युष्मद्भद्रं भवितुं वच्मि भूयः ।
युष्माकमायुश्च गतं वृथैव क्रीडान्धतो मा कुरुध्वं सुपापम् ॥ २७ ॥
अयं गुरुर्नैव महान्सुपापी येनैव चोक्तं न वृणीत धीराः ।
संसारकूपाख्यसुवैतरिण्यां संपातितुं वः प्रदिशत्येव नित्यम् ॥ २८ ॥
अतो गुरूक्तं सुकुमारकाश्च न ग्राह्यमेवं सर्वथा पापरूपम् ।
ये [illegible]धहस्तं प्रतिगृह्य चान्धा यथा पतन्त्येव तथैव चायम् ॥ २९ ॥
[illegible]द्धेयं कुमतं तस्य चैव संश्रद्धेयं वायुमतं सदैव ।
न श्रद्धेयं नीतिशास्त्रं रसज्ञाः प्रवृत्तिशास्त्रं नापि वै सन्दधेयम् ॥ ३० ॥
उभौ च त्यक्त्वा मोक्षकामो महात्मा सुखी भवेन्नात्र विचार्यमस्ति ।

दैत्यकुमारा ऊचुः

सुनीतिशास्त्रश्रवणाद्दैत्यवर्य शत्रोः सकाशाद्रक्षिता वै भवेयुः ॥ ३१ ॥
मित्रादिभिः पालिताः वै भवेयुस्तस्मात्कथं तच्च हेयं सुशास्त्रम् ।
प्रवृत्तिशास्त्रश्रवणं कार्यमेव श्रेयोहेतुत्वात्तत्कथं त्याज्यमेव ॥ ३२ ॥
एवं चोक्तो दैत्यकुमारकैश्च ह्युवाच तेषां कर्तुकामो दयां च ।

प्रह्लाद उवाच

शत्र्वादिभिः सुखदुःखादिकं स्याध्येतन्मतं कस्य रीत्या वदध्वम् ॥ ३३ ॥

मदीयपक्षं न भवत्येव बालाः को वा शत्रुर्मन्यते दैत्यवर्याः ।
भवत्पक्षे केऽपि शत्र्वादयः स्युर्नकेऽपि तेषां नीतिशास्त्रैः फलं किम् ॥ ३४ ॥

दिष्टं दैवं भागधेयो हरिस्तु स दास्यति सुखदुःखादिकं च ।
सर्वे लोकाः स्वसुखार्थं च नित्यं यत्नं दधते न तु दुःखार्थमेष ॥ ३५ ॥

दुःखं यथाऽयत्नतो भाव्यमेव तथैव काले वर्तते सौख्यमेव ।
तस्मान्मूढा दैवसंज्ञं हरिं च जानीध्वमित्थं व्यर्थमायुर्गतं च ॥ ३६ ॥

प्रवृत्तिशास्त्रं नैव सेव्यं कथंचित् तेनैव पापं सम्यगाप्स्यन्ति मूढाः ।
वृथैव हिंसां संकरिष्यन्ति नित्यं शिश्नोदरार्थं नात्र विचार्यमस्ति ॥ ३७ ॥

तानेव धर्मान् हरिप्रीत्यर्थमेव निष्कामबुध्या दुर्लभास्तेऽपि लोके ।
अतो धर्मान् भागवतान् भजध्वं ह्यायुर्वृथा न तु कार्यं सदापि ॥ ३८ ॥

यो वा लोके धर्मकामार्थमेवं पीडां स्वात्मनि न करोत्येव नित्यम् ।
स दुर्लभो हरिधर्मैकनिष्ठः सर्वे काम्यादौ तत्पराः सन्ति लोके ॥ ३९ ॥

कुमारा ऊचुः

प्राप्स्यामहे भोऽसुरवर्यबाल बाल्ये विद्यां यौवनेऽपि स्त्रियश्च ।
वृद्धाप्यकाले मोक्षधर्मान् सदैव लप्स्यामहे चापि न संशयोऽत्र ॥ ४० ॥

प्रह्लाद उवाच

निवृत्तधर्मानाचरिष्याम एव वृद्धाप्यकाले सर्वदा किंच तेन ।
सुबाल्यमारभ्य हि दैत्यवर्या धर्मांश्च प्राज्ञो ह्याचरेद्वैष्णवांश्च ॥ ४१ ॥

यन्मानुषं जन्म सुदुर्लभं च तत्रापि ज्ञानादिप्रयोजनप्रदम् ।
अनेकजन्मार्जितपुण्यसाध्यं अनित्यभूतं तु विदुः सुबालकाः ॥ ४२ ॥

यदीदृशं जन्म सुदुर्लभं च सद्वैष्णवज्ञानसाध्यं कुमाराः ।

कुमारा ऊचुः

मनुष्यमात्रं जन्म दैत्येन्द्रवर्य ज्ञानप्रदं किं न तथैव दृश्यते ॥ ४३ ॥
सत्यं च नास्त्येव समस्तदेहिनां अदर्शनादश्रवणात्कथं वद ।

प्रह्लाद उवाच

मनुष्यदेहे यदि चेद्बुभुत्सा विष्णोश्च तत्त्वे हरिशुश्रूषणे च ॥ ४४ ॥
तर्ह्येव सौख्यं बहुलं नराणां दिने दिने वृद्धिरेवेह सत्यं ।
अतः कुमारा मानुषीं योनिमेव निःश्रेयसः कारणं नान्यदेव ॥ ४५ ॥

कर्तव्या सर्वदा विष्णोः सेवा श्रेयःप्रदायिनी ।
श्रेयस्करा नान्यसेवा भूतानामप्रिया यतः ॥ ४६ ॥

विष्णुस्तु सर्वभूतानां प्रियत्वादीश्वरः सुहृत् ।
अतो हि विष्णुरेवैकः सर्वश्रेयस्करः सदा ॥ ४७ ॥

तस्मात्स हरिरेवैको सेव्य एव न संशयः ।
दैवादेव सुखं दुःखं दारापत्यधनादिकं ॥ ४८ ॥

तदर्थं नैव कर्तव्यः आयासो दैत्यनन्दनाः ।
आयुर्गतं व्यर्थमेव कदा यास्यति मानुषम् ॥ ४९ ॥

यावच्छरीरं सबलं चैव पुष्टं रोगैर्विहीनं मरणाख्यां विपत्तिम् ।
नाप्नोति तावच्च भजेच्च मूढा नारायणस्यैव पदारविन्दम् ॥ ५० ॥

पुंसश्चाहुर्वर्षशतं समाहुर्गतं चार्धं निद्रया ह्यन्धवच्च ।
बाल्ये गतं मूकभावेन चायुः कुमारभावे क्रीडतो याति मूढाः ॥ ५१ ॥

कामेन मोहेन बलीयसा च ह्यभूतपूर्वेण बलीयसा च ।
गृहेषु सक्तस्य वृथापयाति चायुस्तथा जरया ग्रस्तगात्रे ॥ ५२ ॥

अनर्घ्यकोशेषु गृहेषु पुत्र दारेषु पश्वादिषु मित्रकादिषु ।
आसक्तभूतो ह्यजितेन्द्रियश्च स्नेहाख्यपाशैश्च दृढैर्निबद्धः ॥ ५३ ॥

को वा विमोक्तुं च समुत्सहेत संसारपाशं स्नेहशतैर्युतं च ।
द्रव्यादितृष्णां पुत्रभार्यादितृष्णां गरीयसीं विसृजेत् कोऽपि लोके॥ ५४ ॥
प्रेमास्पदायाश्च कथं स्त्रियायाः संग को वा विसृजेद्धि स्नेहम् ।
तस्याश्च मन्त्रान् रुचिरांश्च वाक्यान्यौपस्थजैह्वयं ह्यधरासवं च ॥ ५५ ॥
यो वा सुतस्नेहयुतः सुतानां कलाक्षराणामनुरक्तचित्तः ।
स्नेहं च तस्मिन् विसृजेत्कथं वा प्रेमास्पदानां सुहृदां सुमैत्रीम् ॥ ५६ ॥
गेहान् सुदिव्यान् रुचिरच्छदांश्च पुत्रार्जितांश्चैव वृत्तीः पशूंश्च ।
अक्षय्यरत्नाभरणानि कोशान् सुभृत्यवर्गान् पितरौ च दीनौ ॥ ५७ ॥
त्यजेत को वा ह्यवितृप्तकामः कथं विरज्येत दुराशयात्सदा ।
मत्तो न जानाति हि तं स्वकीयं कुटुम्बपोषाय नयन्निजायुः ॥ ५८ ॥
स्त्रीषु प्रसक्तो ह्यतिकामी स मूढः स दुःखयुक्तो न भवेद्विरक्तः ।
विद्वानसौ पुरुषोऽयं महात्मा क्रीडामृगो वामदृशां च स्त्रीणाम् ॥ ५९ ॥
आसां कथं मोचयितुं समर्थः.........................।*
तस्मात्सुदूरे च विसृज्य संगं सुदुर्जनेषु विषयात्मकेषु ॥ ६० ॥
नारायणस्यैव सदा च यूयं अत्यादराच्छरणं यात भक्त्या ।
नारायणं प्रीणयतो न चास्ति बह्वायासो नापि वित्तव्ययश्च ॥ ६१ ॥
दूर्वाङ्कुरैः पूजितो विष्णुरेव प्रीणाति नित्यं भक्तवर्ये दयालुः ।
इदं मदीयं चरितं स्वरूपं ज्ञानं च विज्ञानयुतं च शुद्धम् ॥ ६२ ॥
जातं गुरोर्नारदस्य प्रसादात् वरुणादिब्रह्मान्तगुरोः प्रसादात् ।
एवं च तेनोपदिष्टाः कुमारा ऊचुः प्रह्लादं विष्णुभक्तं महान्तम् ॥ ६३ ॥

कुमारा ऊचुः

इमे जन्मादिषड्भावा ईश्वरस्योच्यतेऽथवा ।
जीवस्याप्यथवाऽन्यस्य चैतद्विस्तृत्य नो वद ॥ ६४ ॥

---

* अतीव अस्पष्टः विशीर्णश्च ।

प्रह्लाद उवाच

उत्पत्तिरस्ति वृद्धिश्च परिणामो ह्यपक्षयः ।
विनाश इति षड्भावा न सन्ति परमात्मनः ॥ ६५ ॥

शरीरस्याभिमानाच्च स्वस्मिन् गृह्णाति सर्वदा ।
शरीरस्थोऽपि नृहरिर्न गृह्णाति यतो न हि ॥ ६६ ॥

तस्माज्जीवविशिष्टस्य देहस्यैव न चात्मनः ।
यथा वसन्तकाले च वने वृक्षादिकस्य च ॥ ६७ ॥

चूतादिसुफलानां तु कालाधीनत्वमेव च ।
प्रतीयते तथा नित्यं हर्यधीनत्वमस्य च ॥ ६८ ॥

कालस्य प्रेरको विष्णुः सर्वस्य प्रेरको यतः ।
अतश्चात्मा समुद्दिष्टः लक्षणैर्द्वादशैर्युतः ॥ ६९ ॥

जन्मादिकमतो नास्ति हरेर्नारायणस्य च ।
श्रुण्वन्तु तानि भो बाला लक्षणानि हरेः सदा ॥ ७० ॥

नित्योऽव्ययस्तथा शुद्धः एकः क्षेत्रज्ञः आश्रयः ।
अविक्रियः स्वदृग्वश्यो व्यापकोऽसंग्यनावृतः ॥ ७१ ॥

नित्यत्वादेः स्वरूपं च वक्ष्ये श्रुण्वन्तु चांजसा ।
स्वरूपतो यस्य नास्ति विनाशः सोऽव्ययः स्मृतः ॥ ७२ ॥

यस्य ह्यवयवादीनां व्ययो नास्ति स चाव्ययः ।
शरीरं प्राकृतं यस्य नैवास्ति सुकुमारकाः ॥ ७३ ॥

तज्जन्याश्चैव रागाद्याः अतः शुद्ध इतीरितः ॥
यो मुख्यः सर्वदा लोके स एको हरिरव्ययः ॥ ७४ ॥

क्षेत्राख्यस्य शरीरस्य स्वरूपप्रभया सदा ।
यो हि जानाति दैतेयाः स क्षेत्रज्ञ उदाहृतः ॥ ७५ ॥

सर्वदा तु शरीराणामाश्रयत्वात्स आश्रयः ।
स्वतश्च परतो वाऽपि परिणामविहीनतः ॥ ७६ ॥
अतश्च विक्रियः प्रोक्तः स्वात्मानं स्वयमेव वा ।
पश्यतीति स्वदृक् प्रोक्तो वशं यापयते यतः ॥ ७७ ॥
अतो वश्य इति प्रोक्तो बहिरन्तश्च सर्वशः ।
व्याप्तत्वाद्व्यापको विष्णुरसंगोक्तो ह्यसंगतः ॥ ७८ ॥
अज्ञानावरणाद्धीनो ह्यनावृत इतीरितः ।
एवं विधो हरिर्नित्यं पूर्वोक्तैर्लक्षणैर्युतः ॥ ७९ ॥
तस्यैव सर्वकर्तृत्वं तदधीनं च गात्रकं ।
तस्मिन् देहे ममत्वं च त्याज्यमेव न संशयः ॥ ८० ॥
शरीरादिविविक्तेन हरेर्ज्ञानं यथा भवेत् ।
तं प्रकारं च वक्ष्यामि श्रुणुध्वं दैत्यबालकाः ॥ ८१ ॥
निकषाश्मनि स्वर्णं च हेमकारो महाप्रभुः ।
संघर्षणाद्युपायैश्च प्राप्नोत्येव यथा तथा ॥ ८२ ॥
तदभिज्ञो मोक्षमिच्छुर्ज्ञानभक्त्याद्युपाधिभिः ।
देहेषु सम्यगालोच्य विविच्य हरिमव्ययम् ॥ ८३ ॥
ज्ञात्वा ब्रह्मगतिं चैव प्राप्नोत्यध्यात्मवित्सदा ।
आत्मानं परमात्मानमधिकृत्यैव वर्तनम् ॥ ८४ ॥
अतो वेदान्तशास्त्रं च ह्यध्यात्मं समुदाहृतम् ।
यस्तत्सम्यग्विजानाति स एवाध्यात्मवित्स्मृतः ॥ ८५ ॥
सात्विकादिस्वभावो हि चाध्यात्मं परिकीर्तितम् ।
यस्तद्वेत्ति महाभागः स एवाध्यात्मवित्स्मृतः ॥ ८६ ॥
महाभूतादिचाध्यात्मं यस्तद्वेत्ति सदैव च ।
स चैवाध्यात्मिकः प्रोक्तः सर्वशास्त्रेषु सर्वदा ॥ ८७ ॥

तानि भूतानि वक्ष्यामि श्रुण्वन्तु ह्यंजसाऽसुराः ।
मूलप्रकृतिरेकं तु महत्तत्वं द्वितीयकम् ॥ ८८ ॥
अहंकारं तृतीयं तु पृथिव्यादि च पंचकम् ।
एवमष्टौ प्रकृतयः ज्ञातव्या नात्र संशयः ॥ ८९ ॥
सत्त्वादीनां च प्रकृतावन्तर्भावविवक्षया ।
अष्टौ प्रकृतयः प्रोक्ता विकाराः षोडश स्मृताः ॥ ९० ॥
तान् श्रुण्वन्तु महाभागा इन्द्रियाणि दशैव तु ।
मनस्त्वेकं च शब्दादिविषयाः पंच वै स्मृताः ॥ ९१ ॥
पंचविंशोऽभिमानी च जीव एव प्रकीर्तितः ।
षड्विंशो हरिरेवैको नात्र कार्या विचारणा ॥ ९२ ॥
चतुर्विंशतिसत्तत्त्वैर्देहोऽयं निर्मितोऽभवत् ।
जीवो विष्णुश्च तत्रैव चास्ते देहे न संशयः ॥ ९३ ॥
देहेऽस्मिन् पुरुषा धीरास्तत्त्वेभ्यो दैत्यसत्तमाः ।
विविच्य परमात्मानं ज्ञातव्यं नात्र संशयः ॥ ९४ ॥
तत्त्वाभिमानिदेवेभ्यस्तथैव च कुमारकाः ।
कया हरिं विमृग्येत इत्यत्रापि ब्रवीम्यहम् ॥ ९५ ॥
यत्र यत्र जगत्तत्र हरिरास्ते स चान्वयः ।
यत्र यत्र हरिः साक्षात् तत्र तत्र जगन्नहि ॥ ९६ ॥
अन्वयव्यतिरेकेण निश्चितेनैव मानसा ।
विमृग्यात्सर्वदा ज्ञानी देहे नारायणं परम् ॥ ९७ ॥
व्याप्तिबोधकमानं च श्रुतिं वक्ष्ये कुमारकाः ॥

इन्द्रो वै बलिं ददाति । प्रजापतेरात्मानं परिददाति सर्वं को न ह्यात्मा किं ब्रह्मेति श्रुतेः । यतो वा इमानि भूतानि जायन्ते ये न जातानि जीवन्ति ॥

सुविचारं च कुर्वद्भिर्जानीयाद्धरिमव्ययम् ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ ९८ ॥
इत्यादिलक्षणैर्नित्यं वर्णयेद्धरिमव्ययम् ।
जाग्रदाद्या ह्यवस्थाश्च जीवस्यैव कुमारकाः ॥ ९९ ॥
जीवेनैवानुभूयन्ते हरिणा प्रेरितेन च ।
नतु कालादिकं सर्वं तत्र कारणमीरितम् ॥ १०० ॥
जाग्रदादेः परो द्रष्टा नारायण इति स्मृतः ।
सुखदुःखभुजो जीवाः परो नारायणो हरिः ॥ १०१ ॥
स तु विश्वादिरूपेण ह्यास्ते देहे सदा हरिः ।
जीवेन सहावस्थानाज्जीवधर्मवदीर्यते ॥ १०२ ॥
न तु जीवस्य तादात्म्यात् बुद्ध इत्यादि चोच्यते ।
यथा वायुः सुष्ठुदुष्टगन्धसंसर्गयोगतः ॥ १०३ ॥
सुष्ठु दुष्टो मिश्रगन्धो वायुश्च व्यवह्रियते ।
तादात्म्यं तावता वायोर्न गन्धेन कुमारकाः ॥ १०४ ॥
जीवेन सहावस्थानाज्जीवधर्मबलादपि ।
तथा विश्वादयः सर्वे जीवाद्भिन्ना न संशयः ॥ १०५ ॥
तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्चत्यच्चाभवत् ।
इति श्रुतिबलाच्चैव देहादेश्च हरेः सदा ।
संपर्कोऽस्त्येव तावच्च दोषो नैव हि चिन्तयेत् ॥ १०६ ॥
तथैव चिन्तनाद्बाला अधो यान्ति न संशयः ।
अभेददर्शनं पुंसः संसारस्यैव कारणम् ॥ १०७ ॥
अभेददर्शनं हेतुर्गुणकर्मनिबन्धनः ।
कर्मादिबन्धने हेतुरज्ञानं परिकीर्तितम् ॥ १०८ ॥

अभेददर्शनाद्याति तमो नास्त्यत्र संशयः ।
राजाऽहं वदता मार्गे ह्यनर्थः प्राप्यते यथा ॥ १०९ ॥

तथा विष्णुश्चाहमिति वदतः पापकर्मणः ।
यथा स्वप्ने शिरच्छेदः स्वयं कृत्वा मनोवशः ॥ ११० ॥

ततो दुःखमवाप्नोति तथा जागर्तितेऽपि तु ।
जानन्नप्यात्मनो दुःखं अवशस्तु प्रवर्तते ॥ १११ ॥

मनोमयत्वात्स्वप्नस्य न मिथ्यात्वमुदीर्यते ।
अभेददर्शनं यस्माद्गुणकर्मनिमित्तजम् ॥ ११२ ॥

तस्मान्निर्मूलनायैव संसारस्य कुमारकाः ।
उपायस्तत्र कर्तव्यो भवद्भिः शिक्षितैन्द्रियैः ॥ ११३ ॥

तत्रोपायाः सन्ति सहस्रमेव हरेरुक्तं सदुपायं ब्रवीमि ।
श्रुण्वन्तु सर्वे दैत्यकुमारकाश्च ह्यत्यादराद् हृदि धार्यं सदा हि ॥ ११४ ॥

यदि नारायणे भक्तिः स्यात्सदा नान्यथा रतिः ।
तदेवालं च संसारः सम्यङ् निर्मूलनाय च ॥ ११५ ॥

साधनानि च भक्तेश्च सर्वे श्रुण्वन्तु बालकाः ।
गुरुशुश्रूषया भक्त्या भक्तिर्भवति वै हरौ ॥ ११६ ॥

सर्वलाभार्पणेनैव भक्त्या नारायणे सदा ।
संगेन विष्णुभक्तानां द्रोहिणां वाप्यसंगतेः ॥ ११७ ॥

अवैष्णवानां दानस्य विधुराद्धर्धते हरौ ।
महत्सेवां द्वारमाहुर्विमुक्तेः तमोद्वारं योषितां संगिसंगम् ॥ ११८ ॥

तस्मात्सेव्यो महतां संग एव त्याज्यं योषित्संगिनां संगिसंगम् ।
पञ्चरात्रोक्तमार्गेण चेश्वराराधनेन च ।
पञ्चकाले दैत्यबाला हरौ भक्तिः प्रजायते ॥ ११९ ॥

पञ्चकाले हरेः पूजाप्रकारं च ब्रवीम्यहम् ।
प्रातःकाले हरिमुद्दिश्य चैव स्नानं सन्ध्या सत्कथापूर्वकं च ॥ १२० ॥

सम्यक्कार्यं चाहुरार्याः कृतं हि विष्णावेव चार्पितं स्याद्यदा हि ।
मध्याह्नकाले षोडशैश्चोपचारैः पूजां कुर्यात्प्रतिमायाश्च विष्णोः ॥ १२१ ॥

तदाप्यहं पूजनं वै मुरारेः कथापूर्वं ह्यर्पितं चापि विष्णौ ।
अपराह्णे वै वैश्वदेवं बलिं च दद्यादग्नौ विष्णुबुध्या महात्मा ॥ १२२ ॥

हरेः कथापूर्वकं भोजनं च कर्तव्यमेवं ब्रह्मणा वैष्णवाश्च ।
तदेवाहुः पूजनं दैत्यवर्याः कृतं सर्वं चार्पितं यत्सदा हि ॥ १२३ ॥

सायंकाले वन्दनं कार्यमेव सत्सन्ध्यायाः सुष्ठु चोपासनं हि ।
हरेः कथाश्रवणं चापि कार्यं यामावधिर्भक्तिपूर्वेण नित्यम् ॥ १२४ ॥

इदं चाहुः पूजनं दैत्यपुत्राः कृतं सर्वं चार्पितं यत्सदा हि ।
एवं चाहुः पञ्चकाले च पूजां हरौ भक्तेर्वर्धनं साधनं च ॥ १२५ ॥

सर्वदा पञ्चकालेऽपि श्रद्धया परमात्मनः ।
कथायाः श्रवणेनैव हरौ भक्तिः प्रजायते ॥ १२६ ॥

नारायणस्यैव सुपूर्णशक्तेः संकीर्तनैर्गुणकर्मादिकानाम् ।
नारायणे वर्धते भक्तिरेव संसारपाशच्छेदने चैव दक्षः ॥ १२७ ॥

संचिन्तयेद्भगवतश्चरणारविन्दं ध्यानाद्भवेद्भक्तिविवर्धनं च ।
तथैव विष्णोः प्रतिमायाश्च नित्यं ईक्षा भवेद्भक्तिरेवं सदैव ॥ १२८ ॥

प्रदक्षिणान्नमनाच्चापि विष्णौ भक्तिर्भवेद्भक्तिपूर्वं कृतं चेत् ।
एवं च क्रियमाणे वै अरिषड्वर्गनिर्जिते ॥ १२९ ॥

नारायणे भगवति क्रियते भक्तिरेव वै ।
यथा रतिं स लभते परे नारायणेऽमले ॥ १३० ॥

श्रुण्वन् सुभद्राणि रथाङ्गपाणेः सृष्टयादिकर्माणि विचित्रकाणि ।
वीर्याणि कंसस्य वधादिकानि कृतानि विष्णोरवतारांश्च नित्यम् ॥ १३१ ॥

यदा प्रहर्षात्पुलकाश्रुगद्गदः प्रोत्कण्ठ उद्गायति रौति नृत्यति ।
कुर्वन्त इत्यादिकमेव केचित् भक्ता न सर्वे बहुभेदयुक्ताः ॥ १३२ ॥

केचिच्च भक्ताश्च हरेर्मुरारेरुद्गानने ह्यान्तरे भक्तिमेव ।
नित्यं कुमाराः प्रकटीकृत्य केचिद् संरोदनाद्यश्रुपाताच्च नित्यम् ॥ १३३ ॥

भक्तश्च कश्चिन्नर्तते चैव दैत्यास्तूर्ष्णीं हरेर्भजने चैव केचित् ।
केनिच्च भक्ता ह्यर्चनेनैव नित्यं केचिच्च विष्णोर्वन्दनाच्चैव ध्यायन् ॥ १३४ ॥

मुहुर्मुहुर्हसनाच्चैव केचित् केचिच्च गात्रैर्वर्धमानैश्च नित्यम् ।
यदा च भक्तिर्वर्धमाना हि नित्यं पदारविन्दे नृहरेश्चापि विष्णोः ॥ १३५ ॥

तदा हि भक्ता मुक्तसंगास्तु बन्धात् सद्भक्तिभावात्कृतचर्यास्तु ते वै ।
निर्दग्धबीजाश्च भवन्ति दैत्याः संस्काररूपा वासनाख्याश्च नित्यम् ॥ १३६ ॥

तन्नाशनान्नष्टसंसारचक्रादानन्दरूपाः प्रभवन्ति नित्यम् ।
अतो भजध्वं हृदये दैत्यवर्या नारायणं दुःखनिवारणं च ॥ १३७ ॥

नृणां यथा जाह्नवीस्नानमेव दुःसाधनं बहुद्रव्यादिजन्यम् ।
को वा प्रयासश्च तथा मुरारेरुपासने वसतो हृत्सु नित्यम् ॥ १३८ ॥

विहाय तं नीतिशास्त्रैः किमेभिः प्रवृत्तिशास्त्रैः कुर्वतः सार्थकं च ।
किं राज्यभोगैश्चश्चलैश्चैव दैत्याः किं वा कलत्रैः पशुभिः सुतैश्च ॥ १३९ ॥

गृहैर्महीकुंजरकोशवित्तैः सर्वैश्च कामैः क्षणभंगुरायुषैः ।
संपादनेनैव गतं हि चायुः वृथैव पुंसां दुर्लभं मर्त्यलोके ॥ १४० ॥

अनर्थभूतैः कोशराज्यादिभिश्च संपादनाद् बहुदुःखं प्रयाति ।
अनर्थभूतैरर्थवद्दृश्यमानैः कण्डूतिवत्सुखरूपैः सुदुःखैः ॥ १४१ ॥

द्रव्यादिकं नैव संपाद्यमेव हरिप्रीत्यर्थं नैव प्रीणाति तेन ।
नारायणप्रीतिकृते कुमारा नैवाचारो नापि बहुज्ञता च ।। १४२ ।।
दानं तपो नैव न चेज्यता च न वै शौचं नापि कृच्छ्रादिकं च
न वै जपो नापि सौन्दर्यमेव बहुज्ञता नाध्ययनादिकं च ।। १४३ ।।
ततो भक्त्या प्रीयते केशवोऽलं ह्यन्यत्सर्वं लोकविडम्बनं च ।
तस्माद्भक्तिं कुरुत दानवेन्द्राः नारायणे सर्वदा वै दयालौ ।। १४४ ।।
मोक्षं गताश्चापि भक्त्या कुमारास्त्रियः शूद्रा यक्षरक्षांसि चैव ।
खगा मृगाः पशवः पापजीवाः दैतेयाश्च वृक्षजीवादयश्च ।। १४५ ।।
कुर्यात्तस्माद्भक्तिरेवं सदैव ह्यनन्तबाहौ दुःखपाशाद्धि मोक्तुम् ।
ते दैत्यपुत्रा वर्णितं तेन सम्यक् श्रुत्वा जगृहुश्चादरेणैव योग्याः ।। १४६ ।।
अवद्यत्वात् गुर्वनुशिक्षितं च नागृह्लंश्च हरितत्त्वैकनिष्ठाः ।
शण्डश्च मर्को दैत्यकुमारकाणां हरौ भक्तिं सुदृढां संस्थिता च ।। १४७ ।।
आलक्ष्य तान् भक्तियुतान् महात्मा शीघ्रं गत्वा राज्ञ आवेदयत्सः ।
श्रुत्वा सर्वं दैत्यवर्यो महात्मा पुत्रं चामुं दुःसहं पापमूढः ।। १४८ ।।
कोपावेशाच्चालयन् गात्रमेव पुत्रं हन्तुं मनसि सन्दधार ।
पुत्रं प्रह्लादं परुषया चैव वाचा संप्रक्षिपन् प्राह सन्दह्यमानः ।। १४९ ।।

हिरण्यकशिपुरुवाच

*.............................

तस्माद्ब्रूहि सुबलं तस्य मूढ यस्याश्रयात्त्वं च हीत्थं करोषि ।। १५० ।।

प्रह्लाद उवाच

नारायणो मे सर्वदा मूढबुद्धे बलं नित्यं भक्तवर्ये दयालुः ।
न केवलं मे भगवान्वासुदेवः भवतश्चापि स्वमलं सर्वदैव ।। १५१ ।।

---

* अपपाठादिना अस्पष्टः पाठः ।

न केवलं मे भवतश्चापि नित्यं स वै बलं बलिनां चापरेषाम् ।
न केवलं बलिनां चापरेषां त्वद्रुद्रदेवस्य बलं मुरारिः ॥ १५२ ॥

न केवलं रुद्रदेवस्य मूढ पितुः शिवस्यापि बलं बलीयान् ।
न केवलं ब्रह्मणो मूढबुद्धे तस्यैव मातुर्बलमाहुर्हरिं च ॥ १५३ ॥

न तस्याहुर्बलमन्यत्कदापि पूर्णस्य लीला को हि लोके च वेद ।
ब्रह्मादयो ये स्थिरजंगमा हि नारायणेनैव वशं प्रणीताः ॥ १५४ ॥

त्यक्त्वाऽसुरं भावमिमं स्वमात्मनः नारायणं शरमं संव्रज त्वम् ।
तेनैव त्वं चेह परत्र लोके संयास्यसि परमं सौख्यमेव ॥ १५५ ॥

इत्युक्तोऽसौ दैत्यवर्यो महात्मा पुत्रं प्रह्लादं प्राह संक्रुद्ध एव ।
अद्यैव त्वं मर्तुकामोऽसि पुत्र यतोऽस्माकं पुरतो जल्पसीत्थम् ॥ १५६ ॥

मदन्योऽपीश्वरः क्वास्ति दर्शयस्व तवेश्वरम् ।
तस्मिन् संक्रुद्ध एवासौ कृपाणं जगृहेऽसुरः ॥ १५७ ॥

वायुरेव तदाऽऽगत्य पक्षिरूपेण सादरम् ।
हिरण्यकशिपोरग्रे ह्युपविष्टोऽब्रवीद्वचः ॥ १५८ ॥

पक्ष्युवाच

मूढासुर त्यज दुष्टस्वभावं पुत्रं प्रह्लादं हरिभक्तं सुपुण्यं ।
शरणं व्रज हरिपादारविन्दं भजस्व नित्यमल्पमायुस्तवास्ति ॥ १५९ ॥

यामत्रयानन्तरं मूढबुद्धे मरिष्यसि नात्रविचार्यमस्ति ।
एवं चोक्तःपक्षिणा दैत्यवर्यः दहन्निव क्रूरदृष्ट्या खगं तम् ॥ १६० ॥

भो मूढपक्षिन् मामनादृत्य वाक्य विकत्थसे ह्यतिमात्रं च दुष्टम् ।
न मे शङ्का श्रीपतेर्वै सकाशात् न गन्धर्वान्नापि यमाच्च सूर्यात् ॥१६१ ॥

नाग्नेर्न सोमान्नापि रुद्रादिकेभ्यो शंका च नैवास्ति सदैव पाप ।
सर्वेषां वै जगतां मूढपक्षिन् सुमारकोऽहं नैव मन्मारकोऽस्ति ॥ १६२ ॥

त्वं चाद्य वै मर्तुकामोऽसि पक्षिन् अनादृत्य ह्यतिमात्रं ब्रवीषि ।

पक्ष्युवाच

प्रलापयुक्तं वचनं किमर्थं प्रभाषसे त्वं ह्यगणय्य मृत्युम् ॥ १६३ ॥
अशक्यकार्ये चोद्यमं चैव व्यर्थं भजस्व मूढ हरिपादारविन्दम् ।
नो चेत्त्वदीयं गात्रमेवाद्य द्रक्ष्ये रक्तोक्षितं सुनखैर्दारितं च ॥ १६४ ॥
नारायणः स्वस्य चोरौ निधाय नखाङ्कुरैर्हृत्सरोजं तवाद्य ।
खनिष्यति नात्र विचार्यमस्ति सन्द्रक्ष्यसे मृत्युमेवापि मूढ ॥ १६५ ॥
हरिः स्वतन्त्रश्च तदन्यदेवाः सुसेवका एव च रुद्रपूर्वाः ।
मन्मारणे तव शक्तिः क चास्ति कुतस्तरां तव पुत्रस्य मूढ ॥ १६६ ॥
पूर्वप्रयासेन च किं प्रजातं पुनः प्रयासेन च किं भविष्यति ।
शिवोऽहमित्येव तवास्ति बुद्धिः तेनैव त्वं यास्यसि ह्युत्तमं तमः ॥१६७ ॥
मूढासुर यदि लोके हरस्तु सर्वोत्तमो यदि च स्यात्सदैव ।
रुद्रप्रसादाच्च तव प्रयासात् पुत्रो यदा मरणं स्याच्च सत्यम् ॥ १६८ ॥
अयं रुद्रो यदि वायोः सकाशात् यदा भवेदुत्तमो मूढबुद्धे ।
तव प्रयासात् मरणं प्रयातु न चेत् त्वमेव मरणं प्राप्स्यसे च ॥ १६९ ॥
यदा रुद्रस्य तव देवस्य नास्ति तदा तव किमु वक्तव्यमत्र ।
तेनैवमुक्तो दैत्यवर्यो महात्मा हन्तुं वायुं चाददे चापवर्यम् ॥ १७० ॥
सज्जं कृत्वा तत्र बाणं च दिव्यं सन्धाय मूढः कर्णपर्यन्तमेव ।
आकृष्य सम्यक् प्रमुमोच तस्य तदा पक्षी नाप कांचित् क्षतिं च ॥ १७१ ॥
उवाच चैनं दैत्यवर्यं च पक्षी तवेशत्वं भग्नमद्यैव जातम् ।
तवैव बाणस्य ममाद्य पातने शक्तिर्न चैव तव प्रेरितस्य ॥ १७२ ॥
तेनैवमुक्तो प्राह दैत्यो महात्मा हनिष्ये त्वामभिमन्त्र्यास्त्रमग्नेः ।
अग्नेरस्त्रं चाभिमन्त्र्यैव बाणे मुमोच बाणं पक्षिवर्ये महात्मा ॥ १७३ ॥
तदा पक्षी चागतं सन्दहन्तं पपौ बाणं ह्यवदच्चापि तं च ।

तवेशत्वं कुत्र पलायितं च भजेशपालं ब्रह्मदेवादिवन्द्यम् ॥ १७४ ॥

एवं चोक्तो दैत्यवर्यस्तु मूढः संक्रुद्धः सन् पाशुपतास्त्रमाददे ।
संमन्त्रयित्वा शरवर्ये च मूढः मुमोच तस्मिन् प्रापयितुं च मृत्युम् ॥ १७५ ॥

आयान्तमीक्ष्यैव स पक्षिराजो पपौ चास्त्रं वदनेनापि तं च ।
पलायितः कुत्र रुद्रो महात्मा तवेश्वरो भज विष्णुं च देवम् ॥ १७६ ॥

पुत्रं प्रह्लादं च सुभक्तवर्यं संप्रीणयस्व नात्र विचार्यमस्ति ।
अतोऽन्यथा नाशमुपैषि मूढ इत्येवमुक्त्वा प्रययौ च पक्षी ॥ १७७ ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे प्रह्लादचरित्रे पक्षिरूपधारिवायुवाक्ये एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

॥ चत्वारिंशोऽध्यायः ॥

श्रीकृष्ण उवाच

पक्षिणश्च वचः श्रुत्वा कोपाकुलितमानसः ।
मेने विष्णोः प्रतीकानि द्विजगोऽग्निवनानि च ॥ १ ॥

वृन्दावनं च ह्यश्वत्थं शालग्रामादयस्तथा ।
एतेष्वाच्छिद्यमानेषु स्वयं विष्णुर्विनश्यति ॥ २ ॥

एवं विचिन्त्य मनसा दानार्थं चागतं द्विजम् ।
क्रुद्धो जघान तं विप्रं खड्गेन खगसत्तम ॥ ३ ॥

तथा जघान खड्गेन गृष्टिं च स्वगृहे स्थिताम् ।
ताडयित्वा पदा सम्यक् वृन्दावनमपातयत् ॥ ४ ॥

चिच्छेदास्वत्थवृक्षं च ह्यग्निं चाशमयत्प्रभुः ।
शालग्रामं च पाषाणैश्चूर्णयामास मूढधीः ॥ ५ ॥

नारायणोऽपि दैत्यस्य ह्यनयं चासहत्प्रभुः ।
हस्ते गृहीत्वा खड्गं च ह्यूचे वै पुत्रमंजसा ॥ ६ ॥

तव विष्णुः क्व चास्तीति ब्रूहि मे कुलनाशन ।
सर्वत्राधिष्ठितोऽस्तीति यदि त्वं च ब्रवीषि हि ॥ ७ ॥

स्तम्भे न दृश्यते कस्माद्वद मूढ कुलाधम ।
यदि चात्र न दृश्येत शिरः कायाद्धरामि ते ॥ ८ ॥

एवमुक्तस्तु दैत्येन प्रह्लादश्चापि तद्ग्रहः ।
अत्रैव वर्तते विष्णुः स्तम्भे दैत्यकुलाधम ॥ ९ ॥

तवान्तकश्च नृहरिर्भक्तानां परिपालकः ।
एवं दुरुक्तैर्मुहुरर्द्यमानः सुतेन दैत्यो हरिमूषकेण ॥ १० ॥

वरासनादुत्पतितो महासुरः स्तम्भं तताडातिबलः स्वमुष्टिना ।
तदैव तस्मिन्नभवत्सुघोरः शब्दः सुघोराण्टकटाहमस्फुटत् ॥ ११ ॥

श्रुत्वा निनादं च ह्यजादयः सुराः समागमंस्तत्र च द्रष्टुमुत्सवम् ।
दिदृक्षवश्चक्षुरलं नभस्तलं विमानमारुह्य स्वदारपुत्रैः ॥ १२ ॥

प्रह्लादवाक्यं च ऋतं विधातुं व्याप्तिं चस्वस्य ह्यखिलेषु नित्यं ।
अदृश्यतात्यद्भुतरूपमुग्रं स्तम्भे सभायां न मृगं न मानुषम् ॥ १३ ॥

नायं मृगो नापि नरः किमेतन्मीमांसमानः स ययौ समीपम् ।
भयङ्करं रूपमनूपमं च प्रतप्तजाम्बूनदतिग्मलोचनम् ॥ १४ ॥

सुतीक्ष्णदंष्ट्रं च करालजिह्वं करालदंष्ट्रं भ्रुकुटीमुखोल्बणम् ।
दृढोर्ध्वकर्णे गिरिगह्वरास्यवद् व्यात्तास्यनासापुटसंयुतं च ॥ १५ ॥

कपोलतीक्ष्णेन विभीषणं च दिवं स्पृशत्कायभयानकं च ।
अदीर्घग्रीवं पृथुवक्षःस्थलं च सुसूक्ष्मरूपं सुनखायुधं च ॥ १६ ॥

तनूरुहैररुणैश्चैव व्याप्तं व्याप्तैर्भुजैः शतशश्चैव युक्तम् ।
सुदर्शनाद्यैश्च दुरासदं च सुविस्फुलिङ्गाश्च मुखैर्वमन्तं ॥ १७ ॥

विद्राव्यमाणं च नखप्रवेकैर्महासुरान् दानवयूथयूथपान् ।
दृष्ट्वा हरिं दैत्यवर्यो महात्मा ह्ययं च मे प्राणहरो हरिः स्मृतः ॥ १८ ॥

एवं ब्रुवन्नभ्यपतद्गदायुधो महानृसिंहं प्रति दैत्यवर्यः ।
आलक्ष्य दीपं च यथा पतङ्गो यथोरगस्ताक्ष्र्यमथागमद् द्रुतम् ॥ १९ ॥

बलादिरूपे च हरौ महात्मनि नैतद्विचित्रं च जगद्विलक्षणे ।
अथाभिपद्याभ्यहनन्महाहरिं महासुरो गदयाऽसौ रुषा च ॥ २० ॥

महासुरं सगदं पोथयन्तं गदाधरो ह्यगृहीन्मृत्युवच्च ।
स तस्य हस्ताद्गलितो महासुरो गरुत्मतो यद्वदहिस्तथैव ॥ २१ ॥

भ्रष्टोऽजसासौ ह्यवमन्यते च ह्यसाध्विदं मरणं मे ध्रुवं च ।
पुनश्चासावसुरावेशतश्च तं मन्यमानो निजवीर्यशङ्कितम् ।। २२ ।।

पुनश्च युद्धाय स मूढबुद्धिःसन्नद्धोऽभूत्संप्रगृह्याशु खड्गम् ।
तं शीघ्रवेगं प्रचरन्तमाशु तमुल्बणं जगृहे वासुदेवः ।। २३ ।।

अङ्के निधायैव नखैर्ददार सर्पं यथा गरुडो लीलयैव ।
विवृत्तनेत्रश्च कराललोचनः स्वजिह्वया लेलिहन् दैत्यवर्यम् ।। २४ ।।

अहन् तथा दैत्यवर्यानुगांश्च नखाख्यशस्त्रैमारितवान् सहस्रशः ।
सटावधूताश्च घनःपरापतन् ग्रहाश्च दृष्ट्या च विनष्टरोचिषः ।। २५ ।।

श्वासैर्हताः सप्त महासमुद्राः विचुक्षुभुर्दिग्गजास्त्यक्तवन्तः ।
अमुष्य वेगाच्च सुभूधराश्च तदा समुत्पेतुरितस्ततश्च ।। २६ ।।

देवाः समस्ताश्च तदा निशम्य प्रचण्डवक्त्रं नृहरिं ज्वलन्तं ।
प्रसूनवृष्टिं ववृषुर्मुदा युताः सुरस्त्रियो या हरिभक्तिवर्धिताः ।। २७ ।।

सुरादिका दुन्दुभयो विनेदिरे गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः ।
ब्रह्मादिदेवा ऋषयो महोरगाः सिद्धाश्च विद्याधरचारणाश्च ।। २८ ।।

सर्वे ह्युपव्रज्य हरिं च तुष्टुवुः सकिन्नराः किंपुरुषा महर्षयः ।
काला जयाद्या अपि विष्णुपार्षदाः पृथक् स्थिताः संस्तुवन्तः पृथक् च ।। २९ ।।

आदावजो नृहरिं चैव ईडे बद्धांजलिर्भावविवर्धितात्मा ।

ब्रह्मोवाच

नतोऽस्म्यहं त्वच्चरणारविन्दे अनन्तशक्तिश्च तवाद्य दृष्टा ।। ३० ।।
अनन्तवीर्यं च पराक्रमं ते ह्यनन्तसूर्याधिककान्तिसन्मुखम् ।
त्वद्भक्तवर्यस्य चाभीष्टमेव दत्वा च तं पाहि नृसिंहमूर्ते ।। ३१ ।।
त्वत्पुत्ररूपाश्च वयं महात्मन् कृपास्पदा एव निरंतरं तव ।
तात्कालिकीं भक्तिमपेक्ष्य देहि यथैव मित्रस्य यथैव भिक्षोः ।। ३२ ।।

अस्मासु प्रीतिस्तु यथैव चास्ति तथैव ते नास्ति च दैत्यपुत्रे ।
तात्कालिकीं दर्शयितुं च भक्तिं लोके च भक्तं प्रथितं च दर्शय ॥ ३३ ॥

रुद्र उवाच

महासुरो ह्यल्पकोपाद्धतश्च युगावसाने ह्युचितोऽयं च कोपः ।
अलङ्कुरु त्वं तनयं भक्तवर्यं पादारविन्दप्रणतं पाहि देव ॥ ३४ ॥

इन्द्र उवाच

वयं सुरक्षितास्त्वद्य भवता दैत्यसूदन ।
यज्ञेषु भगवानस्मान् प्रत्यानीतांस्त्वयानघ ॥ ३५ ॥

ऋषय ऊचुः

जानीमहे ज्ञानरूपं च ते तध्द्याविष्कृतं च भवतैव जगत्सु व्याप्तम् ।
पुनश्च तं दैत्यवर्येण नष्टं नृसिंहरूपेण पुनः समुद्धृतम् ॥ ३६ ॥

पितर ऊचुः

दत्तानि नोऽधिबुभुजे प्रसभं च दैत्यैः
श्राद्धानि तीर्थसमयेऽपि तिलान् सहाद्भिः ।
दैत्यं निहत्य नखरैश्च नृसिंहरूप
श्राद्धानि चाध्यगमयश्च वयं नताः स्मः ॥ ३७ ॥

सिद्धा ऊचुः

दैत्यश्च नो योगसिद्धामहर्षी अणीमादींश्च कृच्छ्रचान्द्रयणेन ।
....॥ ३८ ॥

विद्याधरा ऊचुः

विलक्षणस्यैव हरेरखण्डतपोपासासमलब्धां च विद्याम् ।
न्यषेधदज्ञो बलवीर्यदृप्तो स येन संख्ये पशुवद्धतस्त्वया ॥ ३९ ॥

नागा ऊचुः

येनैव पापेन हृतानि नः प्रभो ह्यनर्घ्यरत्नानि हृताः स्त्रियश्च ।
तस्यैव वक्षोऽस्य विपाटनेन देह्यानन्दं सुठु चास्माकमीश ॥ ४० ॥

मनव ऊचुः

तवाज्ञाकारिणो नित्यं वयं च मनवः स्मृताः ।
सेवाविघ्नं प्रकुर्वाणः सूदितोऽद्य महाप्रभो ॥ ४१ ॥

गन्धर्वा ऊचुः

विष्णो वयं नटा नाट्याः गायकाश्च सदा तव ।
दैत्यवर्यबलादेव तदधीना गता वयम् ॥ ४२ ॥

चारणा ऊचुः

घातयित्वा दैत्यवर्यं मोचिताः स्म न संशयः ।
वयं चानन्दसंमग्ना नतोऽस्मोऽद्य दयां कुरु ॥ ४३ ॥

नृसिंह त्वत्पादसरोरुहं च मोक्षाय नित्यं च समाश्रिता वयं ।
तत्रैव विघ्नं ददतं च देत्यं निषूदयित्वाऽभिसंरक्षिताश्च ॥ ४४ ॥

यक्षा ऊचुः

दासा वयं ते सर्वदा वाहकाश्च दितेः सुतेन प्रापिता वाहकत्वम् ।
मृतो ह्यद्य नखजालैः सुपाप ह्यानन्दयुक्तास्त्वां स्तुताः स्मोऽद्य हीश ॥ ४५ ॥

किंपुरुषा ऊचुः

वयं तु पुरुषाभासा पुराणपुरुषोत्तम
अयं सुपापो नष्टश्च सज्जनैर्निन्दितो यतः ॥ ४६ ॥

विष्णुपार्षदा ऊचुः

वयं नृसिंहाद्य ह्यानन्दतृप्तास्त्वया सुधर्मः स्थापितो भूतले च ।
संमारितो दैत्यवर्यस्त्वयैव संपालितो भक्तवर्गो नृसिंह ॥ ४७ ॥

कृष्ण उवाच

ब्रह्मरुद्रादिदेवाश्च ऋषयो नारदादयः ।
संस्तुवन्तो हरेर्मन्युं शान्तं कर्तुम् न वै क्षमाः ॥ ४८ ॥

देवाः संप्रेषयामासुर्लक्ष्मीं शमयितुं हरेः ।
देवैः संप्रेषिता लक्ष्मीर्दृष्ट्वा तन्महदद्भुतम् ॥ ४९ ॥

अन्यैः साधारणैर्मर्त्यैर्ह्यदृष्टो ह्यश्रुतो यतः ।
कोपेन शंकिता लक्ष्मीर्नोपयायात्तदन्तिकम् ॥ ५० ॥

प्रेषयामास प्रह्लादं कञ्जयोनिर्महाप्रभुः ।
कुपितं पितरं वत्स मन्युं प्रशमय प्रभो ॥ ५१ ॥

ओमित्युक्त्वा नृसिंहस्य चान्तिकं शनकैर्ययौ ।
अदृष्टाश्रुतपूर्वं तं लक्ष्म्याश्च ब्रह्मणस्तदा ॥ ५२ ॥

नैव सञ्चिन्तनीयं हि नित्यदृष्टौ च तौ स्मृतौ ।
लक्ष्म्या दृष्टं न जानाति ब्रह्मा चैव चतुर्मुखः ॥ ५३ ॥

मोहनायासुराणां च भीत्या तौ न गताविति ।
उभयोर्गमनाभावे हेतुरन्योऽस्ति तच्छृणु ॥ ५७ ॥

भक्तवर्येऽपि प्रह्लादे वात्सल्यं नृहरेरपि ।
तत्कालजं तु ज्ञात्वैव नोपयायाच्चतुर्मुखः ॥ ५८ ॥

नोपायायात्तथा लक्ष्मीः प्रैषयत्तं चतुर्मुखः ।
एतावता च लक्ष्मादि सम्यग्वात्सल्यतां हरे ॥ ५९ ॥

हित्वा दैत्यसुते तच्च बुद्धिवैषम्यमेव हि ।
शंकनीया महाभाग मोहनाय सुरास्तथा ॥ ६० ॥

---

* प्राचीनपुस्तके सम्यङ् न मुद्रितः ।

प्रह्लादोऽपि महाभागो ननाम शिरसा हरिम् ।
मन्युज्वालैर्ज्वलन्तं च नारसिंहं भयङ्करम् ।। ६१ ।।

तमर्भकं पतितं पादमूले परिप्लुतः कृपया नारसिंहः ।
उत्थाप्य तं कृपय तस्य मूर्ध्नि कराम्बुजं ह्यददाद्वासुदेवः ।। ६२ ।।

दोर्भ्यां च तं भक्तवर्यं दयालुः प्रेम्णा च तं सस्वजे नारसिंहः ।
हरेः करस्पर्शविधूतपापः नष्टाशुभो व्यक्तस्वयोग्यदर्शनः ।। ६३ ।।

स विस्फुरज्ज्ञानधनस्वरूपो ह्यस्तौद्गिरा गद्गदया नृसिंहम् ।

प्रह्लाद उवाच

ये ब्रह्मरुद्रविबुधाः परमर्षयश्चसर्वे हरौ नियतबुद्धियुता हि नित्यं ।

एतादृशस्तु नृहरिस्तु मत्सकाशात् स्तोतुं समर्हति च किं ह्यसुरस्य जातेः ।। ६५ ।।

नारायणस्य परमस्य तु नैव चान्तं यान्ति स्वतश्च न हरौ प्रवणाश्च नित्यं ।
विद्यावयोद्रविणरूपतपःश्रुतानि चौजःप्रभावबलपौरुषबुद्धियोगाः ।।

एते परस्य न भवन्ति सुतोषणाय भक्त्या तुतोष भगवांश्च यथा गजाय ।। ६६ ।।

भक्त्योपबृंहितधनादिकमेव सम्यगाराधनाय भवति स्म न चान्यथा हि
दानं च सत्यं च दमः शमश्च ह्यमात्सर्यं ह्रीस्तितिक्षानुसूयाः ।। ६८ ।।

दानं च यज्ञं च तपः श्रुतं च महाव्रता द्वादश ब्राह्मणस्य ।
एतेभ्य एव प्रवरो द्वादशेभ्यस्तथाऽपि ते न प्रवरा ब्राह्मणस्य ।। ६९ ।।

एतैर्युताद्ब्राह्मणाद्वै खगेन्द्र नारायणस्य चरणाद्विमुखात्सदापि ।
सद्भक्तियुक्तं श्वपचं परमं वरिष्ठं मन्ये च भक्तिविधुराश्च गुणा वृथैव ।। ७० ।।

तस्मिन् समर्पितमनोवचनात्मरोहप्राणः पुनाति सकलं मन आदिकं च ।
तदेव भूर्यभिमानयुतं च विप्रं नैवं पुनाति यत एव च भक्तिहीनः ।। ७१ ।।

स ज्ञानवान् भवति भुक्तियुतेन चेतसा तस्येन्द्रियाणि वशगानि भवन्ति शश्वत् ।
ज्ञानोपदेशोऽनधिकारिणश्च सद्वर्णहीनस्य हरिः सुपूर्णः ॥ ७२ ॥

भक्तस्य पूजां करुणो वृणीते ह्यप्राप्तलाभाय च नैव विष्णुः ।
अनुष्ठितं कर्म भक्तैश्च पश्यन् विनाशित्वात्कृपया नारसिंहः ॥ ७३ ॥

तेषां हरिः फलदानाय नित्यं तत्स्वीकरोति नतु स्वीयार्थमेव ।
अतो हरेः पूर्णकामस्य नित्यं पूजादिकं चोपचारं वदन्ति ॥ ७४ ॥

अतः सदा वासुदेवाय मर्त्यो यद्यत्पूजां प्रकरोत्येव नित्यम् ।
तत्तत्पूजा............................* ॥ ७५ ॥

यथा मुखश्रीर्दृश्यते दर्पणादौ अलंकृतं चेत्तद्वदेवेति विद्धि ।
पूजाकाले देवदेवस्य विष्णोः विद्वत्त्वादिकारणं नैव चिन्त्यम् ॥ ७६ ॥

विप्रादित्वं श्वपचत्वं तथैव पूजाकाले भक्तिरेवैकहेतुः ।
विद्वज्जनात् यदि डम्भात्कृता चेत् पूजां नैव स्वीकरोत्येव नित्यं ॥ ७७ ॥

श्वपचेन यदि भक्त्या कृता चेत् पूजां हरिःस्वीकरोत्येव नित्यं ।
डम्भार्थमेव कृतपूजां हरिस्तु न गृह्णाति सर्वदा देवदेवः ॥ ७८ ॥

अतोऽस्म्यहं भक्तवर्येषु चैकः सर्वेश्वरस्याचिन्त्यशक्तेः स्वरूपम् ।
स्तोतुं न शक्नोमि नृसिंहदेव ह्यज्ञोऽहं वै चाल्पशक्तिः कृपालो ॥ ७९ ॥

भक्त्यानुपूर्वेण तु तस्य पुंसः संसारपाशाच्च विमोचनाख्यं ।
फलं भवत्येव न संशयोऽत्र तस्माद्भक्त्या स्तवनं कार्यमेव ॥ ८० ॥

सर्वे ब्रह्माद्या भक्तवर्गाश्च विष्णोस्तिष्ठन्ति नित्यं विधिना चैव देव ।
विशेषो वा तत्र भक्तस्य वर्गे यथा वयं चोद्विजन्तः सदैव ॥ ८१ ॥

तथा ब्रह्माद्यास्तव रूपं च दृष्ट्वा नैवोद्विजन्तश्च यतः प्रधानाः ।
नारायणस्यैव हरेर्मुरारेर्मनोहरैर्नारसिंहादिरूपैः ॥ ८२ ॥

विक्रीडन्तं भक्तवर्गस्य नित्यं सुखाय मोक्षादिप्रयोजनाय ।
तस्मान्नृसिंह मन्युमिमं त्यज त्वं ज्ञानं देहि सुजनस्य सुमन्युरूप ॥ ८३ ॥

नृसिंहरूपेण हतश्च दैत्यो लोकाश्च सौख्ये च रताः समस्ताः ।
यथैव मोदेत च सर्पवृश्चिकात्सुसज्जनो भागवतप्रधानः ॥ ८४ ॥

तथाद्य चाहं हननात् पितुश्च सुसज्जनानां च सुपीडकस्य ।
संसारचक्राच्च यथा बिभेति तथैष रूपान्न बिभेमि नित्यं ॥ ८५ ॥

संसारचक्राच्च यथा बिभेमि तथैव ते जिह्ववक्राच्च नैव ।
संसारचक्राच्च यथा बिभेमि तथाग्निना नैव बिभेमि देव ॥ ८६ ॥

यथैव संसारभ्रमेर्बिभेमि तथैव त्वद्भ्रूभिरथापि नैव ।
संसारदंष्ट्राच्च यथा बिभेमि तथैव ते ह्युग्रदंष्ट्राच्च नैव ॥ ८७ ॥

संसारमालाच्च यथा बिभेमि तथा च ते ह्यान्त्रमाल्याच्च नैव ।
संसारकर्णाच्च यथा बिभेमि तथा च ते शंकुकर्णाच्च नैव ॥ ८८ ॥

संसारनादाच्च यथा बिभेमि तथैव नादान्न बिभेमि नित्यं ।
भार्यानखाग्राच्च यथा बिभेमि तथा च ते क्रूरनखाच्च नैव ॥ ८९ ॥

तस्मान्नृसिंह कृपणवत्सल दुःसहोग्रसंसारचक्रकदनात्प्रबिभेमि नित्यं ।
बद्धः स्वकर्मभिरलं तव पादमूलं संसारचक्रदहने वडवानलं च ॥ ९० ॥

एतादृशं च चरणं शरणं प्रयामि मत्कर्मबीजदहनाय नमो नमस्ते ।
देवादियोनिषु जगत्सु प्रियस्ववस्तुवियोगतश्चाप्रियवस्तुसंगतः ॥ ९१ ॥

तज्जन्यशोकाख्यदवानलेन दिवानिशं दह्यमानो भ्रमामि ।
संसारचक्रपतितस्य दुराशयस्य संवृद्धकोशगृहदाससुतैर्युतस्य ॥ ९२ ॥

सौख्यं च यो वदति तस्य भवेच्च दुःखं संसारगस्य भवतीति च किं नु वाच्यं ।
संसारचक्राख्यसुमृत्युवक्त्रो संदह्यमानस्य दुरन्तचिन्तया ॥ ९३ ॥

कृपौषधं देहि तथा नृसिंह पादारविन्दे तव दास्ययोगम् ।
प्रेमास्पदस्य नृहरेः परदेवताया लीलाकथा अनुदिनं च विरिंचिगीताः ॥ ९४ ॥

अंजस्तराम्यनुगृणन् भवदीयलीला हंसाश्च संगतवतश्च सुदुःखरूपान् ।
भार्यासुताप्तगृहवित्तपशून् शिशूंश्च दुःखादिरूपनरकाणि समस्तजन्तून् ॥ ९५ ॥

त्वत्पादरूपकुसुमे च सुपापतारके भक्तिं प्रदेहि भगवन्न तु काममन्यम् ।
संसारवर्त्मनि सुतीक्ष्णभयंकरे च संभ्रामितश्च सुखलेशमहं न जाने ॥ ९६ ॥

तृष्णाभ्यवर्धत सदा च दुराशयस्य चाशानिवृत्तिमुपयाति कदा हि देव ।
आशा खरा खरतरात्प्रबिभेमि नित्यं छिन्ध्याशु नः सुतकलत्रधनादिकाशाम् ॥ ९७ ॥

संजल्पतस्तव मनूंश्च नृसिंहभूमन् बीजाक्षरैश्च सहितं च सहस्रसंख्यम् ।
हालाहलस्य सुविषस्य न भीतिरस्ति कालानलस्य न तथाच सुमृत्युवक्त्रात् ॥ ९८ ॥

व्यालाच्च नागवृकवृश्चिकफल्गुदुःखात् निर्मुच्यते च किमुतात्र विचार्यमस्ति ।
त्वन्मन्त्रपाठजपतो न तु दुःखलेशो भार्यासुताच्च ह्यपि विश्वत एव नित्यम् ॥ ९९ ॥

यो मन्त्रवर्यमुरुदिव्यमनुत्तमं च सम्यग्विहाय सुरतस्य च दुःखमूले ।
अजितेन्द्रियं च सुविकर्षति श्रीनृसिंह शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित् ॥ १०० ॥

घ्राणोऽन्यतश्चपलदृक् च तथाननं त्वन्मन्त्रबीजजपतो स्ववशा हि चैते ।
दम्भार्थमेव च सदापि विकुर्वतां च मौनव्रतश्रुततपोऽध्ययनस्वधर्माः ॥ १०१ ॥

व्यर्थं भवेन्ननु कृतं चरितं च सर्वं तस्मात्सुदेहि तव पादसरोजदास्यं ।
एवं च संस्तुतहरिर्भगवान्परेशः सम्यग्जगाद घनगर्जितमेव वाक्यम् ॥ १०२ ॥

नृसिंह उवाच

प्रह्लाद मे ह्यतिप्रियोऽसि तवाद्य भद्रं कामं वरं च सुवृणीष्व सुशीघ्रमेव ।
एवं सुतीक्ष्णनखरैश्च विराजितेन संश्रावितश्च तमुवाच सुभक्तवर्यः ॥ १०३ ॥

प्रह्लाद उवाच

विषयेषु रतिर्नित्यं यथा न स्यान्महाप्रभो ।
तथैव मे वरं देहि नान्यथा तु कथंचन ॥ १०४ ॥

नृसिंह उवाच

मदाज्ञया त्वं राज्यं च प्रकुरुष्व महाप्रभो ।
मदर्पणेन संसारलेपो नैव भवेत्तव ॥ १०५ ॥

एवमुक्तो हृषीकेशस्तत्रैवान्तरधीयत ।
प्रह्लादो हरिमुद्दिश्य राज्यं सर्वमपालयत् ॥ १०६ ॥

वाय्वावेशाच्च प्रह्लादो हरिणा तत्त्वमञ्जसा ।
उपदिष्टो ह्यभूद्धीन्द्र हरिभक्तो महाप्रभुः ॥ १०७ ॥

वाय्वावेशाच्च प्रह्लादो नारदादधमः स्मृतः ।
वाय्वावेशह्रासकाले कर्मदेवसमः स्मृतः ॥ १०८ ॥

तदनन्तरजान्वक्ष्ये श्रुणु पक्षीन्द्रसत्तम ॥

इति श्रीगरुडपुराणे ब्रह्मकाण्डे प्रह्लादचरित्रे प्रह्लादकृत-नृसिंहावतारस्तुतिवर्णनं नाम चत्वारिंशोऽध्यायः ॥ ४० ॥

॥ एकचत्वारिंशोऽध्यायः ॥

श्रीकृष्ण उवाच

प्रह्लादानन्तरं गंगा भार्या वै वरुणस्य च ।
प्रह्लादादधमा ज्ञेया महिम्ना वरुणाधिका ॥ १ ॥

स्वरूपादधमा ज्ञेया नात्र कार्या विचारणा ।
ज्ञानस्वरूपगं विष्णुं यतो जानाति सर्वदा ॥ २ ॥

अतो गंगेति सा ज्ञेया नात्र कार्या विचारणा ।
भक्त्या विष्णुपदीत्येव कीर्तिता नात्र संशयः ॥ ३ ॥

या पूर्वकाले यज्ञलिङ्गस्य विष्णोः साक्षाद्धरेः विक्रमतः खगेन्द्र ।
वामस्य पादस्य नखाग्रतश्च निर्भिद्य चोर्ध्वाण्डकटाहखण्डम् ॥ ४ ॥

तदुदरमतिवेगात्संप्रविश्यावहन्तीं जगदघततिहन्तुः पादकिंजल्कशुद्धम् ।
निखिलमलनिहन्त्रीं दर्शनात्स्पर्शनाच्च सकृदवगाहात् भक्तिदां विष्णुपादे ॥ ५ ॥

शशिकरवरगौरां मीननेत्रां सुपूज्यां स्मरति हरिपदोत्थां मोक्षमेति क्रमेण ।
रुद्रोऽपि वायुकरमर्दितकालकूटबिन्दुं च प्राश्य शिरसि ह्यतिदह्यमानः ॥ ६ ॥

भागीरथी हरिपदांकमिति स्म नित्यं जानन् महापरमभागवतप्रधानः ।
भक्त्या च क्लिन्नहृदयः परमादरेण धृत्वा स्वमूर्ध्नि परमो ह्यशिवः शिवोऽभूत् ॥ ७ ॥

भागीरथ्याश्च चत्वारि रूपाण्यासन् खगेश्वर ।
महाभिषङ्नरेन्द्रस्य भार्या तु ह्यभिषेचिनी ॥ ८ ॥

द्वितीयेनैव रूपेण गङ्गा भार्या च शन्तनोः ।
सुषेणा वै सुषेणस्य भार्या तु ह्यभिषेचिनी ॥ ९ ॥

मण्डूकभार्या गङ्गा तु सैव मण्डूकिनी स्मृता ।
एवं चत्वारि रूपाणि गङ्गाया इति कीर्तितम् ॥ १० ॥

आदित्येष्वेव गणितः पर्जन्यः समुदाहृतः ।
प्रवर्षति सुवैराग्यं ह्यतः पर्जन्यनामकः ॥ ११ ॥

शरं बाणं पञ्चजन्याच्च पंच हत्वा दग्धा वर्गषट्कं क्रमेण ।
स्वबाणस्य स्वहृदि संस्थितस्य भजेत्सदा नैव भक्तिं विषं च ॥ १२ ॥

लिङ्गं पुष्टं नैव कार्यं सदैव लिङ्गं पुष्टं कार्यमेवं सदाऽपि ।
योनौ सक्तिर्नैव कार्यं सदैव योनौ सङ्गाद्याति मुक्तिं च सुष्ठु ॥ १३ ॥

वैराग्यमेवं प्रकरोति नित्यमतः पर्जन्यसंज्ञकः पक्षिवर्य ।
रामावतारे शरभाख्यो महात्मा सुवानरः स तु पर्जन्य एव ॥ १४ ॥

शरवत्केशा यस्य गात्रे खगेन्द्र संभासन्ते शरभाख्यो यतोऽतः ।
यमस्य भार्या शामला सा खगेन्द्र यस्मात्सदा कलिभार्या प्रियांश्च ॥ १५ ॥

मलान् सम्यक् शमनं संकरोति ह्यतश्च सा शामलासंज्ञकाऽभूत् ।
मलं वक्ष्ये हरिभक्तेर्विरोधि सुलोहपात्रे सन्निधानं च तस्याः ॥ १६ ॥

तद्वैष्णवैस्त्याज्यमेवं सदैव दग्धं वस्त्रं सन्धितनैल्यजन्यम् ।
संकुत्सितं परदुःखं खगेन्द्रं हरेर्भक्तैस्त्याज्यमेवं सदापि ॥ १७ ॥

नोच्चाश्च ये हरिभक्तेर्विहीनास्तेषां सङ्गो नैव कार्यः सदापि ।
पुराणसंपर्कविसर्जितं च पुराणतालं च पुराणवस्त्रम् ॥ १८ ॥

सुजीर्णकन्थाजिनमेखलं च यज्ञोपवीतं कलिभार्याप्रियं च ।
सदा गृहं चोर्णवितानकं च समत्कुणैः पूरितं कुत्सितं च ॥ १९ ॥

कलिप्रियं कलिभार्याप्रियं तन्नैव प्रियं शार्ङ्गपाणेः कदाचित् ।
कांस्ये सुपक्वं यावनालस्य चान्नं तुषः पिण्याकं बिम्बबिल्वं पलाण्डुम् ॥ २० ॥

दीर्घं तक्रं स्वादुहीनं कटूष्णमेते सर्वे कलिभार्याप्रियाश्च ।
सुदुर्मुखं निन्दनं चार्यजानां सुताडनं चात्मजानां प्रसह्य ॥ २१ ॥

सुपीडनं सर्वदा भर्तृवर्गे गृहस्थितव्रीहिवस्त्रादिचौर्यात् ।
प्रकीर्णभूतान् मूर्धजान् सन्दधानं करैर्युतं देवगृहं कलिप्रियम् ॥ २२ ॥

इत्यादिसर्वं कलिभार्याप्रियं च सुनिर्मलं प्रकरोत्येव नित्यं ।
अतश्च सा शामलेति स्वसंज्ञां अवाप सा देवकी संबभूव ॥ २३ ॥

युधिष्ठिरस्यैव बभूव पत्नी संभाविता तत्र च देवकी सा ।
चन्द्रस्य भार्या रोहिणी वैनतेय ह्यश्विन्यादिभ्यो ह्यधिका सर्वदैव ॥ २४ ॥

आदित्यभार्या संज्ञनाम्नी खगेन्द्र ज्ञेयं च नारायणरूपमेव ॥
जानातीत्येव संज्ञामवाप संज्ञेति लोके सूर्यभार्या खगेन्द्र ॥ २५ ॥

उषा तु या ह्यनिरुद्धस्य भार्या ह्युपास्ते वै षड्गुणं चैव विष्णुम् ।
अतश्चोषानामिका वै खगेन्द्र भार्या चैव ह्यनिरुद्धप्रिया च ॥ २६ ॥

ब्रह्माण्डस्य ह्यभिमानं च देव्या विराडिति ह्यभिधामाप तेन ।
गङ्गादिषट्कं सममेव नित्यं परस्परं नोत्तमं नाधमं च ॥ २७ ॥

प्रधानाग्नेः पुत्रतः पावकाख्यात्सदाऽधमा नात्र विचार्यमस्ति ।
आसां ज्ञानात्पुण्यमाप्नोति नित्यं सदा हरिः प्रीयते केशवोऽलम् ॥ २८ ॥

गङ्गादिभ्यो ह्यवरा चाग्निजाया स्वाहेति नाम्ना द्विगुणेनैव हीना ।
स्वाहाकारो मन्त्ररूपाभिमानी स्वाहेति संज्ञामाप सदैव वीन्द्र ॥ २९ ॥

अग्नेर्भार्यानन्तरं सम्बभूव जलाभिमानी चन्द्रपुत्रो बुधश्च ।
बुद्ध्या हरिं राष्ट्रजातं च सर्वं धृतत्त्वतो बुधसंज्ञामवाप ॥ ३० ॥

स एवाभूदभिमन्युर्महात्मा सुभद्राया जठरे ह्यर्जुनाच्च ।
कृष्णस्य चेन्द्रस्य यमस्य चांशैः सुसंयुतश्चाश्विनोर्वै हरस्य ॥ ३१ ॥

स्वाहाधमश्चन्द्रपुत्रो बुधस्तु पादारविन्दे विष्णुदेवस्य भक्तः ।
नामात्मिका त्वश्विभार्या ह्युषा नाम प्रकीर्तिता ॥ ३२ ॥

बुधाधमा सा विज्ञेया स्वाहादशगुणाधमा ।
नकुलस्य भार्या मगधस्य पुत्री शल्यात्मजा सहदेवस्य भार्या ॥ ३३ ॥

उभे ह्येते चाश्विभार्या ह्युषापि उपास्ते वै षड्गुणं विष्णुमाद्यम् ।
अतोऽप्युषा संज्ञका सा खगेन्द्र ह्यनन्तरान् श्रुणु वक्ष्ये महात्मन् ॥ ३४ ॥

ततः शनिः पृथिव्यात्मा शनैश्चरति सर्वदा ।
अतः शनैश्चरो नाम ह्युषायाश्च दशावरः ॥ ३५ ॥

कर्मात्मा पुष्करो ज्ञेयः शनेरप्यधमो मतः ।
नामाभिमान्युषसः किंचिदूनो दशगुणाधमः ॥ ३६ ॥

हरिप्रीतिकरो नित्यं पुष्करः क्रीडते यतः ।
अतस्तु पुष्करो नाम्ना लोके स परिकीर्तितः ॥ ३७ ॥

हरिप्रीतिकरान् धर्मान् श्रुणु वक्ष्ये खगाधिप ।
प्रातःकाले समुत्थाय स्मरेन्नारायणं हरिम् ॥ ३८ ॥

तुलसीवन्दने काले श्रीकृष्णं संस्मरेत्खग ।
विण्मूत्रोत्सर्गकाले च ह्यपानात्मककेशवम् ॥ ३९ ॥

त्रिविक्रमं शौचकाले गङ्गाया जनकं हरिम् ।
दन्तधावनकाले तु चन्द्रान्तर्यामिणं हरिम् ॥ ४० ॥

मुखप्रक्षालने काले माधवं संस्मरेत्खग ।
गवां कण्डूयने चैव स्मरेद्गोवर्धनं हरिम् ॥ ४१ ॥

सदा गोदोहने काले स्मरेद्गोपालवल्लभम् ।
अनन्तजन्मार्जितपुण्यसंचयात् सुपक्वकाले च खगेन्द्रसत्तम ॥ ४२ ॥

स्पर्शो गवां चैव सदा नृणां वै भवत्यतो नात्र विचार्यमस्ति ।
यस्मिन् गृहे नास्ति सदोत्तमा गौर्यदङ्गणे श्रीतुलसी च नास्ति ॥ ४३ ॥

यस्मिन् गृहे देवमहोत्सवश्च यस्मिन् गृहे श्रवणं नास्ति विष्णोः ।
तत्संसर्गाद्याति दुःखादिकं च तस्य स्पर्शो नैव कार्यः कदापि ॥ ४४ ॥

गोस्पर्शनविहीनस्य गोदोहनमजानतः ।
गोपोषणविहीनस्य पुनर्जन्म निरर्थकम् ॥ ४५ ॥

गोग्रासमदातुश्च गोपुष्टिं चाप्यकुर्वतः ।
गतिर्नास्त्येव नास्त्येव ग्रामश्चाण्डालवत्स्मृतः ॥ ४६ ॥

वत्सस्य स्तनपाने तु बालकृष्णं च संस्मरेत् ।
दधिनिर्मन्थने चैव मन्थनाधारिणं हरिम् ॥ ४७ ॥

मृत्तिकास्नानकाले तु वराहं संस्मरेद्धरिम् ।
पुण्ड्राणां धारणे चैव केशवादींश्च संस्मरेत् ॥ ४८ ॥

मुद्राणां धारणे चैव शङ्खचक्रगदास्तथा ।
पद्मनारायणीं मुद्रां कृद्धोल्कादींश्च संस्मरेत् ॥ ४९ ॥

श्रीरामसंस्मृतिं चैव सन्ध्याकाले खगोत्तम ।
अच्युतानन्तगोविन्दान् श्राद्धकाले च संस्मरेत् ॥ ५० ॥

प्राणादिपंचकं होमेऽनिरुद्धादींश्च संस्मरेत् ।
अन्नाद्यर्पणकाले तु वासुदेवं च संस्मरेत् ॥ ५१ ॥

आपोशनस्य काले तु वायोरन्तर्गतं हरिम् ।
वस्त्रधारणकाले तु ह्युपेन्द्रं संस्मरेद्धरिम् ॥ ५२ ॥

यज्ञोपवीतस्य च धारणे तु नारायणं वामनाख्यं स्मरेत्तु ।
आर्तिक्यकाले च तथैव विष्णोः सम्यक्स्मरेत् परशुरामाख्यविष्णुम् ॥ ५३ ॥

आपोशने वैश्वदेवस्य काले तदन्यहोमादिषु भस्मधारणे ।
स्मरेत्तु भक्त्या परमादरेण नारायणं जामदग्न्याख्यरामम् ॥ ५४ ॥

त्रिवारतीर्थग्रहणस्य काले कृणं रामं वासुदेवं क्रमेण ।
शङ्खोदकस्योद्धरणं चैव काले मुकुन्दरूपं संस्मरेत्सर्वदैव ॥ ५५ ॥

ग्रासे ग्रासे स्मरणे चैव कार्यं गोविन्दसंज्ञस्य विशुद्धरूपम् ।
एकैकभक्ष्यग्रहणस्य काले सम्यक्स्मरदच्युतं वै खगेन्द्र ॥ ५६ ॥

शाकादीनां भक्षणे चैव काले धन्वन्तरिं संस्मरेच्चैव नित्यम् ।
तथापरान्नस्य च भोगकाले स्मरेत्सम्यक् पाण्डुरङ्गं च विष्णुम् ॥ ५७ ॥

हैयंगवीनस्य च भक्षणे वै सम्यक्स्मरेत्ताण्डवाख्यं च कृष्णम् ।
दध्यन्नस्य भक्षणे चैव काले गोपालकृष्णं संस्मरेच्चैव विष्णुम् ॥ ५८ ॥

दुग्धान्नभोगे च तथैव काले सम्यक्स्मरेत् श्रीनिवासाख्यविष्णुम् ।
सुतैलसर्पिःषु सुपक्वभक्षसंभोजने संस्मरेद्व्यङ्कटेशम् ॥ ५९ ॥

द्राक्षासुजम्बूकदलीरसालनारिङ्गदाडिम्बफलानि चारु ।
स्मरेत्तु रम्भोत्तमनारिकेलधात्रीसुभोगे खलु बालकृष्णम् ॥ ६० ॥

सुपानकस्यैव च पानकाले सम्यक् स्मरेन्नारसिंहाख्यविष्णुम् ।
गङ्गामृतस्यैव च पानकाले गङ्गातातं संस्मरेद्विष्णुमेव ॥ ६१ ॥

प्रयाणकाले संस्मरेत्तार्क्ष्यवाहं नारायणं निर्गुणं विश्वमूर्तिम् ।
पुत्रादीनां चुम्बने चैव काले सुवेणुहस्तं संस्मरेत्कृष्णमेव ॥ ६२ ॥

सुसङ्गकाले स्वस्त्रियश्चैव नित्यं गोपीकुचद्वन्द्वविलासितं हरिम् ।
ताम्बूलभोगे संस्मरेच्चैव विष्णुं प्रद्युम्नाख्यं वासुदेवं हरिं च ॥ ६३ ॥

शय्याकाले संस्मरेच्चैव विष्णुं प्रद्युम्नाख्यं वासुदेवं हरिं च ।
निद्राकाले संस्मरेत्पद्मनाभं कथाकाले व्यासरूपं हरिं च ॥ ६४ ॥

सुगानकाले संस्मरेद्वेणुगीतं हरे हरे प्रवदेत्सर्वदैव ।
श्रीमत्तुलस्याश्छेदने चैव काले श्रीरामरामेति च संस्मरेत्तु ॥ ६५ ॥

पुष्पादीनां छेदने चैव काले सम्यक्स्मरेत्कपिलाख्यं हरिं च ।
प्रदक्षिणे गरुडान्तर्गतं च हरिं स्मरेत् सर्वदा वै खगेन्द्र ॥ ६६ ॥

प्रणामकाले देवदेवस्य विष्णोः शेषान्तस्थं संस्मरेच्चैव विष्णुम् ।
सुभीतिकाले संस्मरेन्नारसिंहं नारायणं संस्मरेत्सर्वदाऽपि ॥ ६७ ॥

पूर्तिर्यदा क्रियते कर्मणां च सम्यक्स्मरेत् वासुदेवं हरिं च ।
एवं कृतानि कर्माणि हरिप्रीतिकराणि च ॥ ६८ ॥

सम्यक् प्रकुर्वन्नेतानि पुष्करो हरिवल्लभः ।
एतस्मादेव पक्षीश कर्मपः समुदाहृतः ॥ ६९ ॥

पुष्कराख्यानमतुलं श्रुणोति श्रद्धयाऽन्वितः ।
हरिप्रीतिकरे धर्मे प्रीतियुक्तो भवेत्सदा ॥ ७० ॥

इति श्रीगारुडे महापुराणे उत्तरखण्डे तृतीयांशे ब्रह्मकाण्डे कृष्णगरुडसंवादे पुष्करचरित्रे तत्त्वरहस्यं नाम एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

॥ समाप्तमिदं गरुडपुराणम् ॥

॥ श्रीमध्वेशार्पणमस्तु ॥

ನಮ್ಮ ಪ್ರಕಟನೆಗಳು

1.	ಸಂಧ್ಯಾರಹಸ್ಯ	10.00
2.	ಪೂಜಾರಹಸ್ಯ	60.00
3.	ಮಾಂಡೂಕೋಪನಿಷದ್ಭಾಷ್ಯಮ್	75.00
4.	ಸಂಧ್ಯಾರಹಸ್ಯ (ತಮಿಳು)	20.00
5.	ಪೂಜಾರಹಸ್ಯ (ತಮಿಳು)	25.00
6.	ಸುಮಧ್ವವಿಜಯ (ತಮಿಳು)	
7.	ಸದಾಚಾರಸ್ಮೃತಿ	10.00
8.	ಶ್ರೀಮದ್ಭಾಗವತಸಾರೋದ್ಧಾರ (ಕನ್ನಡ ಅನುವಾದ)	50.00
9.	ಶ್ರೀಮನ್ನ್ಯಾಯಸುಧಾಸ್ತುತಿ	6.00
10.	ಶ್ರೀರುದ್ರವ್ಯಾಖ್ಯಾನಮ್	30.00
11.	ಶ್ರೀಮದ್ಭಾಗವತ ನವಮಸ್ಕಂಧ	75.00
12.	ಶ್ರೀಮದ್ಭಾಗವತ ದಶಮಸ್ಕಂಧ ಸಂಪುಟ 1	100.00
13.	ಶ್ರೀಮದ್ಭಾಗವತ ದಶಮಸ್ಕಂಧ ಸಂಪುಟ 2	125.00
14.	ಶ್ರೀಮದ್ಭಾಗವತ ದಶಮಸ್ಕಂಧ ಸಂಪುಟ 3	65.00
15.	ಶ್ರೀಮದ್ಭಾಗವತ ದಶಮಸ್ಕಂಧ ಸಂಪುಟ 4	80.00
16.	ಶ್ರೀಮದ್ಭಾಗವತ ದಶಮಸ್ಕಂಧ ಸಂಪುಟ 5	175.00
17.	ಪ್ರಮೋದ ತರಂಗಿಣಿ (ಕನ್ನಡ)	30.00
18.	ಗೀತಾಪ್ರತಿಪದಾರ್ಥಚಂದ್ರಿಕಾ	75.00
19.	ಶ್ರೀಸತ್ಯಪ್ರಮೋದವಿಜಯ (ಕನ್ನಡಾನುವಾದ ಸಹಿತ)	25.00
20.	ಶ್ರೀಗರುಡಪುರಾಣ- ಬ್ರಹ್ಮಕಾಂಡ	80.00

ಪುಸ್ತಕಗಳು ದೊರೆಯುವ ವಿಳಾಸ :

ವ್ಯವಸ್ಥಾಪಕರು,

ಶ್ರೀಜಯತೀರ್ಥ ವಿದ್ಯಾಪೀಠ, ಶ್ರೀಮದುತ್ತರಾದಿಮಠ,

ಬಸವನಗುಡಿ, ಬೆಂಗಳೂರು - 560 004.